॥ श्रीः ॥

श्रीविश्वनाथो जयति ।

वाक्यपदीयं

पुण्यराजकृतप्रकाशाख्यटीकासहितं प्रारभ्यते ।

॥ श्रीगणेशाय नमः ॥

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ १ ॥

यतस्सर्वधर्म्मपरिकल्पनातीतं भेदसंसर्गसमतिक्रमेण सर्वाभिः शक्तिभिः समाविष्टं च विद्याऽविद्याप्रविभागरूपं च व्यवहारानुपातिभिर्धर्म्माधर्म्मैः सर्व्वावस्थास्वनाश्रितं च अत एवानादिनिधनं तद्ब्रह्मेति प्रतिज्ञायते। यतोऽनवच्छिन्नं रूपाभिमतानामपि विकाराणां प्रकृत्यन्वयाद् व्यापकं च। सर्व्वशब्दरूपतया सर्व्वशब्दोपग्राह्यतया च शब्दतत्त्वमभिधीयते। तच्चानिमित्तत्वादक्षरम्। अयं भावः। प्रत्यक्चैतन्यस्यान्तः सन्निविष्टस्य परबोधनाय शक्तिरभिष्यन्दतइति। तथा च श्रुतिः। 'सूक्ष्मामर्थेनाप्रविभक्ततत्त्वामेकां वाचमभिष्यन्दमानाम्। उतान्ये विदुरन्यामिव च पूतां नानारूपामात्मनि सन्निविष्टा'मिति। विवर्ततेऽर्थभावेनेति। एकस्य तत्त्वादप्रच्युतस्य भेदानुकारिणासत्या विभक्तान्यरूपोपग्राहिता विवर्त्तः स्वप्नविषयप्रतिभासवत्। उक्तं च। 'मूर्तिक्रियाविवर्तौ विद्याशक्तिप्रवृत्तिमात्रगतौ। विद्यात्मनिष्ठरूपौ तत्त्वान्यत्वाभ्यामनाख्येयौ। एतद्धि तदविद्याया अविद्यात्व'मिति। प्रक्रियेति। यतः शब्दाख्यादुपसंहृतक्रमाद्ब्रह्मणः

सर्व्वविकारप्रत्यस्तमये वर्तमानादव्याकृतात्पूर्व्वं विकारग्रन्थिरूपत्वे- नाव्यपदेश्याज्जगदाख्या विकाराः प्रक्रियन्तइत्यर्थः । उक्तं च । 'ब्र- ह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम् । विवृतं शब्दमात्राभ्यस्तास्वेव प्रविलीयते' इति ॥ १ ॥

तदेवोपपादयति ॥

एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात् ।
अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनेव वर्तते ॥ २ ॥

यद्विकारविकारिविषयमेकत्वरूपं पृथक्त्वरूपं वा तत्सर्व्वं प्रकृत्येक- त्वादेकमित्याम्नातम् 'एकमेवाद्वितीयम्' 'प्रणव एवैकस्त्रेधा ऽभि- व्यज्यते' इत्यादिश्रुतिभिः । नन्वेवं पृथक्त्वरूपमनुपपन्नमत आह । भि- न्नमिति । शब्दतत्त्वे ब्रह्मणि एकत्वाविरोधिन्यः समुचिता आत्मभू- ताः शक्तयः सन्ति मिथो भिन्नास्तद्भेदारोपेण भिन्नं पृथग्रूपमित्यर्थः । तद्यथा एकस्यामुपलब्धौ अर्थाकारप्रत्यवभासमात्रा पृथिवीलोका इति नहि ज्ञेयगताकारावग्रहो ज्ञानस्यैकत्वेन विरुध्यते तथेत्यर्थः । शक्तिभ्यो ब्रह्मणोऽपृथक्त्वेऽपि आरोपितः पृथक्त्वावभास इत्यर्थः । न खलु जातिव्यक्तिवदन्याः शक्तयो ब्रह्मणो विद्यन्ते तत्तत्प्रकाशवत् । तद्वदेव च काल्पनिको भेदव्यवहार इति भावः ॥ २ ॥

ब्रह्मण एकत्वेऽपि शक्तिभेदनियामकमाह ॥

अव्याहताः कला यस्य कालशक्तिमुपाश्रिताः ।
जन्मादयो विकाराः षट् भावभेदस्य योनयः ॥ ३ ॥

तत्स्वरूपत्वेनाव्याहता नित्या अपि यस्य कलाः शक्तयः काल- शक्तिमाश्रिता भावभेदस्य योनयः षड् जन्मादयो विकारा भवन्ती- त्यन्वयः । कालाख्येन स्वातन्त्र्येण सर्व्वाः परतन्त्रा जन्मादिमय्यश- क्तयः तत्समाविष्टाः कालशक्तिवृत्तिमनुपतन्ति ततश्च प्रतिभावं स्वरू-

पस्य प्रतिबन्धाभ्यनुज्ञाभ्यां शक्त्यवच्छेदेन क्रमवानिवाभासोपगमो लक्ष्यते। सर्व्वेषां हि विकाराणां कारणान्तरेषु सत्स्वपि अपेक्षावशात् प्रतिबन्धजन्मनामभ्यनुज्ञया सहकारिकारणंकालः तस्य क्रमवद्भिर्मात्रारूपैः शक्तिः प्रविभज्यमाना विकारगतं भेदं तत्राध्यारोपयति तुलासूत्रइव संयोगिद्रव्यान्तरगुरुत्वप्रतिबन्धकाले दण्डलेखावच्छेदम्। एवं च अभूत् भविष्यतीति अपूर्वापरस्य पौर्व्वापर्य्यव्यवस्थाविकल्पे सति जन्मादयो विकाराः षट् परिणामाः सतां विकाराणां योनय उपप्लवन्तइत्यर्थः। भावविकाराश्च जातिसमुद्देशे वक्ष्यन्ते॥ ३॥

का सा कालशक्तिरत आह॥

एकस्य सर्वबीजस्य यस्य चेयमनेकधा।
भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः॥ ४॥

एकस्य सर्वबीजस्य ब्रह्मणस्तत्त्वान्यत्त्वाभ्यां सत्त्वासत्त्वाभ्यां चानिर्वाच्या शक्तिरूपा स्थितिरनेकधा भोक्तृभोक्तव्यभोगरूपेण लोकव्यवहाराय प्रवर्त्ततइत्यर्थः॥ ४॥

व्याकरणस्य तत्प्राप्त्युपायतां परम्परया दर्शयितुमाह॥

प्राप्त्युपायोऽनुकारश्च तस्य वेदो महर्षिभिः।
एकोप्यनेकवर्त्मेव समाम्नातः पृथक्पृथक्॥ ५॥

ममाहमित्यहङ्कारग्रन्थिसमतिक्रमणमात्रं ब्रह्मणः प्राप्तिः। तदुपायो वेदः। एवं ह्याह वेदाभ्यासात्परमान्तरं शुक्लमजरं ज्योतिरस्मिन्नेवापारे तमसि पीते विवर्ततइति। अनुकार इति। यां सूक्ष्मां नित्यामतीन्द्रियां वाचमृषयः साक्षात्कृतधर्म्माणो मन्त्रदृशः पश्यन्ति। तामसाक्षात्कृतधर्म्मभ्यः परेभ्यः प्रतिवेदयिष्यमाणाः बिल्मं समामनन्ति। स्वप्ने वृत्तमिव दृष्टश्रुतानुभूतमाचिख्यासन्ते इत्येष पुराकल्प-

माह बिल्म:(१)। वेदवेदाङ्गानि बिल्म:। स वेद एकोपि महर्षिभि-रनेकवर्त्मेव समाम्नातः। एकस्य वेदस्य स्वरूपेण भेदाभावादभिव्य-क्तिलक्षणशब्दक्रमरूपं वागात्मत्त्वं प्रापय्य अध्येतॄणामध्ययननिमित्तं चरणसमाख्याव्यवस्था ऋषिभिः कृता ॥ ५ ॥

भेदानां बहुमार्गत्वं कर्म्मण्येकत्र चाङ्गता ।

शब्दानां यतशक्तित्त्वं तस्य शाखासु दृश्यते ॥ ६ ॥

भेदानां शाखानां बहुमार्गत्वं शतमध्वर्युशाखाः सहस्रं साम्नः एकविंशतिधा बह्वृचां पञ्चदशधेत्येके। नवधाथर्व्वणो वेद इत्येवं प्र-तिभामार्गा बहवः सर्वशाखाप्रत्ययमेकं कर्म्मेति। एककर्माङ्गता कल्पसूत्रकारैरुक्ता। तथा शब्दानां यतशक्तित्वं नियतार्थप्रत्यायन-सामर्थ्यमभ्युदयहेतुतासामर्थ्यं च नियतं, तस्य शाखासु तद्विषयत्वे-न व्याकरणं दृश्यते। 'देवसुम्नयोर्यजुषि काठके'त्यिमस्याथर्व्वणेऽन्त उदात्त, इति। अयं शाखाभेदो विच्छेदे पुनःपुनर्भवतीत्यागमः, प्रा-क् प्रविभागात्त्वेकत्वमेवेति भावः ॥ ६ ॥

एवं तर्हि स्मृतीनामप्रामाण्यं स्यादत आह ॥

स्मृतयो बहुरूपाश्च दृष्टादृष्टप्रयोजनाः ॥

तमेवाश्रित्य लिङ्गेभ्यो वेदविद्भिः प्रकाशिताः ॥ ७ ॥

दृष्टप्रयोजनाश्चिकित्सादिविषयाः। अदृष्टप्रयोजना भक्ष्याभक्ष्या-दिविषयाः। तमेवाश्रित्य लिङ्गेभ्य इत्यनेन सर्व्वासां स्मृतीनां वेद-मूलकत्वेन प्रामाण्यं दर्शितम् ॥ ७ ॥

ननु सर्वस्य वेदमूलकत्त्वे तस्य चैकरूपत्त्वात् मतभेदो निर्म्मूलः स्यादत आह ॥

तस्यार्थवादरूपाणि निश्रित्य स्वविकल्पजाः ।

---

(१) इत्येष पुराकल्पमाह बिल्म इत्यस्य स्थाने इत्येष पुराकल्पः इति पाठान्तरम्।

एकत्विनां द्वैतिनां च प्रवादा बहुधा मताः ॥ ८ ॥

अर्थवादरूपाणि अर्थवादप्रकाराणि वाक्यानि तेभ्यः प्रवादाः पौरुषेयाः परस्परविरुद्धा दृश्यन्ते । पुरुषबुद्धिविकल्पाच्च प्रवादभेदाः सम्भवन्ति । तद्यथा । 'असद्वा इदमग्र आसीदि'त्यग्निचयनस्थानस्तुत्यर्थोऽर्थवादः । 'सदेव सौम्येदमग्र आसीदि'तिचान्यत्र । 'तम एव खल्विदमग्र आसीदि'ति चान्यत्र । अन्यत्रोक्तम् । 'इदं पीनो न कश्चिद्दा बुद्दो वा न कश्चन । मायैषा बत दुष्पारा विपश्चिदिति पश्यन्ति' । 'अन्धो मणिमविन्दत्तमनङ्गुलिरावयत् । तमग्रीवः प्रत्यमुञ्चत्तमजिह्वोऽभ्यपूजयत्'(१) । 'तथा आप एवेदमग्र आसीदिति' । द्वैतिनः खल्वाहुः । 'नित्याश्चानित्याश्च मात्रायोनयः यासु रूपि चारूपि च सूक्ष्मं च स्थूलं चेदं भुवनं विषक्तमि'ति । तथा 'द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति' इति । इन्द्रियग्रामश्चान्तर्यामी च बुद्धिश्च चेतनश्चेति । अथापरे विवृतं सत्त्वमेव बहुधा न किञ्चन चैतन्यमित्याहुः । एकत्विन आहुः । 'तदेजति तन्नैजति तद्दूरे तद्वदन्तिके । तदन्तरस्य सर्व्वस्य तदु सर्व्वस्यास्य बाह्यत'इति, एवं दर्शनविकल्पाः ॥ ८ ॥

तत एव खल्वेवं प्रवादेषु किं सत्यं तत्राह ॥

सत्या विशुद्धिस्तत्रोक्ता विद्यैवैकपदागमा ।
युक्ता प्रणवरूपेण सर्व्ववादाविरोधिनी ॥ ९ ॥

इहैकस्मिन्ब्रह्मणि सर्वं कल्पितं स चान्तरः पुरुषस्सर्वविकल्परहित इत्यत्र प्रणवः सर्व्वस्याभ्यनुज्ञाविषयः सर्व्वश्रुतिरूपः प्रकृतिसर्व-

---

(१) अन्धो मणिमविन्दत्तमनङ्गुलिरावयत् अग्रीवः प्रत्यमुञ्चत् तमजिह्वा असश्चत इति तैत्तिरीयारण्यके पाठः ।

नामत्त्वात्सर्व्वदर्शनोदयप्रत्यस्तमययोनिः सर्व्वाविरुद्धार्थोपग्राही स-र्व्वथेदं ब्रह्माभ्यनुजानाति सर्व्वथा च प्रतिषेधति । तथा च श्रुतिः । 'तदेकं च न चैकं च तथोभे नाप्युभे ततः । कर्मस्य विषयं ब्रूयुः स-त्त्वस्थाः समदर्शिन' इति ॥ ९ ॥

प्रणवस्य सर्वरूपत्वमाह ॥

विधातुस्तस्य लोकानामङ्गोपाङ्गनिबन्धनाः ।
विद्याभेदाः प्रतायन्ते ज्ञानसंस्कारहेतवः ॥ १० ॥

प्रकृतित्वेन सर्वलोकविधाता प्रणवः । तदाहुः । 'स हि सर्व्वश-ब्दार्थप्रकृति'रिति । एवं च विद्याभेदाः प्रणवात्मतया वेदं नातिक्रा-मन्ति । तदाहुः । 'सर्व्वा वाचो वेदमनुप्रविष्टा नावेदविन्मनुते ब्रह्म किञ्चिदि'ति । एवं च प्रणवादेव साङ्गोपाङ्गश्रुतिस्मृतित्रय्यन्ता विद्या भागाः प्रभवन्ति सम्यग्ज्ञानहेतवः पुरुषसंस्कारहेतवश्च तस्य वेदा-ख्यस्य प्रसिद्धस्य ब्रह्मणोऽङ्गेभ्यो ज्यौतिषादयः उपाङ्गेभ्यश्चिकित्सादयो विद्याभेदाः प्रभवन्ति ॥ १० ॥

आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः ।
प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः ॥ ११ ॥

तस्य वेदाख्यस्य ब्रह्मणः साधुत्वप्रतिपत्त्यर्थं स्वरूपसंस्कारस्य सा-क्षादुपकारकं व्याकरणमित्यासत्तिः । तपसां चान्द्रायणादीनां स्वा-ध्यायादीनां च मध्ये दृष्टफलहेतुत्वादिदमधिकं तपः । यस्याक्षरस-माम्नायस्य ज्ञानमात्रेण सर्व्वपुण्यफलावाप्तिरागमेन स्मर्य्यते । तच्छ-न्दसां प्रथममङ्गं प्रधानत्वात् । एवं ह्याह भाष्यकारः । 'प्रधानं च ष-ट्स्वङ्गेषु व्याकरणं प्रधाने च कृतो यत्नः फलवान्भवती'ति ॥ ११ ॥

तस्य प्राधान्यमेवोपपादयति ॥

प्राप्तरूपविभागाया यो वाचः परमो रसः ।

यत्तत्पुण्यतमं ज्योतिस्तस्य मार्गोऽयमाञ्जसः ॥१२॥

अभिन्नासंहृतक्रमाच्छब्दतत्त्वाद्वर्णपदवाक्यलक्षणं रूपविभागं प्राप्ताया वाचो ऽभिधेयत्वेनार्थविभागोपग्राहं नित्येनार्थसम्बन्धेन प्राप्ताया वाचः यतो वागेवाविभागापन्ना गवादिरूपेणावतिष्ठते । गवादयश्च बाह्यार्थविभागाः पुनः श्रुतिरूपत्वेन परिणमन्ते । अत एव शब्दार्थयोः कार्यकारणभावसम्बन्ध इत्येके । श्रुतिरपि । 'नामेदं रूपत्वेन च वृत्तरूपं रूपं चेदं नामभावेन तस्थे । एके तदेकमविभक्तं विभेजुः प्रागेवान्ये भेदरूपं वदन्ति' इति । तस्याः परमो रस इति वाचकत्वादभ्युदयहेतुत्वाच्च व्यवस्थितसाधुभावः शब्दसमूहो ऽभिधीयते । एवं ह्याह । ऋजीषमेतद्वाची यः संस्कारहीनश्शब्द इति । यत्तत्पुण्यतममिति । एवं ह्याह । त्रीणि ज्योतींषि त्रयः प्रकाशाः योयं जातवेदा यश्च पुरुषेष्वान्तरः प्रकाशः यश्च प्रकाशयोः प्रकाशयिता शब्दाख्यः प्रकाशः तत्रैतत्सर्व्वमुपनिबद्धं यावत्स्थास्नु चरिष्णु चेति । तस्य मार्गो यमाञ्जसः । अयं सामान्यविशेषलक्षणवान्व्याकरणरूपः । तदुक्तम् । 'शब्दार्थसम्बन्धनिमित्ततत्त्वं वाच्याविशेषेपि च साध्वसाधून् । साधुप्रयोगानुचितांश्च शिष्टान्न वेद यो व्याकरणन्न वेद' इति ॥ १२॥

तदेवाह ॥

अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् ।
तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते ॥ १३ ॥

अर्थप्रवृत्तितत्त्वं विवक्षा न तु वस्तुनः स्वरूपेण सत्त्वमसत्त्वं वा । विवक्षैव हि शब्दप्रयोगनिबन्धनम् । योग्यं हि शब्दं प्रयोक्ता विवक्षाप्रापितसाधुभावेष्वर्थेषु प्रयुङ्क्ते । यथा । प्रतिविषयं योग्यमेवेन्द्रियमुपलब्धौ प्रणिधत्ते । यद्वा । अर्थप्रवृत्तितत्त्वं सामान्यं तस्य शब्दानिबन्धनमित्यर्थः । यद्वा । अर्थानां प्रवृत्तेराख्यातोपात्तजन्मादिक्रिया-

यास्तत्त्वं साध्यत्वं साधनाकाङ्क्षारूपं कालाभिव्यक्तिहेतुत्वं च तथा शब्दानां तत्त्वं साधुत्त्वं स साधुर्यस्य व्याकरणावगतः संस्कारो ऽविकलः तद्विकलास्त्वपभ्रंशा इति ॥ १३ ॥

पुनर्व्याकरणस्य प्राशस्त्यमाह ।

तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते ॥ १४ ॥

शब्दस्वरूपतत्त्वज्ञः क्रमसंहारेण योगं लभते साधुप्रयोगाच्चाभिव्यक्तधर्मविशेषो महान्तं शब्दात्मानमभिसंभवं कैवल्यं प्राप्नोति, सोऽव्यतिकीर्णां वागवस्थां मध्यमाख्यामधिगम्य वाग्विकाराणां प्रकृतिं पश्यन्त्याख्यां प्रतिभामुपैति तस्माच्च सत्तामात्रात्प्रतिभाख्याच्छब्दात्पूर्वयोगभावनाभ्यासात् प्रत्यस्तमितसर्व्वविकारोल्लेखां परां प्रकृतिं प्रतिपद्यते। वाङ्मलानां चिकित्सितम् । आयुर्व्वेदइव शारीराणां, व्याकरणज्ञो हि प्रत्यवायहेतूनशब्दान्न प्रयुङ्क्ते ज्ञानं हि तस्यशरणम्। पवित्रं सर्व्वविद्यानाम्। तन्निमित्तत्वात्संस्कारस्य, शब्दोपगृहीतो हि विद्यासर्थः। उक्तं च। 'आपः पवित्रं परमं पृथिव्यामपां पवित्रं परमञ्च मन्त्राः। तेषाञ्च सामर्ग्यजुषां पवित्रं महर्षयो व्याकरणं निराहु'रिति। अधिविद्यं विद्यासु ॥ १४ ॥

पुनस्तदेव स्तौति ॥

यथार्थजातयः सर्वाः शब्दाकृतिनिबन्धनाः ।
तथैव लोके विद्यानामेषा विद्या परायणम् ॥ १५ ॥
इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ॥ १६ ॥
अत्रातीतविपर्य्यासः केवलामनुपश्यति ।
छन्दस्यश्छन्दसां योनिमात्माच्छन्दोमयीं तनुम् ॥ १७ ॥

प्रत्यस्तमितरूपाया यद्वाचो रूपमुत्तमम्।
यदस्मिन्नेव तमसि ज्योतिः शुद्धं प्रवर्त्तते ॥ १८ ॥
वैकृतं समतिक्रान्ता मूर्तिव्यापारदर्शनम्।
व्यतीत्यालोकतमसी प्रकाशं यमुपासते ॥ १९ ॥
यत्र वाचो निमित्तानि चिह्नानीवाक्षरस्मृतेः।
शब्दपूर्वेण योगेन भासन्ते प्रतिबिम्बवत् ॥ २० ॥
अथर्वणामङ्गिरसां साम्नामृग्यजुषस्य च।
यस्मिन्नुच्चावचा वर्णाः पृथक्स्थितपरिग्रहाः ॥ २१ ॥
यदेकं प्रक्रियाभेदैर्बहुधा प्रविभज्यते।
तद्व्याकरणमागम्य परं ब्रह्माधिगम्यते ॥ २२ ॥

ननूत्पन्नविनष्टानां शब्दानां किं व्याकरणेनेत्यत आह ॥

नित्याः शब्दार्थसम्बन्धाः समाम्नाता महर्षिभिः।
सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः ॥ २३ ॥

इह शब्दार्थशब्दाभ्यां तद्गता जातिरभिधीयते। सा च नित्येति केचित्। तथाहि। शब्दत्वव्याप्यवृक्षशब्दत्वादयो जातयः सन्ति ताभिः स्वाश्रयतया वस्तुसम्मोहे(१) निमित्तस्वरूपतामापन्ना अभिव्यक्ताः शब्दा इत्यभिधीयन्ते। ननु व्यवस्थितावयवेषु घटादिष्ववयवी सामान्याभिव्यक्तिहेतुरस्तु। अनवस्थितावयवास्तु शब्दा इति। तैः क्रमजन्मभिरयुगपत्कालाभिव्यक्तैर्वाऽविद्यमानानेकसमवायिकारणं शब्दान्तरमारब्धुं न शक्यते इति क्व तासां समवायः स्यात्। प्रत्यवयवं परिसमाप्तत्वे वर्णान्तरोच्चारणमनर्थकं स्यादिति चेन्न। उत्क्षेपणभ्रमणादिकर्म्मवदुपपत्तेः। न च तत्र तावदवयवैः कर्म्मान्तरमवयविनि

(१) संबोधे इति पाठान्तरम्।

किञ्चिदारभ्यते। न च तद्व्यतिरेकेणोत्क्षेपणत्वादीनां समवायो नाभ्युपगम्यते। नापि कर्म्मावयवदर्शने तत्प्रत्यय उत्पद्यते। एवं च तत्र यथावयवकर्म्माणि उत्क्षेपणत्वादीनामाधारत्वमपि प्रतिपद्यमानानि न विशिष्टजातिविषयां बुद्धिं जनयन्ति। यदैवावयवसमूहः क्रमेणोपलब्धो भवति तदा तां जनयन्ति तद्वदिहापि। न चात्र शास्त्रान्तरपरिदृष्टा जात्यभिव्यक्तिप्रक्रिया वैयाकरणैः परिगृह्यते। नाप्यभिव्यक्तिमतामभिव्यञ्जकैराश्रितानामेवाभिव्यक्तिर्दृश्यते। प्रदीपे व्यभिचारात्। तत्रासत्यपि शब्दव्यक्तिसमवाये क्रमगृहीतवर्णजसंस्कारसंस्कृते अन्तःकरणे चरमवर्णविज्ञानतः सा गृह्यते। तदस्तित्वे मानं तु शुकाद्युदीरितेषु वृक्षादिशब्देषु स एवायमिति प्रत्यभिज्ञैव। अपरे आकृतिमनङ्गीकुर्वाणा अनेकध्वनिव्यङ्ग्यां नित्यां शब्दव्यक्तिमेव प्रतिजानते। तत्रापि शब्दव्यक्तिगतो वर्णभेदो ऽभ्युपगम्यते कैश्चित्। अन्ये तु प्रतिवर्णं प्रतिपदं प्रतिवाक्यं चैक एव शब्दात्मा क्रमोत्पन्नावयवरूपप्रत्यवभासः प्रकाशते इत्याहुः। परे पुनर्व्यवहारानादित्वेनैषां नित्यत्वं स्वतो ऽनित्यत्वं चेति मन्यन्ते। अर्थानामप्याकृतिनित्यत्वाद् व्यक्तिनित्यत्वाद्वा नित्यतां मन्यन्ते। सम्बन्धोपि नित्यः। स हि नेदंप्रथमतया शक्यः कर्त्तुम् अर्थादेशनस्याशक्यकर्त्तव्यत्वात् किन्त्वौत्पत्तिकः स्वभावसिद्धो ऽनादिः प्राप्ताविच्छेद इति नित्य इत्यर्थः। यथेन्द्रियविषययोः प्रकाश्यप्रकाशकभावस्तथा समयोपाधिस्तादात्म्यरूपा योग्यता शब्दार्थयोः सम्बन्धः। यद्वा शब्दैरर्थानां बुद्धौ कल्पनाद् अर्थबुद्ध्या च तत्प्रतिपादनाय शब्दकल्पनात् कार्य्यकारणभावस्तयोः सम्बन्धः। तदुक्तम्। तेषामुत्पत्तिप्रभृत्याविनाशाद् बुद्धीर्व्यावचाणाः सतो बुद्धिविषयान्प्रकाशयन्ति इति। सूत्रादिप्रणेतृभिर्ऋषिभिराम्नाता इत्यर्थः। सूत्रादीनि च प्रकृतत्वाद् व्याकरणस्यैव। सूत्रारम्भादेव शब्दस्य नित्यत्वमनुमीयते। नह्यनित्यत्वे शब्दानां

शास्त्रारम्भे किञ्चिदपि प्रयोजनमस्ति । किञ्च व्यवहारमात्रमनर्थकं शिष्टाः समनुगन्तुमर्हन्ति । क्रयविक्रयविषयकव्यवहारार्थमपि शास्त्रारम्भापत्तेः । तस्माद् व्यवस्थितसाधुत्वेषु शब्देषु स्मृतिशास्त्रं प्रवृत्तमिति । यद्वा 'तदशिष्यं संज्ञाप्रमाणत्वादि'त्यादिसूत्राणि नित्यत्वं समर्थयन्ते । अनुतन्त्रं वार्त्तिकम् । तत्राप्युक्तम् । 'सिद्धे शब्दार्थसम्बन्ध'-इति । भाष्येप्युक्तम् । 'नित्येषु शब्देषु कूटस्थै'रित्यादि । अथ वा यैः प्रत्यक्षधर्म्मभिः शब्दैः तत्तत्सूत्रानुतन्त्रभाष्यप्रणेतृभिरेव व्याकरणं प्रणीतं तैरेव नित्याः शब्दार्थसम्बन्धा इति चोक्तम् । तेषाञ्च व्यवस्थितं लोके प्रामाण्यमिति ॥ २३ ॥

ननु वाक्यस्यैव लोके प्रयोगान्नित्यत्वमर्थसम्बन्धस्येति प्रकृतिप्रत्ययाद्यन्वाख्यानसफलमत आह ॥

अपोद्धारपदार्था ये ये चार्थाः स्थितलक्षणाः ।
अन्वाख्येयाश्च ये शब्दा ये चापि प्रतिपादकाः ॥२४॥
कार्य्यकारणभावेन योग्यभावेन च स्थिताः ।
धर्म्मे ये प्रत्यये चाङ्गं सम्बन्धाः साध्वसाधुषु ॥ २५ ॥
ते लिङ्गैश्च स्वशब्दैश्च शास्त्रेस्मिन्नुपदर्शिताः ।
स्मृत्यर्थमनुगम्यन्ते केचिदेव यथागमम् ॥ २६ ॥

अपोद्धारपदार्थो नामात्यन्तसंसृष्टानुमानबुद्ध्या परिकल्पितमसंसृष्टरूपं भेदवत् विविक्तस्य हि तस्य वस्तुतो व्यवहारातीतं रूपं, तत्तु प्रत्ययानुसारेण यथागमं भावनाभ्यासवशादुत्प्रेक्षया प्रायेण व्यवस्थाप्यते । तथैव चार्थरूपं कार्यार्थमन्वयव्यतिरेकाभ्यां समुदायादपोद्धृतानां शब्दानामभिधेयत्वेनाश्रीयते । सोयमपोद्धारपदार्थः शास्त्रव्यवहारमनुपतति । शास्त्रव्यवहारं दृष्ट्वैव लौकिका अपि भेदव्यवहारं कुर्वन्ति । स चैकैकपदनिबन्धनः सत्यासत्यभावेनानुपाख्येयः

केवलं वृत्तं इत्युक्तौ क्रियापदं विनार्थनिरूपणाभावात् क्रियाविशेषापेक्षानियमात् । अनुपात्तक्रियेष्वप्यस्तिभवतिपरोस्थ्येव । एवं च तानि एकपदस्वरूपाणि आक्षिप्तक्रियापदानि वाक्यानीति पदानि व्याख्यायन्ते तथा पूर्वपदोत्तरपदार्थः प्रातिपदिकार्थो धात्वर्थः प्रत्ययार्थ इति । एकपदवाच्योयमनियतावधिर्बहुधा प्रविभज्य कैश्चित्कथञ्चिदपोद्ध्रियते । स्थितलक्षणस्तु वाक्यार्थः सत्यामपि विच्छेदप्रतीतावविच्छिन्नत्वेन प्रत्ययविषयः तत्रापोद्धृतपदस्यैवार्थवत्त्वमिति मत्वा 'कृत्तद्धितान्तं चैवार्थवन्न केवलाः कृतस्तद्धिता वेति' भाष्ये उक्तम् । ततो ऽपोद्धृतप्रकृत्यादीनामप्यर्थवत्त्वेन व्यवहारोर्थवत्सूत्रे भाष्ये । अन्वाख्येयाश्चेति । प्रकृतिप्रत्ययादय इत्यर्थः । तत्र केषाञ्चित्पदावधिकमन्वाख्यानं केषाञ्चिद्वाक्यावधिकम् । तत्र पदावधिकेन्वाख्याने सामान्यमात्रे लब्धसंस्काराणि पदानि पदान्तरसम्बन्धप्राप्तिषु विशेषेषु सामान्यलब्धमन्तरङ्गं संस्कारमादायैव प्रवर्त्तन्ते । तत्रैकवचनान्तो नपुंसकलिङ्गश्च शब्दो भिन्नलिङ्गसङ्ख्यैराश्रयैः सम्बन्धं प्रतिपद्यते । तदर्थं 'विशेषणानां चाजाते'रित्यनेन बहिरङ्गे भाविन्याश्रये प्रक्रान्ते गुणवचनानामाश्रयतो लिङ्गवचनान्युच्यन्ते । वाक्यावधिके त्वन्वाख्याने नित्यसंसृष्टस्य गुणाश्रयेणाविवेकात्सामान्यार्थत्वमेव नास्ति । तदुक्तम् स्वाभाविकमेतदिति । तथा प्रत्यवयवं द्वन्द्वपदानां संस्कारे द्वन्द्वे बहुषु लुग्वचनमुपन्यस्तम् । वाक्यसंस्कारमादाय न वा सर्वेषां द्वन्द्वे बह्वर्थत्वादित्युक्तम् । तथा 'विशेषणं विशेष्येण' 'उपमानानि सामान्यवचनै'रित्याद्युक्तम् । प्रतिपादकाः शब्दाः भूतिर्भूपतिरित्यादीनि पदानि वाक्यानि च । ते कार्य्यकारणभावेन अर्थाकारनिर्भासमात्रानुगतप्रत्ययस्यार्थेषु प्रत्यस्तमितरूपस्यार्थत्वेनाध्यवसायात्तस्यार्थात्मनः शब्दो निमित्तम् । तथा बुद्धया गृहीतार्थप्रतिपादनाय शब्दप्रयोगादर्थः शब्दस्य निमित्तम् । कार्य्यकारणयोश्चाभेदाध्यवसाया-

त्सोयमिति प्रतीयमानं तादात्म्यमेव शब्दार्थयोःसम्बन्धः नादाभिव्यक्तस्यान्तःकरणसन्निवेशिनःशब्दस्यार्थबोधने कारणम् । इन्द्रियविषयवच्च प्रकाश्यप्रकाशकभावेन तद्योग्यताग्रहः । एवं विशिष्टानां शब्दानां विशिष्टेष्वर्थेष्वव्यभिचरितप्रसिद्धसाधुभावानां वाचकानां वाच्येषु योग्यत्वम् अप्रसिद्धानां समयोपाधिकम् । तत्र साधोर्येऽर्थेन सम्बन्धः स ज्ञाने शास्त्रपूर्वकप्रयोगे वा धर्म्माभिव्यक्तौ अङ्गत्वं प्रतिपद्यते विशिष्टप्रत्ययोत्पत्तौ च । अपभ्रंशास्तु प्रत्ययमात्रएव । ते लिङ्गैश्चेति । ते अपोद्धारपदार्था अपोद्धृतपदैस्तेषां सम्बन्धाश्च । तत्र शास्त्रव्यवहारार्थेऽपोद्धारे समुदाये संसृष्टायाः कस्याश्चिदर्थमात्राया अपोद्धारे क्रियमाणे तत्तदवधेस्तत्तदर्थकल्पने नानाविधाः पुरुषविकल्पाः। तथाहि। व्यापारेभिधेये णिच् द्योत्ये वा। स्त्रियां टाबादयः स्वार्थवृत्तेः प्रातिपदिकाद्वा । तथा नञ्समासः किंप्रधानइति। तथैकत्वकर्म्मादयो विभक्त्यर्थाः । पञ्चकः प्रातिपदिकार्थः चतुष्कः त्रिक इति । तथा क्रियासाधनकालादयोपि कैश्चित्कांश्चिदभिधेयत्वेन प्रविभक्ताः । तथा भावकर्म्मणोरात्मनेपदम् । कर्त्तरि परस्मैपदमिति। ते केचन सूत्रकारादिभिर्लिङ्गैः केचन स्वशब्देन प्रतिपादिता अपोद्धारकल्पनायां व्यवस्थामाश्रित्य स्वार्थद्रव्यादीनां क्रमिको बोध इति प्रतिपत्तिक्रमानुगममात्रं लक्ष्यसंस्काराय कल्पितम्। नहि शब्दस्य क्रमवती विरम्यविरम्य स्वार्थादिवृत्तिः सम्भवति सकृदुच्चारणात् । नाप्ययं क्रमः श्रोतुरभिधातुर्वा व्यवस्थितः । सर्वार्थकलापस्य पदाद्वा वाक्याद्वा युगपदेव बुद्धिविषयत्वादुत्तरकालं शास्त्रजवासनया प्रविभज्यते । विभक्तस्याप्यनुसन्धानमन्तरेणार्थक्रियाविषयप्रतिभानुत्पत्तेः पुनःपुनः समुदायमेव परामृशति। योप्यभिधाता श्रोता वा विभागेनार्थमात्रासु प्रतिपत्तिं लभते तस्यापि ग्राह्यासु अर्थमात्रासु अनियमेनैव बुद्धिक्रमो व्यवतिष्ठते । तदुक्तम्।

'एकोऽयं शक्तिभेदेन भावात्मा प्रविभज्यते । बुद्धिप्रवृत्त्यनुसारेण बहुधा ज्ञानवादिभि'रिति । स्थितलक्षणस्तु पदार्थो वाक्यार्थो वा । तदुक्तम् । पदस्यार्थे प्रयोगाद्यदत्राधिकं वाक्यार्थः स इति । तत्रापि वाक्यं वाक्यार्थो वा मुख्यः । तदुक्तं सङ्ग्रहे । 'नहि किञ्चित्पदं नाम रूपेण नियतं क्व चित् । पदानामर्थरूपं च वाक्यार्थादेव जायते'इति । किञ्चापोद्धृतस्य पदस्य प्रकृतिप्रत्ययादिविभागोऽनियमो दृश्यते । ऐकागारिकगिरिशश्रोत्रियादिषु । 'अर्थात्पदं साभिधेयं पदाद्वाक्यार्थनिर्णयः । पदसङ्घातजं वाक्यं वर्णसङ्घातजं पद'मित्यभियुक्तैः कार्य्यकारणभावः सम्बन्धो दर्शितः । तथा तेषामुत्पत्तिप्रभृत्याविनाशाद्बुद्धीर्व्याचक्षाणाः सतो बुद्धिविषयान्प्रकाशयन्तीत्यनेन योग्यतापि सम्बन्धो दर्शितः । अभिधानं पुनः स्वाभाविकमिति च भाष्ये उक्तम् । के चिदर्थैर्युज्यन्ते परे नेत्यादि च तत्रोक्तम् । तथाजातीयकाः स्वस्त्वप्याचार्य्येण स्वरितञितः पठिताः । येषां कर्त्रभिप्रायं चाकर्त्रभिप्रायं च क्रियाफलमस्तीति । सङ्ग्रहेप्युक्तम् । 'शब्दार्थयोरसम्भेदे व्यवहारे पृथक्क्रिया । यतः शब्दार्थयोस्तत्त्वमेकं तत्समवस्थितम् ॥ सम्बन्धस्य न कर्त्तास्ति शब्दानां लोकवेदयोः । शब्दैरेव हि शब्दानां सम्बन्धः स्यात्कृतः कथम्'इति । स्मृत्यर्थं स्मृतिप्रणयनाय ये उपदर्शितास्ते लोकैरपि कैश्चित्के चिदेवानुगम्यन्तइत्यर्थः ॥ २६ ॥

नन्वेषा साध्वसाधुव्यवस्था निर्मूलेत्यत आह ॥

शिष्टेभ्य आगमात्सिद्धाः साधवो धर्म्मसाधनम् ।
अर्थप्रत्यायनाभेदे विपरीतास्त्वसाधवः ॥ २७ ॥

यथान्यानि धर्म्माधर्म्मसाधनानि शिष्टमन्वाद्युक्तान्यविगीतानि । एवं साध्वसाधुव्यवस्थापि अविच्छिन्नपारम्पर्या शिष्टस्मृतिमूलागमादेव सिद्धेत्यर्थः । अर्थप्रत्यायकत्वस्य तुल्यत्वेपि शास्त्रानुगता असाधव इत्यर्थः ॥ २७ ॥

ननु व्याकरणनिष्पाद्याः शब्दा इति मते कथमस्या आगममूलकत्वमत आह ॥

नित्यत्वे कृतकत्वे वा तेषामादिर्न विद्यते ।
प्राणिनामिव सा चैषा व्यवस्थानित्यतोच्यते ॥२८॥

ये अभिव्यक्तिवादिनः ये च जन्मवादिनस्तेषां सर्वेषामप्रवृत्तशब्दव्यवहारा प्रथमा कोटिर्विद्यते । यथा ये ईश्वरकालपुरुषाविद्याचेतन्याद्विभक्तत्वात् प्राणिनामुत्पत्तिमाहुः येपि केवलमविद्यामात्रं मन्यन्ते तेषां प्राणिव्यवहारो यथानादिरित्यर्थः । तदुक्तं भाष्ये । 'तदपि नित्यं यस्मिँस्तत्त्वं न विहन्यत'इति ॥ २८ ॥

ननु लोकत एव साध्वसाधुव्यवस्थाज्ञानं भविष्यति किं शास्त्रेणेत्यत आह ॥

नानर्थिकामिमां कश्चिद्
व्यवस्थां कर्तुमर्हति ।
तस्मान्निबध्यते नित्या
साधुत्वविषया स्मृतिः ॥ २९ ॥

को हि सम्भिन्नबुद्धिर्लोके प्रत्यभिनिविष्टः शिष्टो दुर्ज्ञेयं दुरध्येयं दुरनुष्ठेयं च स्वरसंस्कारादिनियमं लौकिकवैदिकानां प्रयोगविषयं व्यवस्थापयितुमुत्सहते । नाप्यनर्थकोयं नियमः । तस्मादनादिर्गुरुपूर्वक्रमागता शिष्टप्रयोगानुमानहेतुर्लक्षणप्रपञ्चाभ्यां व्याकरणस्मृतिर्निबध्यतइत्यर्थः ॥ २९ ॥

ननु तर्केणैवैषा व्यवस्था कार्येत्यत आह ॥

न चागमादृते धर्मस्तर्केण व्यवतिष्ठते ।
ऋषीणामपि यद् ज्ञानं तदप्यागमहेतुकम् ॥३०॥

आगमिनः सर्वे सुदूरमपि गत्वा स्वभावं न व्यतिवर्तन्ते । अदृष्टार्थानां कर्मणां फलनियमे स्वभावज्ञानं न तर्कैः साध्यम् । अनवस्थितसाधर्म्यवैधर्म्येषु नित्यमलब्धनिश्चयेषु पुरुषतर्केष्वनाश्वासाद् इत्यागमसूलक एव धर्माधर्मनिश्चय इत्यर्थः । न च ऋषयो ऽतीन्द्रियद्रष्टारः स्वभावं निर्णयन्ति तद्वचसा चान्ये इति न दोषः । आगमोक्तधर्मसंस्कृतानामेव ऋषित्वेन तज्ज्ञानस्याप्यागमपूर्वकत्वात् ॥ ३० ॥

नह्यागमस्तर्कबाध्य इत्याह ॥

धर्मस्य चाव्यवच्छिन्नाः पन्थानो ये व्यवस्थिताः ।
न ताल्लोँकप्रसिद्धत्वात्कश्चित्तर्केण बाधते ॥ ३१ ॥

आगमाद्धि लोकविरुद्धं तर्कविरुद्धमप्याचरणं प्रतिपद्यन्ते शिष्टाः । तस्मादागमो न तर्कबाध्य इति भावः ॥ ३१ ॥

अनुमानादीनां व्यभिचारमाह ॥

अवस्था देशकालानां भेदाद्भिन्नासु शक्तिषु ।
भावानामनुमानेन प्रसिद्धिरतिदुर्लभा ॥ ३२ ॥

पूर्वं विलक्षणबलत्वादिमतामवस्थान्तरे विपर्ययो दृश्यते । एवं देशभेदादपि, हिमवति जलस्पर्शोऽतिशीतलः । बलाहकाग्निकुण्डादिषु उष्णः । कालादपि,ग्रीष्मे वह्नेरत्युष्णः स्पर्शः न तथा हेमन्ते । एवं च स्वभावो नानुमानाज्ज्ञातुं शक्यः किन्त्वागमादेवेति भावः ॥ ३२ ॥

निर्ज्ञातशक्तेर्द्रव्यस्य तांतामर्थक्रियां प्रति ।
विशिष्टद्रव्यसम्बन्धे सा शक्तिः प्रतिबध्यते ॥ ३३ ॥

यथाग्नेर्दाहकताशक्तिरभ्रपटलादिषु प्रतिबध्यते तथा मन्त्रौषधादिभिरपि । अतोनुमानादीनामव्यापार इत्यर्थः ॥ ३३ ॥

यत्नेनानुमितो ऽप्यर्थः कुशलैरनुमातृभिः ।
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते ॥ ३४ ॥

यथाऽन्यद्रव्यं गुणेभ्यो व्यपदेशात् । तद्यथा, सति विशेषणविशेष्य-भेदे राज्ञा राष्ट्रं विशिष्यते न परिव्राजकेन । तथा चन्दनेन गन्धो न रूपादिभिरिति । केन चिदनुमानेन साधिते अपर आह । विशिष्टो विशिष्टाभिधेयनिबन्धन इति । विशिष्टरूपादिवचनेन चन्दनशब्देन न विशेषणमनर्थकम् । रूपादिभिस्त्वनर्थकमिति । तावतोर्थस्य निर्ज्ञातत्वात् । यथा कस्यायं पुरुष इतिप्रश्ने विशेषान्तरविच्छेदाय राज्ञ इति व्यपदिश्यते न तु निर्ज्ञातत्वात्पुरुषस्येति । अपर आह । यथा पदेन ऋचः समुदायैकदेशभावेपि पदमृचा व्यपदिश्यते न पदेन ऋक्, तद्वदिदमिति । अपर आह । एकत्वाभ्युपगमेनैव चन्दनेन व्यपदेशो गन्धादीनां न रूपादिभिर्व्यपदेश इति । तस्मादागम एव मुख्यं प्रमाणं नानुमानमिति भावः ॥ ३४ ॥

नन्वेवमृषीणामपि ज्ञानस्यानुमानिकत्वेन तत्राप्यविश्वासः स्यादत आह ॥

परेषामसमाख्येयमभ्यासादेव जायते ।
मणिरूप्यादिविज्ञानं तद्विदां नानुमानिकम् ॥३५॥

यथा रूपतर्काणां मणिरूप्यादिविज्ञानमभ्यासादेव जायते परेभ्य आख्यातुं च न शक्नुवन्ति । यथा च षड्जादिस्वरभेदं प्रत्यक्षविषयमपि शास्त्रज्ञानसहकृताभ्यासादेव जायते तथा ऋषीणामपि योगजप्रत्यक्षगम्यमेव नानुमानगम्यमिति न तदप्रमाणमितिभावः ॥ ३५ ॥

प्रत्यक्षमनुमानं च व्यतिक्रम्य व्यवस्थिताः ।
रक्षःपितृपिशाचानां कर्मजा एव सिद्धयः ॥ ३६ ॥

तेषां यत्कुड्यादीनामवयवविभागमन्तरेवान्तर्वेश्मस्थसूक्ष्मविषयकं दर्शनं तददृष्टशक्तिसाधनकमेव नान्यसाधनकं, तद्वदृषीणामपि तपःसम्पाद्यादृष्टनिष्पाद्यमित्यर्थः । प्रत्यक्षं चात्र लौकिकसामग्रीजन्यं वि-

वञ्चितम् ॥ ३६ ॥

तदेवाह ॥

आविर्भूतप्रकाशानामनुपप्लुतचेतसाम् ।
अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते ॥ ३७ ॥

उत्पत्तिपक्षेऽभिव्यक्तिपक्षे वा कथमपदमवस्तु निरात्मकम् अविद्यमानादृष्टशक्ति नावगन्तुं शक्यते । तपसा निर्दग्धदोषा निरावरणख्यातयः शिष्टाः प्रतिबिम्बन्यायेन प्रत्यक्षमिव सङ्क्रान्ताः परिग्रहं पश्यन्तीत्यर्थः ॥ ३७ ॥

नन्वनुमानविरुद्धं तेषां प्रत्यक्षमत आह ॥

अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा ।
ये भावान् वचनं तेषां नानुमानेन बाध्यते ॥ ३८ ॥

अन्तर्याम्यण अनभिव्यक्तं शक्त्यधिष्ठानं शब्दब्रह्म व्यावहारिकादन्येन चक्षुषा मुक्तसंशयमुपलभन्ते तेषां वचनव्यभिचारिणानुमानेनापाकर्तुमशक्यमित्यर्थः ॥ ३८ ॥

तत्र दृष्टान्तभूतं तदीयं लौकिकप्रत्यक्षमाह ॥

यो यस्य स्वमिव ज्ञानं दर्शनं नाभिशङ्कते ।
स्थितं प्रत्यक्षपक्षे तं कथमन्यो निवर्तयेत् ॥ ३९ ॥

आप्तानां ज्ञानं स्वप्रत्यक्षमिव नाभिशङ्कनीयम् । अन्यस्तर्कशरणः ॥ ३९ ॥

लोकान्तरभावीष्टानिष्टमपि आप्तवचनादेव निर्णीयतइत्याह ॥

इदं पुण्यमिदं पाप-
मित्येतस्मिन् पदद्वये ।
आचण्डालं मनुष्याणां

समं (१) शास्त्रप्रयोजनम् ॥ ४० ॥

तस्मादार्षं प्रत्यक्षं च विरोधि अनुमानस्य बाधकमित्यर्थः ॥ ४० ॥

चैतन्यमिव यश्चायमविच्छेदेन वर्तते ।
आगमस्तमुपासीनो हेतुवादैर्न बाध्यते ॥ ४१ ॥

यथा ऽहंममेत्यादिप्रत्ययानुगतं चैतन्यं न केनापि बाध्यते एवं श्रुतिस्मृतिलक्षण आगमः शिष्टपरिगृहीतो भक्ष्याभक्ष्यादिविषयको यस्तमुपासीनः स नानुमानेन ततः प्रच्यावयितुं शक्य इत्यर्थः ॥४१॥

हस्तस्पर्शादिबाधेन (२) विषमेष्वभिधावता ।
अनुमानप्रधानेन विनिपातो न दुर्लभः ॥ ४२ ॥

यथान्धो विषमे गिरिमार्गे चक्षुष्मन्तं नेतारमन्तरेण त्वरया परिपतन् कश्चिदेवमार्गैकदेशं हस्तस्पर्शनावगम्यं समतिक्रान्तस्तत्प्रत्ययादपरमपि तथैव परिपतन्यथापतनं लभते । तद्वदागमचक्षुषा विना तर्कानुपाती केनकेनानुमानेन क्वचिदाहितप्रत्ययो दृष्टफलेषु कर्मस्वागममुत्क्रम्य प्रवर्तमानो महता प्रत्यवायेन संयुज्यतइत्यर्थः ॥ ४२ ॥

तस्मादकृतकं शास्त्रं स्मृतिं वा (३) सनिबन्धनाम् ।
आश्रित्यारभ्यते शिष्टैः शब्दानामनुशासनम् ॥४३॥

अकृतकमनादिपरंपरया आगतत्वात् पुरुषहितोपदेशाय प्रवृत्तमाम्नायं प्रमाणीकृत्य साधुशब्दप्रयोगेषु शिष्टाचरितमविच्छिन्नपारंपर्यं स्मरणसमाचारं परिगृह्य पूर्वर्षीणां स्मृतिशास्त्राणि च समाश्रित्याचार्यैः शब्दानुशासनमारभ्यतइत्यर्थः ॥ ४३ ॥

---

(१) अल्पमिति पाठान्तरम् ।
(२) बन्धेनेति पाठान्तरम् ।
(३) चेति पा० २ ।

तत्र कः शब्द इत्यत आह ॥

द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः ।
एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते ॥ ४४ ॥

उपादीयते येनार्थः स्वरूपेऽध्यारोप्यते तद्भावमिवापन्नः स उपादानशब्दः । तदुक्तं, वाचक उपादानस्वरूपवानिति । उपादेयो वा समुदाय उपादानः । तथाहि । स्वरूपपदार्थकेष्ववयवानामनुपादेयत्वाद्विभागानामप्रतिपत्तिः । एको निमित्तमिति । यदुपाश्रयाः पदादिश्रुतयः प्रत्याय्यमर्थं प्रतिपद्यन्ते तस्य निमित्तं कारणं व्यापारव्यक्तः श्रोत्रानुपाती तत्प्रकाशकत्वेन करणं बोध्यः । अपरः प्रकाश्यः । एवं ह्याह 'अविभक्तो विभक्तेभ्यो जायतेऽर्थस्य वाचकः । शब्दस्तत्रार्थरूपात्मा सम्भेदमुपगच्छती'ति ॥ ४४ ॥

आत्मभेदस्तयोः केचिदस्तीत्याहुः पुराणगाः ।
बुद्धिभेदादभिन्नस्य भेदमेके प्रचक्षते ॥ ४५ ॥

कार्यकारणयोरन्यत्वपक्षे भेदः पक्षान्तरे त्वेकस्यैवात्मनः शब्दप्रविभागरूपपरिग्रहे कृताभ्यवच्छेदान्नानात्वकल्पना ॥ ४५ ॥

इदमेव प्रपञ्चयति ॥

अरणिस्थं यथा ज्योतिः प्रकाशान्तरकारणम् ।
तद्वच्छब्दोपि बुद्धिस्थः श्रुतीनां कारणं पृथक् ॥४६॥

एकत्वपक्षे नानात्वपक्षे वा बीजरूपस्याविहृतस्य ज्योतिषो यथोत्तरेण प्रकाशात्मनाभिज्वलितस्य स्वरूपप्रतिपत्तिकारणत्वं प्रागसंवेद्यं पश्चादुपजायमानं दृश्यते तथैव शब्दभेदभावनाख्यतत्त्वानुगते बुद्धितत्त्वे योयः स्थानकरणाद्यनुगृह्णीतो विवर्तते स व्यञ्जकध्वनिभेदानुपातेन पौर्वापर्यवानुपलभ्यमानः स्वरूपपररूपयोः प्रकाशको भवति ॥ ४६ ॥

वितर्कितः पुरा बुद्ध्या क्व चिदर्थे निवेशितः ।
कारणेभ्यो विवृत्तेन(१) ध्वनिना सोऽनुगृह्यते ॥४७॥

शब्दार्थयोस्तादात्म्यानुपगमे यच्छब्दरूपं यत्रार्थे निवेशं लभते तत्र रूपविपर्यासे तदर्थनिवेशो न दृश्यते । अर्थान्तरे निवेशश्च दृश्यतइतीयं व्यवस्था न स्यात् । तस्माद्बुद्धिकृतमर्थसंसर्गं प्रापित एव क्व चिदर्थविशेषे निवेशितो भवतीत्यर्थः । कारणेभ्य इति । अविक्रियाधर्मकं हि शब्दतत्त्वं ध्वनिधर्मैरनुगृह्यते दीर्घत्वकत्वादिभिरित्यर्थः । क्रमिके ध्वनौ प्रतीयमानेऽभ्रसङ्घातवदुपलभ्यते । प्राप्तविवर्तेन नादात्मना तद्विवर्तानुसारेणाप्राप्तविवर्तमपि विवर्तमानमिव गृह्यतइति वार्थः ॥ ४७ ॥

नादस्य क्रमजातत्वा(२)न्न पूर्वो नापरश्च सः ।
अक्रमः (३) क्रमरूपेण भेदवानिव गृह्यते ॥ ४८ ॥

नादव्यङ्ग्यः स्फोट एकोपि नित्योपि नादाभिव्यक्तिगतक्रमेण सक्रमो भेदवांश्च गृह्यते न स्वतस्तस्य पूर्वत्वपरत्वकृतक्रमो भेदश्च वास्तवोस्ति नित्यत्वैकत्वाभ्यां विरोधात् ॥ ४८ ॥

तत्र दृष्टान्तमाह ॥

प्रतिबिम्बं यथान्यत्र स्थितं तोयक्रियावशात् ।
तत्प्रवृत्तिमिवान्वेति स धर्मः स्फोटनादयोः ॥४९॥

तत्त्वपक्षेऽन्यत्त्वपक्षे वा चन्द्रादिप्रतिबिम्बं यत्राधारे संसृष्टं तत्क्रियावशात्स्वतो निष्क्रियमपि क्रियावदुपलभ्यते । एवं नादस्य ह्रस्वदीर्घप्लुतत्वोदात्तत्वादिभिर्द्रुतादिवृत्तिभिश्च तावानेव स्फोटो

(१) करणेभ्यो निवृत्तेनेति पा० २ ।
(२) क्रमजन्मत्वात् इति पा० २ ।
(३) सक्रम इति पाठान्तरं युक्तम् ।

विचित्रां वृत्तिमनुविधत्तइत्यर्थः ॥ ४९ ॥

आत्मरूपं यथा ज्ञाने ज्ञेयरूपं च दृश्यते ।
अर्थरूपं तथा शब्दे स्वरूपं च प्रकाशते ॥ ५० ॥

यथा ज्ञाने ज्ञेयं घटादिरूपमतीतमनागतं वर्तमानं च गृह्यते । ज्ञानस्वरूपं च स्वप्रकाशत्वात् तद्वच्छब्दोप्यभिधेयतत्त्वस्तद्रूपोपग्राही स्वरूपमपि प्रत्यवभासयति । स तु सन्निहितप्रत्यवभासोपि लोके भुज्यादिक्रियासम्बन्धाद्विशेषणत्वेन भासते । व्याकरणे त्वर्थे कार्यस्य बाधात्तं प्रति विशेष्यत्वेनाश्रीयतइति भावः ॥ ५० ॥

प्रकारान्तरमाह ॥

अखण्डभावमिवापन्नो यः क्रतुःशब्दसंज्ञकः ।
वृत्तिस्तस्य क्रियारूपा भागशो भजते क्रमम् ॥५१॥

सर्वविभागप्रतिसंहारेण बाह्यव्यावहारिकः शब्दोन्तःकरणे मयूराण्डरसवद्विभागोद्ग्राहमात्रामतिक्रामन् लीनस्तिष्ठति । स चैवंभूतः प्रत्यस्तमितभागः प्राप्तविवक्षो वाक्यपदादिविवर्तमुद्गृह्य प्रत्येकमवयवोद्ग्राहेण क्रमशक्तिं प्रतिगृह्णाति । सा चास्योदयप्रत्यस्तमयनिर्ह्रासमात्रा क्रियारूपेणावसीयते ॥ ५१ ॥

शब्दस्य स्वग्राह्यत्वे दृष्टान्तपूर्वकं युक्त्यन्तरमाह ॥

यथैकबुद्धिविषया मूर्तिराक्रियते पटे ।
मूर्त्यन्तरस्य त्रितयमेवं शब्देपि दृश्यते ॥ ५२ ॥

यथा मूर्त्यन्तरस्य पुरुषादेर्मूर्तिरालिखितुमिष्टा क्रमोपलब्धाप्येकबुद्धिविषयत्वं प्राप्ता पटकुड्यादिषु क्रमेणाक्रियते । तथा व्यावहारिको वैखरीरूपः शब्दः क्रमग्राह्योपि प्रतिसंहृतक्रम एकबुद्धिविषयो भूत्वा निरवयवाक्रमरूपेण बुद्धिविषयोऽन्तःकरणे भूत्वाऽन्तःकरणवृत्तिरूपक्रमरूपध्वनिधर्मप्रतिपत्त्या पुनरपि व्यवहारमवतरति ।

एवं चावस्थात्रयावच्छेदाद्ग्राह्यग्राहकभावं नातिवर्त्ततइति ॥ ५२ ॥

तत्रैव युक्त्यन्तरमाह ॥

यथा प्रयोक्तुः प्राग्बुद्धिः शब्देष्वेव प्रवर्तते ।
व्यवसायो ग्रहीतृणामेवं तेष्वेव जायते ॥ ५३ ॥

यथा प्रयोक्ता शब्दविशेषं विषयं प्रतिपादयितुकामः मनःप्रणिधानेन बुद्धिविषयीकरोति । तथा प्रतिपत्तापि शब्दरूपपरिच्छेदाधीनमर्थग्रहणं मन्यमानः शब्दं जानाति । तत्र शब्दः सर्वैः सम्बन्धिभिराश्रितः संसर्गं निर्धारयति । तत्र भावनावशाच्छब्दरूपविशेषणावच्छिन्नमेव प्रत्येति । तस्मात्प्राधान्यमनुभूय सर्वार्थयोनयः सर्वे शब्दाः गुणभावं प्रपद्यन्ते ॥ ५३ ॥

नन्वेवं शब्दस्यापि क्रियान्वयः स्यादत आह ॥

अर्थोपसर्जनीभूतानभिधेयेषु केषु चित् ।
चरितार्थान् परार्थत्वान्न लोकः प्रतिपद्यते ॥ ५४ ॥

यथायं शुक्ल इति शब्दात्सगुणे गुणिनि प्रतीयमाने क्रियाविशेषविषयमुपलक्षणत्वमपि प्रतीयते शुक्लवाससं भोजयेत्यादौ तथा योयो गोशब्दः सोऽयं पिण्ड इत्यभिसम्बन्धेन शब्दविशिष्टार्थप्रतीतावपि क्रियाविशेषं प्रत्युपलक्षणत्वेन चरितार्थं शब्दमभिधेयमिव क्रियासाधनभावेन न लोकः प्रतिपद्यते इत्यर्थः ॥ ५४ ॥

तत्रैव प्रकारान्तरं वदन्नुपसंहरति ॥

ग्राह्यत्वं ग्राहकत्त्वं च द्वे शक्ती तेजसो यथा ।
तथैव सर्व्वशब्दानामेते पृथगव(१)स्थिते ॥ ५५ ॥

यद्यपि घटादयो ग्राह्या एव चक्षुरादीनि ग्राहकाण्येव तथापि तेजो यथा उपलब्धौ विषयीभावमापन्नमेव विषयोपलब्धौ कारणत्वं

(१) पृथगिवेतिपाठान्तरम् ।

प्रतिपद्यते । तथा शब्दोऽपीत्यर्थः । ते चास्य प्रतिपाद्यप्रतिपादकत्वशक्ती नित्यमात्मभूते पृथगिव प्रत्यवभासेते ॥ ५५ ॥

यतश्चैवं तस्मात् ॥

विषयत्वमनापन्नैः शब्दैर्नार्थः प्रतीयते ।
न सत्तयैव तेऽर्थानामगृहीताः प्रकाशकाः ॥ ५६ ॥

यदि शब्दा विशेषणं न स्युस्तदा ते सत्तासम्बन्धमात्रेणोपलब्धा अनुपलब्धाश्च स्वंस्वमर्थं प्रत्याययेयुः न तु प्रत्याययन्ति । उपस्थितौ च स्वोपस्थितेतरपदार्थवत्स्वस्याविशेषणत्वे न किञ्चिन् मानमित्यर्थः ॥ ५६ ॥

अतोऽनिर्ज्ञातरूपत्वात्किमाहेत्यभिधीयते ।
नेन्द्रियाणां प्रकाश्येऽर्थे स्वरूपं गृह्यते तथा ॥ ५७ ॥

शब्दस्वरूपं प्रत्ययाधीनमेवार्थप्रत्यायनं मन्यमाना लौकिकाः प्रयुक्तेष्वपि शब्देष्वप्रतीतेषु तत्प्रतिपत्तये किं भवानाहेत्याहुः । इन्द्रियाणां त्वज्ञातानामेव कारणत्वेनोपस्थित्यभावान्न तद्ग्राह्यविषयोपलब्धौ तानि विशेषणभावं प्राप्नुवन्तीत्यर्थः ॥ ५७ ॥

ननु स्वंरूपमित्यादिविषये अग्नेर्ढगित्यादौ समानानुपूर्वीकयोः सञ्ज्ञासञ्ज्ञिभावो ऽनुपपन्नोऽत आह ॥

भेदेनावगृहीतौ द्वौ शब्दधर्म्मावपोद्धृतौ ।
भेदकार्य्येषु हेतुत्वमविरोधेन गच्छतः ॥ ५८ ॥

धर्म्मपदेनार्थः, यथा व्यपदेशिवद्भावविषयेष्वर्थात्मसु निमित्तभेदाद्बुद्धिप्रकल्पनयाङ्गीकृतभेदेषु लोके शास्त्रे च भेदविषयाणि क्रियन्ते तथा शब्देष्वपि बुद्ध्या परिगृहीतग्राह्यग्राहकशक्त्यपोद्धारे मुख्यार्थविषयाणीव शास्त्रे सञ्ज्ञासञ्ज्ञिसम्बन्धादीनि भेदकार्य्याणि क्रियन्त इत्यर्थः ॥ ५८ ॥

तदेवाह ॥

ह्रस्वादयो यथा शब्दाः

स्वरूपोपनिबन्धनाः ।

आदैच्प्रत्यायितैः शब्दैः

सम्बन्धं यान्ति सञ्ज्ञिभिः ॥ ५९ ॥

स्वरूपरूपार्थेनार्थवन्तः स्वरानुनासिक्यभिन्नैराकारादिभिरादै-च्छब्दप्रत्यायितैर्येन प्रकारेण सम्बन्धमुपयान्ति तेनैव प्रकारेण भे-दाभावेऽपि ॥ ५९ ॥

तदाह ॥

अग्निशब्दस्तथैवा(१)यमग्निशब्दनिबन्धनः ।

अग्निश्रुत्येति सम्बन्धमग्निशब्दाभिधेयया(२) ॥६०॥

काल्पनिकभेदेनेति भावः । अर्थपरस्य सञ्ज्ञिता केवलशब्दस्व-रूपपरस्य सञ्ज्ञात्वमिति तात्पर्य्यम् ॥ ६० ॥

ननूच्चारितस्यैव कार्य्यभाक्त्वमस्त्वित्यत आह ॥

यो य उच्चार्य्यते शब्दो नियतं न स कार्य्यभाक् ।

अन्यप्रत्यायने शक्तिर्न तस्य प्रतिबध्यते ॥ ६१ ॥

कार्य्यभाक्त्वाभाववत् प्रत्यायकत्वमपि न स्यादत उक्तम् अन्यप्र-त्यायने इति । प्रतिबन्धकाभावादिति भावः ॥ ६१ ॥

कार्य्यभाक्त्वाभावे हेतुमाह ॥

उच्चारणपरतन्त्रत्वाद्गुणः कार्य्यैर्न युज्यते ।

तस्मात्तदर्थैः कार्य्याणां सम्बन्धः परिकल्प्यते ॥६२॥

तथैव गामानयेत्यादावर्थतन्त्रा श्रुतिः क्रियासु साधनत्वं न प्रति-

(१) तदर्थ इति पा० २ ।

(२) योरिति पाठान्तरम् ।

पद्यते तथा शब्दार्थिकापि पारार्थ्याविशिष्टत्वात् तस्मात्सर्व्वस्य प्रत्याय्यस्य चक्षुरादिग्राह्यस्य श्रोत्रग्राह्यस्य वा क्रियासु साधनत्वमित्यर्थः ॥ ६२ ॥

नन्वर्थभूतस्याप्यग्निशब्दस्योच्चारणे उच्चारणपरतन्त्रत्वात्कार्य्यैर्योगो न स्यात् । अनुच्चारितेन तु कार्य्यबोधनमशक्यमत आह ॥

सामान्यमाश्रितं यद्यदुपमानोपमेययोः ।
तस्य तस्योपमानेषु धर्म्मोन्यो व्यतिरिच्यते ॥ ६३ ॥

यथा ब्राह्मणइवाधीते चत्रिय इत्युपमेये सूयमाणं सामान्यमध्ययनमुपमानेपि प्रतीयते ब्राह्मणाध्ययनेन तुल्यं चत्रियाध्ययनमित्यादावध्ययनयोस्तत्त्वे सौष्ठवादयो धर्म्माः साधारणत्वेन प्रतीयन्ते । सौष्ठवादीनामप्यध्ययनसम्बन्धिनां तत्त्वे परिनिष्पत्त्यादयो धर्म्मा इति नास्ति तस्य विच्छेदः ॥ ६३ ॥

यथा वा ॥

गुणः प्रकर्षहेतुर्य्यः स्वातन्त्र्येणोपदिश्यते ।
तस्याश्रिताद्गुणादेव प्रकृष्टत्वं प्रतीयते ॥ ६४ ॥

यदिदं तदिति प्राधान्येनोपादीयते तद् द्रव्यम् । न च द्रव्यस्य प्रकर्षापकर्षौ स्त इत्याश्रितैर्भेदहेतुभिः परतन्त्रैः संसर्गिभिर्गुणैः प्रकर्षेण सव्यापारैस्तत्प्रकृष्यते । यथा शुक्लः पट इति शुक्लेन रूपेण सत्यपि परतन्त्रत्वे प्रकर्षं प्रति सव्यापारेण तद्दानप्रकृष्टव्यपाश्रयः प्रकृष्टव्यपदेशं लभते । शुक्लतरं रूपमस्येत्यत्र तु रूपस्य द्रव्यत्वेनोपादानाद्रूपाश्रितनिमित्तात्प्रकृष्टव्यपदेशः । यतो गुणः प्रकर्षहेतुरतो यः पदार्थः स्वातन्त्र्येण द्रव्यरूपेणोपदिश्यते तस्य स्वाश्रितगुणादेव प्रकर्ष इत्यन्वयः । यद्यपि श्वेतादिसमवायित्वैत्याद्येकं तथापि संसर्गिधर्म्मान्तराश्रयपकृष्यापि तस्य भेदः परिकल्प्यते । एवं तावद्वि-

च्छिन्नोऽयं निमित्तान्तरकल्पनामार्गः । ते च धर्म्माः संविज्ञातपदान्तराभावात् भावप्रत्ययैरनिर्द्देश्याः शुक्लादिश्रुत्युपगृहीताः शौक्ल्यवदेव प्रकर्षव्यपदेशहेतवो भवन्ति ॥ ६४ ॥

एवं प्रकृतिपोत्युपसंहरति ॥

तस्याभिधेयभावेन यः शब्दः समवस्थितः ।
तस्याप्युच्चारणे रूपमन्यत्तस्माद्विविच्यते ॥ ६५ ॥

तस्योच्चार्य्यमाणस्य तस्यापि अभिधेयभूतस्यापि यदा निदर्शनार्थमुच्चारणं क्रियते तदा सर्व्वस्यैवोच्चार्य्यमाणस्यैवंधर्म्मत्वात्तस्यापि निबन्धनरूपं स्वरूपान्तरमन्यत्प्रविविच्यते । यथा अग्नेर्ढगित्यस्य विवरणे अग्निशब्दाड्ढग्भवतीत्यादौ । सङ्ग्रहकारस्तु अभिधेयं स्वरूपं नाभिधेयतां प्रतिपद्यते तत्त्वभिधेयमेव गोपिण्डादिवत्तुल्यरूपतया अभिधानतामनापन्नमपि समुच्चार्य्यमाणत्वेनावसीयतइत्याह ॥६५॥

इदानीमभिधेयान्तरस्य प्रविवेकेऽपि अभिधानस्य स्वरूपेणाविवेकं दर्शयति ॥

प्राक् संज्ञिताभिसम्बन्धात्सञ्ज्ञा रूपपदार्थिका ।
षष्ठ्याश्च प्रथमायाश्च निमित्तत्वाय कल्पते ॥ ६६ ॥

उपसर्ज्जनीभूतस्वरूपार्थो हि शब्दोर्थान्तरे वर्त्तते । अतो यावत्सञ्ज्ञा सञ्ज्ञिना सम्बद्धत्वेन न ज्ञाता तावन्न संज्ञिपदार्थकत्वम् । एवं चार्थान्तराभावे ऽर्थवत्त्वाभावेन प्रातिपदिकत्वाभावान्न विभक्तिः स्यात् अतस्स्वरूपेणैवार्थवत्त्वमभ्युपेयमित्यव्यतिरिक्तः सोर्थ इति भावः ॥ ६६ ॥

अथ ते विभक्ती उपपादयति ॥

तत्रार्थवत्त्वात्प्रथमा सञ्ज्ञाशब्दाद्विधीयते ।
अस्येति व्यतिरेकस्य तदर्थादेव जायते ॥ ६७ ॥

बाह्येष्वर्थेष्वसु शब्दानां शास्त्रादिभिः स्वरूपाध्यारोपचिकीर्षया स्वरूपेणार्थवत्त्वात्प्रथमा विधीयते । गौर्वाहीक इतिवत्सोऽयमिति सञ्ज्ञिना शक्त्यवच्छेदलक्षणः सम्बन्धो नियम्यते । अतो न शब्दार्थसम्बन्धनित्यताहानिः । प्रातिपदिकार्थव्यतिरेकविवक्षायां च षष्ठीत्यर्थः । यथोक्त इत्यादौ स्वरूपार्थेनार्थवदुञ्शब्दस्य प्रगृह्यमिति सञ्ज्ञेति हि तदर्थः । एवं ह्याह । अर्थवता व्यपदेशः सोऽयं तस्येति वा इति ॥ ६७ ॥

स्वं रूपमिति सूत्रविषये प्रकारान्तरमाह ॥

स्वं रूपमिति कैश्चित्तु व्यक्तिस्सञ्ज्ञोपदिश्यते ।
व्यक्तौ कार्य्याणि संसृष्टा जातिस्तु प्रतिपद्यते ॥६८॥
सञ्ज्ञिनीं व्यक्तिमिच्छन्ति सूत्रग्राह्यामथापरे ।
जातिप्रत्यायिता व्यक्तिः प्रदेशेषूपतिष्ठते ॥ ६९ ॥

इह केचिद्वृत्तिकाराः पठन्ति स्वं रूपं शब्दस्य प्रत्यायकमिति । अपरे स्वं रूपं शब्दस्य प्रत्याय्यमिति । तदनेन श्लोकद्वयेनोपन्यस्तम् । जातावपि द्वैधं केचिदाहुः । प्रतिनियतस्वरूपभेदा व्यक्तयोऽनन्ताः नह्यसंवेद्यमव्यपदेश्यमविद्यमानं वा व्यक्तीनां स्वरूपं, व्यक्तिरेव हि गौर्न जातिः । गुण एव हि नीलो न नीलत्वम् । जातिर्हि भेदवत्स्वर्थेषु स एवायमिति बुद्धिनिमित्तमिति । अन्ये तु जातौ प्रतिलब्धस्वरूपाः शब्दास्तद्रूपतयैव व्यक्तिमव्यपदेश्यस्वरूपां प्रत्याययन्ति । सर्वत्रैव हि निमित्तान्निमित्तवत्स्वर्थे निमित्तसरूपः प्रत्यय उत्पद्यते । तथा च स्वं रूपमिति जातिरेव कैश्चिद्व्यपदिश्यते । शब्दस्येति । शब्दशब्देन व्यक्तिरुच्यते । केषांचित्तु विपर्य्ययेण व्यपदेशः । एवं च जातेर्व्यक्तिः सञ्ज्ञा व्यक्तेर्वा जातिः, सा च प्रदेशेषूच्चरिता व्यक्तिं कार्य्ययोगेन प्रत्याययति । सा च जातिरसंसृष्टा व्यक्त्या नोच्चरितेति व्यक्ति-

दपि जात्याऽसंसृष्टा प्रयोगविषयं नावतरति । तात्पर्य्येण तु विवक्षा भिद्यते । किञ्चिदत्र प्रधानं किञ्चिन्नान्तरीयकमिति तच्च प्रतिज्ञाभेदमात्रं स्वरूपार्थरूपमात्रासमुदायः शब्दः तदेकदेशाः स्वरूपादयो मात्राः । अस्ति च मात्राभिर्मात्रावतां भेदव्यपदेशः वार्क्षी शाखेति यथा । विस्तरभयात्त्वेतत्सूत्रविषया अन्ये मतभेदा नोदाह्रियन्तइति दिक् ॥ ६९ ॥

येषामेकशब्दत्वं तेषामयं जातिव्यक्तिव्यवहारो न सम्भवतीति वक्तुमाह ॥

कार्य्यत्वे नित्यतायां वा
केचिदेकत्ववादिनः ।
कार्य्यत्वे नित्यतायां वा
केचिन्नानात्ववादिनः ॥ ७० ॥

तत्र नित्यतायां मुख्यमेकत्त्वं कार्य्यत्वे तु उच्चारितस्य वर्णस्य पदस्य वा पुनरुच्चारणे स एवायमित्यव्यभिचारिप्रत्ययाभेद उत्पद्यमान एकत्त्वं प्रकल्पयति । तस्मान्नानात्त्ववादिमते उक्तो जातिव्यक्तिव्यवहार इति भावः ॥ ७० ॥

इदानीं शब्दाभिव्यक्तिप्रक्रियां प्रतिजानीते ॥

पदे भेदेऽपि वर्णानामेकत्त्वं न निवर्त्तते ।
वाक्येषु पदमेकं च भिन्नेष्वप्युपलभ्यते ॥ ७१ ॥
तद्वर्णव्यतिरेकेण पदमन्यन्न विद्यते (१) ।
वाक्यं वर्णपदाभ्यां च व्यतिरिक्तं न किञ्चन ॥ ७२ ॥

परमतमुक्त्वा स्वमतमाह ॥

---

(१) न वर्णव्यतिरेकेण पदमन्यत्र विद्यते इति पा० २ ।

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा इव (१) ।
वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन ॥ ७३ ॥

किन्त्वपोद्धारकल्पनयैव विवेक इति भावः ॥ ७३ ॥

भिन्नं दर्शनमाश्रित्य व्यवहारोऽनुगम्यते ।
तत्र यन्मुख्यमेकेषां तत्रैतेषां विपर्य्ययः ॥ ७४ ॥

पदानि सत्यानीति परे । तत्रैतेषां वैयाकरणानां विपर्य्ययः । तानि असत्यानि वाक्यमेव सत्यमित्यर्थः ॥ ७४ ॥

स्फोटस्याभिन्नकालस्य ध्वनिकालानुपातिनः ।
ग्रहणोपाधिभेदेन वृत्तिभेदं प्रचक्षते ॥ ७५ ॥

स्वभावभेदान्नित्यत्वे ह्रस्वदीर्घप्लुतादिषु ।
प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्य्यते ॥ ७६ ॥

वर्णस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते ।
वृत्तिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते ॥ ७७ ॥

शब्दस्योर्द्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृताः ।
ध्वनयस्समुपोहन्ते स्फोटात्मा तैर्न भिद्यते ॥ ७८ ॥

इन्द्रियस्यैव संस्कारः
शब्दस्यैवोभयस्य वा ।
क्रियते ध्वनिभिर्वादा-
स्त्रयोऽभिव्यक्तिवादिनाम् ॥ ७९ ॥

तत्र केचिन्मन्यन्ते ध्वनिरुत्पद्यमानः श्रोत्रं संस्कुर्वञ्छब्दोपलब्धौ द्वारतां प्रतिपद्यतइति । अन्ये तु मन्यन्ते शब्द एव ध्वनिसंसर्गात्प्रा-

(१) न चेति पा० २ ।

मसंस्कारः श्रोत्रस्य विषयत्वमापद्यते। के चित्तु मन्यन्ते ध्वनिरुभयोरपि श्रोत्रशब्दयोः संस्कारे वर्त्तत इति॥ ७९॥

तत्र दृष्टान्तमाह॥

इन्द्रियस्यैव संस्कारः समाधानाञ्जनादिभिः।
विषयस्य तु संस्कारस्तद्गन्धप्रतिपत्तये॥ ८०॥

समाधानं चित्तस्यैकाग्रता सा अञ्जनादिद्रव्यं च चक्षुरेव संस्करोति विषयानुग्रहे हि तस्यान्यैरपि ग्रहणं प्रसज्येत विशेषाभावात् तथाचापीति केषां चिन्मतम्। पृथिव्या उदकेन संस्कारस्तद्गन्धप्रतिपत्तये दृष्टः न तु घ्राणेन्द्रियस्य तथा सति संस्कृतासंस्कृतेषु प्रतिपत्तिभेदो न स्यात् विशेषाभावात् तथाचापीति अन्येषां मतम्॥ ८०॥

मन्त्यमुपपादयति॥

चक्षुषः प्राप्यकारित्वे तेजसा तु द्वयोरपि।
विषयेन्द्रिययोरिष्टः संस्कारः स क्रमो ध्वनेः॥ ८१॥

तेजसा आलोकेन यथा सन्तमसेऽवस्थितो य आलोकानुगृहीतं घटादिविषयं पश्यति तत्रालोकेन विषयेन्द्रिययोरुभयोरपि संस्कारः क्रियते। इन्द्रियस्यापि संस्कारे प्राप्यकारित्वं हेतुः। न च विषयसंस्कारे मानाभावः। आलोके स्थितस्यान्धकारस्थघटादर्शनात्॥८१॥

तत्र ध्वनिस्फोटयोर्ग्रहणप्रकारमुपपादयति॥

स्फोटरूपाविभागेन ध्वनेर्ग्रहणमिष्यते।
कैश्चिद्ध्वनिरसंवेद्यः स्वतन्त्रोऽन्यैः प्रकाशकः॥ ८२॥

यथा जवाकुसुमरूपानुषक्तमेव स्फटिकादीनां ग्रहणं तथा ध्वनिरूपानुषक्त एव स्फोटस्तदविभागेनोपलभ्यत इति केषां चिन्मतम्। अन्येषां तु यथेन्द्रियगुणा असंवेद्यस्वरूपा एव विषयोपलब्धिहेतवः।

तथा ध्वनिरगृह्यमाण एव शब्दग्रहणे निमित्तं भवति । अन्ये तु दूरत्वदोषात्स्फोटस्वरूपानवधारणे केवलध्वनेरुपलब्धिर्दृष्टेत्याहुः । अपरे तु स्फोटो भासतएव तत्रापि, किं तु दूरत्वदोषादस्फुटः । यथा दूरत्वदोषाद्द्रव्यस्यापचितपरिमाणतया ग्रहणमित्याहुः ॥ ८२ ॥

इदानीं क्रमिकत्वेपि ध्वनीनां पदादिग्रहणमुपपादयति ॥

यथानुवाकः श्लोको वा सोढत्वमुपगच्छति ।
आवृत्त्या न तु स ग्रन्थः प्रत्यावृत्त्या निरूप्यते ॥८३॥

सोढत्वमेकबुद्धिविषयत्वम् । एवं वर्णपदवाक्यविषयाः प्रयत्नविशेषसाध्या ध्वनयो वर्णपदवाक्याख्यान् स्फोटान् पुनःपुनराविर्भावयन्तो बुद्धिष्वध्यारोपयन्ति । क्रमेण तु वर्णग्रहणे सति समुदायाभावादविषयत्वं तेषां बुद्धौ स्यादिति संहितासूत्रभाष्ये स्पष्टम् । न त्वेतावता ऽऽनन्त्यं स्फोटानाम् । यथा वृत्तौ न श्लोकाद्यानन्त्यम् । तदेवाह । न तु प्रत्यावृत्त्या स ग्रन्थः श्लोकसमुदायात्मको भेदेन निरूप्यतइत्यर्थः । तत्रान्त्यध्वनिना सम्यग्बुद्धौ निवेशः । यावच्चानुपगृहीतविशेषं बुद्धावसन्निविष्टं तावदनुपलब्धमेव नहि तेन कश्चिदपि व्यवहारः प्रकल्प्यतइति भावः ॥ ८३ ॥

नन्ववान्तरप्रत्यया यदि स्फोटविषयाः कृतमन्त्येन ध्वनिनेत्यत आह ॥

प्रत्ययैरनुपाख्येयैर्ग्रहणानुगुणैस्तथा ।
ध्वनिप्रकाशिते शब्दे स्वरूपमवधार्यते ॥ ८४ ॥

अनुपाख्येयैरनुपाख्येयाकारैरुपायभूतैः प्रत्ययैस्तद्द्वारा ध्वनिभिः सम्यक्प्रकाशिते शब्दे स्वरूपावग्रहो भवतीत्यर्थः ॥ ८४ ॥

तत्र क्रममाह ॥

नादैराहितबीजायामन्त्येन ध्वनिना सह ।

आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्य्यते ॥ ८५ ॥

नादैर्ध्वनिभिर्बीजं व्यक्तपरिच्छेदानुगुणसंस्कारः ततश्चान्त्यो ध्वनिः पूर्व्वपूर्व्वसंस्कारसहकृतायामावृत्तिलाभप्राप्तयोग्यतापरिपाकायां बुद्धौ शब्दस्वरूपं सन्निवेशयति ॥ ८५ ॥

नन्वान्तरस्य स्फोटस्याखण्डतया मध्येमध्ये वर्णपदावभासोऽसङ्गतः स्यादत आह ॥

असतश्चान्तराले याञ्छब्दानस्तीति मन्यते ।
प्रतिपत्तुरशक्तिस्सा ग्रहणोपाय एव सः ॥ ८६ ॥

इह निर्भागेष्वपि वर्णपदवाक्येषु ध्वनिभिर्व्यक्तेषु वर्णे तावद्वर्णसरूपभागाभिनिवेशिनी बुद्धिर्जायते पदे वर्णरूपभागाभिनिवेशिनी वाक्ये पदरूपभागाभिनिवेशिनी ताभिश्च बुद्धिभिरुपलब्धारो भागभूतानसतः शब्दानन्तराले मध्ये ऽस्तित्वेन मन्यन्ते । सा खलु तेषां प्रतिपत्तॄणामशक्तिः । यतस्तथाभूतोपायसाध्यमेव तेषां शब्ददर्शनमिति भावः ॥ ८६ ॥

नन्वेवं वाक्यानां पदानां च परस्परं भेदो न स्यादत आह ॥

भेदानुकारो ज्ञानस्य वाचश्चोपप्लवो ध्रुवः ।
क्रमोपसृष्टरूपाया ज्ञानं ज्ञेयव्यपाश्रयम् ॥ ८७ ॥

यथा यतो ज्ञानं ज्ञेयव्यपाश्रयमतो ज्ञानस्य भेदानुकारस्तथा क्रमोपसृष्टरूपाया वाच उपप्लवो भेदो ध्रुव इत्यन्वयः । यथा अभिन्नमपि ज्ञानमरूपं नानाज्ञेयरूपोपग्राहित्वाद्भिदरूपतया प्रत्यवभासते घटज्ञानं पटज्ञानमिति । तथा संहृतसर्व्वबीजोऽयमान्तरः शब्दात्मा व्यञ्जकध्वनिभेदक्रमानुकारेणाविर्भावकाले नानेव प्रत्यवभासते । एवं च ब्रह्माख्यं शब्दतत्त्वमेवावाङ्मनसगोचरमन्यदीयरूपभेदोपग्रहेणान्यथान्यथा प्रतीयतइति । एवं ह्याह । 'ज्ञेयेन न विना ज्ञानं

व्यवहारेऽवतिष्ठते । नालब्धक्रमया वाचा कश्चिदर्थोऽभिधीयते' इ-ति ॥ ८७ ॥

ग्रहणोपाय एव स इति उक्तमेवार्थं दृष्टान्तेनोपपादयति ॥

यथाद्यसङ्ख्याग्रहण-
मुपायः प्रतिपत्तये ।
सङ्ख्यान्तराणां भेदेऽपि
तथा शब्दान्तरश्रुतिः ॥ ८८ ॥

यथा । दशशतादिसङ्ख्याप्रतिपित्समानो ऽपेक्षाबुद्धिविषयतया तदुपायभूतानेकत्वादीन् भिन्नकार्याञ्छतादीनामवयवानिव प्रतिपद्यते तथा वाक्यादौ देवदत्तादिशब्दान्तरश्रुतिरुपायभूतापि अवयवत्वेन प्रतिपद्यते ग्रहीतृभिरित्यर्थः ॥ ८८ ॥

इदानीं वाक्यपदादिविषयदेवदत्तादिश्रुतीनां ध्वनिभेदेपि ऐक्यमुपपादयति ॥

प्रत्येकं व्यञ्जका भिन्ना वर्णा वाक्यपदेषु ये ।
तेषामत्यन्तभेदेपि सङ्कीर्णाइव शक्तयः ॥ ८९ ॥

पदवाक्यविषया हि विशिष्टाः प्रयत्नास्तत्प्रेरिताश्च वायवः तत्स्थानाभिघातेन ध्वनीनुत्पादयन्ति अभिव्यञ्जन्ति वेति ते परस्परव्यावृत्तस्वभावा यद्यपि तथापि गोत्वादिजात्युपव्यञ्जकानामिव भ्रमणत्वादिजातिव्यञ्जकानामिव च तेषामुपव्यञ्जकानां दुर्ज्ञानो भेदः कया चित्सामान्यमात्रयानुगतत्वात् । न च सामान्यमात्राणां शक्तिरूपाणामप्याश्रयभेदेन कार्यभेदेन च भेद एव । प्रविभक्तकार्याणामपि शक्तीनां कुतश्चित्कार्यविशेषासङ्करेणैव स्थितिः । एवं च निरवयवेष्वपि वर्णपदवाक्येषु मात्राविभागो वर्णविभागः पदविभागश्च तत्कृत एव काल्पनिको मिथ्येति भावः ॥ ८९ ॥

अमुमेवार्थं दृष्टान्तपूर्वकमुपपादयति ॥

यथैव दर्शनैः पूर्वैर्दूरात्सन्तमसेपि वा ।
अन्यथाकृत्य विषयमन्यथैवाध्यवस्यति ॥ ९० ॥

यथा चक्षुषा दूराद्न्धकारे वा आकृतिमात्रोपलब्धौ वृक्षादीन् हस्त्यादिवत्प्रतिपद्यन्ते। ततः प्रणिधानाद् व्यक्तालोकाच्च क्रमेण पुनर्यथावदुपलभन्ते । यथा च रज्ज्वादीन् पूर्वं सर्पत्वेन प्रतिपद्य ततः प्रणिधानाच्चक्षुषि प्रकृतिस्थे रज्जुत्वेनोपलभन्तइति ॥ ९० ॥

दृष्टान्तं व्युत्पाद्य दार्ष्टान्तिके आह ॥

व्यज्यमाने तथा वाक्ये वाक्याभिव्यक्तिहेतुभिः ।
भागावग्रहरूपेण पूर्वं बुद्धिः प्रवर्तते ॥ ९१ ॥

निर्भागवाक्याद्यभिव्यक्तिविषयैः प्रयत्नविशेषैर्जायमाना ध्वनयः सत्यपि भेदे सामान्यशक्तिसमन्वयशक्तिसमन्वयाद्वर्णपदप्रत्यवभासाव-ग्रहरूपां बुद्धिं पूर्वं प्रवर्तयन्तीत्यर्थः। ततः प्रणिधानादिना वास्तव-मखण्डमेव बुद्धया विषयीकुर्वन्तीति तात्पर्यम्। तादृशप्रणिधानास-मर्थास्त्वस्मदादयः सावयवत्वमेव सत्यतया मन्यन्ते ॥ ९१ ॥

अमुमर्थं दृष्टान्तेनोपपादयति ॥

यथानुपूर्वीनियमो विकारे क्षीरबीजयोः ।
तथैव प्रतिपत्तॄणां नियतो बुद्धिषु क्रमः ॥ ९२ ॥

क्रम आनुपूर्वी । यथा क्षीरं दधिरूपविकारमापद्यमानं मन्द(१)कनिलीनकोत्तरकत्वैरवस्थाविशेषैर्मन्द(२)कत्वादिक्रमानतिक्रमेणैव दधिप्रयोजिकां विकारशक्तिं दर्शयति । यथा च बीजं वटादिरूपतामापाद्यमानमङ्कुरावस्थाक्रमेणैव तद्रूपमापद्यते। तथैषामर्वाग्द-

(१) मण्डेति पा० २ ।
(२) मण्डेति पा० ।

र्शनानां प्रतिपत्तॄणां स्फोटविषयासु बुद्धिषु क्रम इत्यर्थः ॥ ६२ ॥

इयं सरणिः परेषामप्यावश्यकीत्याह ॥

भागवत्स्वपि तेष्वेवं रूपभेदो ध्वनेः क्रमात् ।
निर्भागेष्वप्युपायो वा भागभेदप्रकल्पनम्(१) ॥ ६३ ॥

येपि गौरित्यत्र गकारौकारविसर्गमात्रमेव प्रतिपन्नाः नान्यस्तद्व्यतिरिक्तो वर्णरूपग्रहणोपायग्राह्यो निर्भागः शब्दात्मा विद्यत इति मन्यन्ते नित्यत्वं च शब्दानामवगच्छन्ति तेषामपि क्रमेण वर्णाभिव्यक्तौ पदस्वरूपानवधारणमेव प्रसज्यते । युगपत्सर्वावयवाभिव्यक्तौ तु नदीदीनयोरविशेषप्रसङ्गः । तस्मादभिव्यञ्जकध्वनिक्रमकृतैव भेदप्रतिपत्तिर्वाच्या । पूर्वपूर्ववर्णाभिव्यक्तिस्तूपायोऽन्त्यवर्णप्रत्यक्षकाले समुदायग्रहस्येति वाच्यम् । दृष्टो हि मण्डूकवसासम्बद्धप्रदीपाभिव्यक्तरज्ज्वां सर्पादिप्रतिपत्तिभेदः । एवं च तव पूर्वपूर्ववर्णाभिव्यक्तेरुपायत्ववत् निर्भागशब्दात्मग्रहणोपायो भागभेदकल्पनमित्यर्थः । उपपादितं चैतत् पूर्वमेव ॥ ६३ ॥

मतान्तरमाह ॥

अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता ।
कैश्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ॥ ६४ ॥

आकृतिनित्यत्वाच्छब्दनित्यत्वं व्याचक्षाणाः केचिदुभयतः स्फोटमात्रं निर्दिश्यते रस्युतेर्लश्रुतिरित्येवमादिष्वेओङित्यादिसूत्रस्थभाष्येषु स्फोटशब्देन शब्दाकृतिमाचक्षते । उत्पत्तिमत्यस्तु शब्दव्यक्तयो जातिरूपं स्फोटं द्योतयन्त्यो ध्वनिव्यपदेशं लभन्ते । सा च क्रमोत्पन्नैस्तथैवानुभूतैरनेकवर्णैरन्त्यवर्णप्रत्यक्षकाले पूर्वपूर्ववर्णानुभवजसंस्कारसहकारिणाभिव्यज्यतइति तात्पर्यम् ॥ ६४ ॥

---

(१) प्रकल्पना इति पा० २ ।

सिद्धान्तिसम्मतत्वेन मुख्यत्वं च तस्य दर्शयितुं पुनः पूर्वमतमेवाह ॥

अविकारस्य शब्दस्य निमित्तैर्विकृतो ध्वनिः ।
उपलब्धौ निमित्तत्वमुपयाति प्रकाशवत् ॥ ६५ ॥

अन्ये त्वाकृतिमसहमाना एकमेव शब्दतत्त्वं नित्यं मन्यन्ते । तच्च स्वनिमित्तेभ्यः प्राप्तविकारैर्ध्वनिभिर्ध्वनिष्वनाश्रितमेव प्रकाशन्यायेन व्यञ्जकध्वनिरूपानुषक्तमेवाभिव्यज्यते । यथा प्रकाशेन स्वानुषक्तमेव घटाद्यभिव्यज्यतइत्यर्थः ॥ ६५ ॥

ननु शब्दोऽभिव्यज्यते उत्पद्यते वा । उभयथाप्यनित्य एव । आद्ये अनित्यः शब्दोऽभिव्यङ्ग्यत्वात् घटादिवत् । अनित्यानां हि घटादीनां प्रदीपादिभिरभिव्यक्तिर्दृष्टा । शब्दश्चायं ध्वनिव्यङ्ग्य उच्यते । तस्मादनित्यः । अथ नाभिव्यज्यते तदोत्पद्यतइति प्राप्तमेवमप्यनित्य एवेत्यत आह ॥

न चानित्येष्वभिव्यक्तिर्नियमेन व्यवस्थिता ।
आश्रयैरपि नित्यानां जातीनां व्यक्तिरिष्यते ॥ ६६ ॥

उक्तमनुमानं जातौ व्यभिचारीति भावः ॥ ६६ ॥

ननु ताल्वोष्ठपुटव्यापारेण ध्वनयोऽभिव्यज्यन्ते श्रोत्रदेशइत्ययुक्तम् । समानदेशस्थानामेव घटादीनां तादृशैः प्रदीपादिभिरभिव्यक्तिदर्शनात् । प्रकृते च भिन्नदेशत्वं स्पष्टमेव । एवमेव ध्वनिभिरान्तरशब्दात्मा अभिव्यज्यतइत्यप्ययुक्तम् । शब्दस्यैकदेशस्थत्वात् ध्वनीनां नानादेशत्वात् अतिविप्रकृष्टत्वाच्चेत्यत आह ॥

देशादिभिश्च सम्बन्धो दृष्टः कायवतामिह (१) ।
देशभेदविकल्पेऽपि न भेदो ध्वनिशब्दयोः ॥ ६७ ॥

कायवतां मूर्तानामेव देशैक्यनानादेशत्वव्यवहारो दृष्टः । अमूर्त-

---

(१) मपि इति पा० ।

योस्तु ध्वनिशब्दयोस्तथा व्यवहार एव नास्तीत्यर्थः । सत्यपि तथा व्यवहारे न चतिरित्याह । देशभेदेति । तयोरसौ भेदो न विद्यते । आकाशरूपैकदेशत्वात्तयोः ध्वनिरूपेणान्तरस्यैवाभिव्यञ्जनादित्यर्थः ॥ ६७ ॥

नन्वभिव्यञ्जके प्रदीपादावनियमेन पटघटाद्यभिव्यञ्जकता दृश्यते । ध्वनीनां नियताभिव्यञ्जकता दृश्यते । कादिवर्णाभिव्यक्तिहेतुभिर्नादैर्वर्णान्तरानभिव्यक्तेस्तस्मान्नाभिव्यज्यतइत्यत आह ॥

ग्रहणग्राह्ययोः सिद्धा योग्यता नियता यथा ।
व्यङ्ग्यव्यञ्जकभावेन तथैव स्फोटनादयोः ॥ ६८ ॥

यथा चक्षुःसमवेतं रूपमेव बाह्यरूपाभिव्यक्तौ निमित्तम् । न गुणान्तराणि नापीतराणीन्द्रियाणि नापीन्द्रियान्तरगुणाः नाप्यन्याभिव्यक्तेः तथा प्रकृतेपि नियम इत्यर्थः ॥ ६८ ॥

ननु तुल्येन्द्रियग्राह्येष्वप्ययं नियमो नेति पर्य्यनुयोगआह ॥

सदृशग्रहणानां च गन्धादीनां प्रकाशकम् ।
निमित्तं नियतं लोके प्रतिद्रव्यमवस्थितम् ॥ ६९ ॥

तुल्येन्द्रियग्राह्येष्वप्ययं धर्मो दृश्यते । तद्यथा । शैलेयादीनां द्रव्याणां किञ्चिदेव संयोगि द्रव्यान्तरं कस्य चिदेव द्रव्यस्य गन्धविशेषाभिव्यक्तौ समर्थं भवतीत्यर्थः ॥ ६९ ॥

नन्वेवमपि नाभिव्यज्यते शब्दः । अभिव्यञ्जकानां वृद्धिह्रासस ङ्ख्याभेदेपि अभिव्यङ्ग्यस्य तत्समन्वयाभावात् । यथा प्रदीपस्य वृद्धिह्रासयोर्न घटादीनां तौ नापि प्रदीपसङ्ख्याभेदे घटादीनां सङ्ख्यान्तरयोगः । शब्दस्य त्वभिघातभेदाद्दृश्यते सङ्ख्यापरिमाणभेदोऽत आह ॥

प्रकाशकानां भेदांश्च प्रकाश्योऽर्थोनुवर्तते ।

तैलोदकादिभेदे तत्प्रत्यक्षं प्रतिबिम्बके(१) ॥ १०० ॥

अभिव्यङ्ग्यानामप्यभिव्यञ्जकभेदानुविधानं दृष्टं यथा निम्नेष्वादर्शतलेषु मुख्यप्रतिबिम्बमुन्नतं दृश्यते। उन्नते निम्नं प्रियङ्गुतैले श्यामं च। शस्त्रकाचादिपरिमाणभेदात्प्रतिबिम्बे परिमाणभेदोपि दृष्टः। आदर्शादीनां जलतरङ्गाणां च सङ्ख्याभेदोपि दृष्ट इत्यर्थः ॥ १०० ॥

ननु प्रतिबिम्बमादर्शादिषु चन्द्रादिभ्यो भावान्तरमेव सन्निविष्टमुपलभ्यतइति न तेऽभिव्यञ्जका इत्यत आह ॥

विरुद्धपरिमाणेषु वज्रादर्शतलादिषु।
पर्वतादिसरूपाणां भावानां नास्ति सम्भवः ॥ १०१ ॥

नहि वज्रादिष्वाधारेषु विरुद्धपरिमाणानामन्तःसन्निवेशिनां पर्वतादिसरूपाणां भावानामुत्पत्तिः सम्भवतीत्यर्थः। तस्मात्तेप्यभिव्यञ्जका एवेति भावः ॥ १०१ ॥

नन्वेवं स्फोटस्य पौर्वापर्याभावात्पूर्वपरादिव्यवहारोऽसङ्गतः स्यादू इकोयणचीत्यादौ तथा ह्रस्वदीर्घादिव्यवहारो द्रुतविलम्बितादिव्यवहारश्च न स्यादत आह ॥

तस्मादभिन्नकालेषु वर्णवाक्यपदादिषु।
वृत्तिकालः स्वकालश्च नादभेदाद्विभज्यते ॥ १०२ ॥

नादकृतपौर्वापर्यव्यवहारः प्राकृतध्वनिभेदकृतश्च ह्रस्वदीर्घादिव्यवहारः वैकृतध्वनिकृतस्तु द्रुतमध्यमविलम्बितव्यवहार इत्यर्थः ॥ १०२ ॥

इदानीं नादस्फोटयोः स्वरूपमाह ॥

यः संयोगविभागाभ्यां
करणैरुपजन्यते।
स स्फोटः शब्दजाः शब्दा

(१) भेदेन प्रत्यक्षं प्रतिबिम्बकम् इति पाठान्तरम्।

ध्वनयोऽन्यैरुदाहृताः ॥ १०३ ॥

अनित्यत्वपक्षे स्थानकरणप्राप्तिविभागहेतुकः प्रथमाभिव्यक्तो यः शब्दः स स्फोट इत्युच्यते । तस्य मुख्यः समवायिदेश आकाशः । आकाशस्यापि संयोगिद्रव्यान्तरकृते भेदे सति तन्निमित्तस्तेषां पौर्वापर्यव्यवहारः । ततस्तु सर्वदिक्कास्तद्रूपप्रतिबिम्बावग्राहिणो मन्दप्रदीपप्रकाशितरूपभानक्रमेण प्रभासमाना ये वर्णश्रुतिं विभजन्ति ते ध्वनय इत्युच्यन्ते । नित्यत्वपक्षे तु संयोगविभागजध्वनिव्यङ्ग्यस्फोट इति केषांचिन्मतम् । अन्येषां संयोगविभागफलजध्वनिसम्भूतनादाभिव्यङ्ग्य इति मतम् । तत्र पूर्वावस्थास्ते ह्रस्वदीर्घादिव्यवहारहेतवः यथोत्तरमुपचीयमानाभिव्यक्तयस्तु ध्वनयो नादा वा द्रुतादिवृत्तिभेदव्यवस्थाहेतव इति बोध्यम् ॥ १०३ ॥

इदानीं प्राकृतवैकृतयोर्विशेषं श्लोकद्वयेनाह ॥

अल्पे महति वा शब्दे स्फोटकालो न भिद्यते ।
परस्तु शब्दसन्तानः प्रचयापचयात्मकः ॥ १०४ ॥

देशव्याप्तिसामान्यादल्पत्वमहत्त्वे शब्दस्योपचर्येते लोकप्रसिद्धेर्वा लोकप्रसिद्धिरेव हि सर्वत्र व्यवस्थाकारणं, शब्दोऽत्र ध्वनिः स च द्विविध उत्तरोत्तरशब्दानां कारणरूप आद्यः कार्यरूप उत्तरश्च । तत्राद्यः स्फोटव्यञ्जकः स्फोट एव वा । तस्य कारणरूपस्य कार्यारम्भे शक्तिः सामर्थ्यं निमित्तभेदाद्भिद्यते । यथा भेरीदण्डाभिघातजस्य कार्यपरम्परा दूरमनुपतति । लोहकंसाभिघातजस्तु प्रत्यासन्नदेशं दीर्घकालग्राह्यमविच्छेदेनारभते । तदाह । परस्त्विति । तत्राद्यः प्राकृतः परो वैकृत इति बोध्यम् ॥ १०४ ॥

मतान्तरमाह ॥

दूरात्प्रभेव दीपस्य ध्वनिमात्रं तु लक्ष्यते ।

घण्टादीनां च शब्देषु व्यक्तो भेदः स दृश्यते ॥१०५॥

इह केचिदाचार्या मन्यन्ते । यथा एकैव दीपप्रभा दूराद्दृश्यते तथा प्राकृत एव ध्वनिः सर्वतो दूरव्यापी लक्ष्यते । तत्किं वैकृतो नास्त्येव । अस्तीत्याह । घण्टादीनां चेति । घण्टायामिव सर्ववर्णनिष्पत्तौ प्राकृतवैकृतौ ध्वनिनादौ द्रष्टव्यावित्यर्थः ॥ १०५ ॥

इदानीं तयोः कार्यविशेषमाह ।

द्रव्याभिघातात्प्रचितौ भिन्नौ दीर्घप्लुतावपि ।
कम्पे तूपरते जाता नादा वृत्तेर्विशेषकाः ॥ १०६ ॥

नित्येपि शब्दे नैव शब्दानां प्रचयेन दीर्घप्लुतौ प्रचीयेते किं तु द्रव्याभिघातप्रचयादेव, स्वरूपमेव हि तयोस्तावद्भिरभिघातैर्निष्पाद्यते । तत्र करणानामभिघातविशेषादितरेतरसंसर्गजव्यक्तवाक्प्रस्पन्दनानुगतः कम्पोऽनुवर्तते । तस्मिन्नुपरते ये नादजा नादास्ते द्रुतादिवृत्तिभेदव्यवस्थाहेतवो भवन्तीत्यर्थः ॥ १०६ ॥

मतान्तरमाह ।

अनवस्थितकम्पेऽपि
करणे ध्वनयोपरे ।
स्फोटादेवोपजायन्ते
ज्वाला ज्वालान्तरादिव ॥ १०७ ॥

कम्पे ऽविच्छेदेनानुवर्तमानेपि यो ऽभिघातजः शब्दो नासौ कदाचिदपि अनारब्धकार्यो निवर्तते । तत्र ये कम्पजाः शब्दसमानकाला ध्वनयः स्फोटमभिव्यञ्जयन्तिताननुषङ्गानित्याचक्षते । तेषामपि च प्रत्यनुषङ्गं कार्यपरम्परा यावत्कम्पो न विच्छिद्यते तावत्स्फोटानुग्रहमात्रयानुवर्ततइत्याहुः । अन्ये सा चेयमुत्पत्तिरिन्धनज्वालाप्रबन्धप्रवृत्तिधर्मेणाख्यायते । तद्यथेन्धनाश्रितज्वालाभिर्ज्वालाकार्यस-

न्तानसमुद्भवा ज्वालाः संप्रवर्तन्ते प्रकाशेन चार्थानुपकुर्वन्ति । तथे-यमपि भेदप्रवृत्तिरिति ॥ १०७ ॥

इदानीं शब्दविषये मतभेदानाह ।

वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते ।
कैश्चिद्दर्शनभेदो हि प्रवादेष्वनवस्थितः ॥ १०८ ॥

तत्र वायोः शब्दत्वमुपपादयति ।

लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्तिना ।
स्थानेष्वभिहतो वायुः शब्दत्वं प्रतिपद्यते ॥१०९॥

वक्तुरिच्छेत्यनेन एकस्यैव वायोरनेकरूपशब्दत्वोपपत्तिः ॥ १०९ ॥

ननु कथं वायोः कत्वादिनाभिव्यक्तिरत आह ॥

तस्य कारणसामर्थ्याद्वेगप्रचयधर्मिणः ।
सन्निपाताद्विभज्यन्ते सारवत्योपि मूर्तयः ॥ ११० ॥

सन्निपातात्प्रयत्नविशेषरूपकारणसम्बन्धादित्येवमादि सर्वमनुग-न्तव्यम् ॥ ११० ॥

अणूनां शब्दत्वमुपपादयति ॥

अणवः सर्वशक्तित्वाद्भेदसंसर्गवृत्तयः ।
छायातपतमःशब्दभावेन परिणामिनः ॥ १११ ॥
स्वशक्तौ व्यज्यमानायां प्रयत्नेन समीरिताः ।
अभ्राणीव प्रचीयन्ते शब्दाख्याः परमाणवः ॥११२॥

इत्येवमादि सर्वमनुगन्तव्यम् ॥ ११२ ॥

ज्ञानस्य शब्दत्वमुपपादयति ॥

अथेदमान्तरं ज्ञानं सूक्ष्मवागात्मना स्थितम् (१) ।

---

(१) अथायमान्तरो ज्ञाता सूक्ष्मे रागात्मनि स्थित इति पा० २ ।

व्यक्तये स्वस्य रूपस्य शब्दत्वेन निवर्तते ॥ ११३ ॥
स मनो(१)भावमापद्य तेजसा पाकमागतः ।
वायुमाविशति प्राणमथासौ समुदीर्यते ॥ ११४ ॥
अन्तःकरणतत्त्वस्य वायुराश्रयतां गतः ।
तद्धर्मेण समाविष्टस्तेजसैव विवर्तते ॥ ११५ ॥
विभज्य स्वात्मनो ग्रन्थीन् (२)
श्रुतिरूपैः पृथग्विधैः ।
प्राणो वर्णानभिव्यज्य
वर्णेष्वेवोपलीयते ॥ ११६ ॥

इत्येवमादि सर्वमनुगन्तव्यम् । मतान्तराण्यप्यत्र सन्ति । तथाहि । अन्तर्वर्तिना प्रयत्नेनोर्ध्वमुदीरितः प्राणो वायुस्तेजसानुगृहीतः शब्दतामापद्य शब्दघनसंहन्यमानया प्रकाशमात्रया युक्तस्यान्तःसन्निवेशिनः शब्दस्याविभक्तं बिम्बमुपगृह्णातीत्येकेषां मतम् । नाभिप्रदेशात्प्रयत्नप्रेरितो वायुरूर्ध्वमाक्रमन्नुरःप्रभृतीनि स्थानान्याहन्ति तेन चान्तःस्थितशब्दस्य कत्वादिनाभिव्यक्तिरित्यपरमतम् । आचार्यः खल्वप्याह । 'आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुत'मिति । अपर आह । मनोभिहतः कायाग्निः प्राणमुदीरयति स नाभिरुद्यन्मूर्धन्यभिहतो ऽन्येन पुनरुद्यताभिहन्यमानः ख इति क इति वा ध्वनिः सम्पद्यतइति ॥ ११६ ॥

मतान्तरमाह ॥

---

(१) समता इति पा० २ ।
(२) विभज्य स्वात्मनो मन्थान् इति पा० २ ।

अजस्रवृत्तिर्यः शब्दः सूक्ष्मत्वान्नोपलभ्यते (१) ।
व्यञ्जनाद्वायुरिव स स्वनिमित्तात्प्रतीयते ॥ ११७ ॥

सूक्ष्मो वायुरिव सर्वमूर्तीनामन्तर्बहिश्च ध्वनिरवस्थितः । स एव केश्चिदाकाश इति पठ्यते । तत्र यथा सूक्ष्मस्य वायोर्व्यञ्जनादभिव्यक्तिः तथा सूक्ष्मो ध्वनिः स्वनिमित्तैरभिव्यक्तप्रचितविक्रियारूपः श्रोत्रदेशं प्राप्त उपलभ्यतइत्यर्थः ॥ ११७ ॥

पुनः पचान्तरमाह ॥

तस्य प्राणे च या शक्तिर्या च बुद्धौ व्यवस्थिता ।
विवर्त्तमाना स्थानेषु सैषा भेदं प्रपद्यते ॥ ११८ ॥

शब्दः प्राणाधिष्ठानो बुद्ध्यधिष्ठानश्च द्वाभ्यां प्राणबुद्धिशक्तिभ्यामभिव्यक्तोर्थं प्रत्याययति । तत्र बुद्धितत्त्वान्तरासन्निविष्टः प्राण ऊर्ध्वमभिप्रवृत्तस्तत्तत्स्थानेषु प्रयत्नानुविधाय्याघातेनानित्यशब्दरूपेण विवर्तते स च प्राप्तविवर्तः पृथिवीकललन्यग्रोधादिवद्भेदं प्राप्य परस्मिन् शब्दात्मनि भेदानुरागं संनिवेशयति ॥ ११८ ॥

इदानीं शब्दस्यैव जगन्मूलत्वं प्रपञ्चयति ॥

शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी (२) ।
यन्नेत्रः प्रतिभात्मायं भेदरूपः प्रतीयते ॥ ११९ ॥

सर्वा अप्यर्थजातयः सूक्ष्मरूपेण शब्दाधिष्ठानाः । ताः किलात्माभिव्यक्तिमधिष्ठानपरिणामेन प्रतिलभमाना वाच्यवाचकभावरूपेण भेदेन प्रतीयन्ते । एवं ह्याह । 'वागेवार्थं पश्यति वाग्ब्रवीति वागेवार्थं सन्निहितं सन्तनोति । वाचैव विश्वं बहुरूपं निबद्धं तदेतदेकं प्रविभज्योपभुङ्क्त'इति ॥ ११९ ॥

---

(१) सूक्ष्मत्वेनोपलभ्यते सूक्ष्मत्वान्नोपलभ्यते इति च पा० २ ।
(२) निबन्धनम् । इति पा० २ ।

षड्जादिभेदः शब्देन
व्याख्यातो रूप्यते यतः।
तस्मादर्थविधाः सर्वाः
शब्दमात्राः सुनिश्चिताः ॥१२०॥

संविज्ञातपदनिबन्धनो हि सर्वो ऽर्थः शब्देन निरूप्यमाणो व्यवहारमवतरति। अत एवासंविज्ञातपदानां विशेषावधारणं निबन्धनपदप्रत्ययमन्तरेण न जायते। गोपालादयोऽपि हि निबन्धनपदानि प्रकल्प्य गवादिविशेषविषयं व्यवहारमीहन्ते। तस्मात्सर्वत्र शब्दाध्यारूढो भेदवानर्थः शब्दशक्तिसंसृष्टः शब्दविषयया बुद्ध्या प्रकाश्यत इत्यर्थः ॥ १२० ॥

शब्दस्य (१) परिणामोऽयमित्याम्नायविदो विदुः।
छन्दोभ्य एव प्रथममेतद्विश्वं व्यवर्तत ॥ १२१ ॥

यथैव मृद्धर्मसमन्वयान्मृद्विवर्तं घटं व्यवस्थापयन्ति तथैवाम्नाये सम्भृतभोग्यभोक्तृशक्तेर्वागात्मनो बहुधा करणत्वमाम्नातं सर्वत्र शब्दमात्रासमन्वयात्। तमाम्नायमेवाह। छन्दोभ्य इत्यादि। अन्यत्रापि। 'ऋङ्मयो यजुर्मयः साममयो वैराजः पुरुषो वै यज्ञस्तस्यैता लोकंपृणास्तिस्र आहुतयस्ता वै त्रयो लोका' इति। तथा 'एष वै छन्दस्यः साममयः प्रथमो वैराजः पुरुषो योन्नमसृजत तस्मात्पशवो ऽजायन्त पशुभ्यो वनस्पतयो वनस्पतिभ्यो दिश' इति। ऋग्वर्णोऽपि 'वागेव विश्वा भुवनानि जज्ञे वाच इत्सर्वममृतं यच्च मर्त्यमि'ति। पुराकल्पोप्याह। 'विभज्य बहुधात्मानं सच्छन्दस्यः प्रजापतिः। छन्दोमयीभिर्मात्राभिर्बहुधैव विवेश तम् ॥ शाब्दी वाग्(२) भूयसी येषु पुरुषेषु

(१) छन्दस्य इति पा० २।
(२) साध्वी वा इति पा० २।

व्यवस्थिता । अधिकं वर्त्तते तेषु पुण्यं रूपं प्रजापतेः ॥ प्राजापत्यं महत्तेजस्तत्पात्रैरिव (१) संवृतम् । शरीरभेदे विदुषां स्वां योनिमुपधावति ॥ यदेतन्मण्डलं भास्वद्धाम चित्रस्य राधसः (२) । तद्भावमभिसम्भूय विद्यायां प्रतिलीयते ॥' (३) इति ॥ १२१ ॥

सर्वत्र शब्दमात्रासमन्वयमुपपादयति ।

इतिकर्त्तव्यता लोके सर्वा शब्दव्यपाश्रया ।
यां पूर्वाहितसंस्कारो बालोपि प्रतिपद्यते ॥ १२२॥

सदपि व्यवहारेणानुपगृहीतमसता तुल्यम् । अत्यन्तासच्च लोके शशविषाणादि प्राप्ताविर्भावतिरोभावं च गन्धर्वनगरादि वाचा समुत्थाप्यमानं मुख्यसत्तायुक्तमिव तेषुतेषु कार्येषु प्रत्यवभासते बालानामपि स्वस्वजातिषु पूर्वपूर्वतनशब्दावेशभावनासंस्कारेण यातार्थक्रियायामनाख्येयशब्दनिबन्धना प्रवृत्तिरिति न दोषः ॥ १२२ ॥

युक्त्यन्तरमाह ॥

आद्यः करणविन्यासः प्राणस्योर्ध्वं समीरणम् ।
स्थानानामभिघातश्च न विना शब्दभावनाम् ॥१२३॥

प्रथमोत्पन्नस्य बालस्यायमिन्द्रियविन्यासादि उपदेशाभावेपि ज्ञानसाध्यं जायमानं दृश्यते । तस्मादनादिज्ञानबीजशब्दपरिग्रहा शब्दभावना प्रतिपुरुषमवस्थितेति मन्तव्यम् । अर्थस्मरणस्यापि शब्दोल्लेखेनैव दर्शनात् ॥ १२३ ॥

तदेवाह ॥

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।

---

(१) तस्मात्रैरेवेति पा० २ ।

(२) धाम वित्तस्य राधस इति पा० २ ।

(३) विप्रलभ्यतइति प्रविलीयते इति च पाठान्तरम् ।

अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥ १२४ ॥

का चिदेव सा ज्ञानावस्था सविकल्पकाख्या यस्याभिमुखीभूतशब्दभावनाबीजायामाविर्भूतासु प्रत्यर्थनियतासु अर्थोपग्राहिणीषु शक्तिषु शब्दानुविद्धेन शब्दशक्त्यनुपातिना ज्ञानेनोपगृह्यमाणे वस्त्वात्मा ज्ञानानुगतो व्यक्तरूपप्रत्यवभासो ज्ञायतइत्यभिधीयते तादृश एव च स्मृतिविषयो भवति । अनुभवसमानाकारत्वात्तस्याः । अत एव के चिदाचार्याः सुप्तस्यापि जाग्रद्वृत्त्या सदृशो ज्ञानवृत्तिप्रतिबन्धः केवलं तु शब्दभावनाबीजानि तदा सूक्ष्मां वृत्तिं लभन्ते सा च तामसी अवस्थेत्याहुः । तदेषा ज्ञानावस्था शब्दप्रकृतिविकृतिविकारभावेनाविर्भावतिरोभावावजस्रमनुभवति ॥ १२४ ॥

तदेव पुनरुपपादयति ॥

वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती ।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी ॥१२५॥

यथान्तर्यामिणः प्रकाशत्वस्वरूपं चैतन्यम् । तथा प्रकाशो ज्ञानमपि सर्ववाग्रूपानुगतं, योपि प्रथमनिपाती बाह्येष्वर्थेषु प्रकाशः स विशेषनिमित्तापरिग्रहेपि वस्तुमात्रमिदं तदिति प्रत्यवभासयति । स्मृतिकालेपि च तादृशानामुपलब्धिबीजानामाभिमुख्ये स्मर्तव्याः श्लोकादयः कोप्यसावनुवाकः श्लोको वेति बुद्धौ विपरिवर्तते । वाग्रूपतायां च सत्यामुत्पन्नोपि प्रकाशो विशेषवाग्रूपमस्वीकुर्वन् प्रकाशक्रियासाधनतायां न व्यवतिष्ठते । सा हि वाग्रूपता हि प्रत्यवमर्शः सविकल्पकज्ञानं तत्संपादिकेत्यर्थः । तदेव च प्रकाशनक्रियासाधनमित्यर्थः ॥ १२५ ॥

पुनरपि सर्वस्य वाग्रूपत्वे बीजमाह ॥

सा सर्वविद्या शिल्पानां कलानां चोपबन्धनी ।

तद्वशादभिनिष्पत्तौ (१) सर्वं वस्तु विभज्यते ॥१२६॥

विद्याशिल्पकलादिभिर्लौकिकेषु वैदिकेषु वार्थेषु मनुष्याणां प्रायेण व्यवहारः प्रतिबद्धः मनुष्याधीनाश्चेतरस्य भूतग्रामस्य स्थावरजङ्गमस्य प्रवृत्तयः विद्यादयश्च वाग्रूपायां बुद्धौ निबद्धाः । घटादीनां चाभिनिष्पादने प्रयोज्यप्रयोजकानामुपदेशसमीहादि वाग्रूपतानुसारेणैव प्रकल्प्यते । अभिनिष्पन्नवस्तूनां समानाकाराणां विभागोपि वाक्कृत एवेत्यर्थः ॥ १२६ ॥

सैषा संसारिणां सञ्ज्ञा बहिरन्तश्च वर्तते ।
तन्मात्रामव्यतिक्रान्ते चैतन्यं सर्वजन्तुषु (२) ॥१२७॥

योयं चैतन्ये वाग्रूपतानुगमस्तेन लोके ससञ्ज्ञो विसञ्ज्ञ इति च व्यपदेशः क्रियतइत्यर्थः ॥ १२७ ॥

अर्थक्रियासु वाक् सर्वां
समीहयति देहिनः ।
तदुत्क्रान्तौ विसञ्ज्ञोयं (३)
दृश्यते काष्ठकुड्यवत् ॥ १२८ ॥

सुखदुःखसंविन्मात्ररूपान्तःसञ्ज्ञापि यावद्वाग्रूपतानुवृत्तिस्तावदेव भवति । बहिःसञ्ज्ञा लोकव्यवहारः सोपि वागधीन एव तदभावे विसञ्ज्ञत्वं व्यवहरन्ति । नहि वाक् चैतन्यानाविष्टा सञ्ज्ञास्ति यतश्चितिक्रियारूपमलब्धवाक्शक्तिपरिग्रहं विद्यतइति वाग्रूपत्वमेव चितिक्रियारूपमित्येके । एवं ह्याह । 'भेदोद्ग्राहविवर्तेन लब्धाकारपरिग्रहा । आम्नाता सर्वविद्यासु वागेव प्रकृतिः परा ॥ एकत्वमभिनि-

---

(१) तद्वशादभिनिष्पन्नमिति पाठान्तरम् ।
(२) तन्मात्रामप्यतिक्रान्तं चैतन्यं सर्वजातिषु इति पा० २ ।
(३) तदुत्क्रान्तौ विसंज्ञेयमिति पाठान्तरम् ।

प्क्रान्ता वाङ्नेत्रा वाङ्निबन्धनाः । पृथग्वदवभासन्ते (१) वाग्विभागा गवादयः । षड्द्वारां षडधिष्ठानां षट्प्रबोधां षडव्ययाम् । ते मृत्युमतिवर्तन्ते ये वै वाचमुपासतइति ॥ १२८ ॥

प्रविभागे यथा कर्ता तथा कार्ये प्रवर्तते ।
अविभागे तथा सैव कार्यत्वेनावतिष्ठते ॥ १२९ ॥

प्रविभक्तसाध्यसाधनभावरूपो हि शब्दब्रह्मणो विवर्तः। प्राप्तजन्मादिक्रिया वाक् यतो जागरणाजागरणयोर्वृत्तिकाले वाग्रूपतामनुगच्छति चैतन्यं निर्वृत्तिक्रियाप्राप्तिभिश्च कार्य्येषु प्रवर्तते। स्वरूपाविभागे तु सैव वाक् बाह्यवस्तुस्वरूपतया निर्वृत्तिविक्रियाप्राप्तिषु कर्मभावं प्रपद्यतइत्यर्थः। एवं ह्याह । प्रविभज्यात्मनात्मानं (२)सृष्ट्वा भावान् पृथग्विधान् । सर्वेश्वरः सर्वमयः स्वप्ने भोक्ता प्रवर्ततइति ॥१२९॥

पुनरपि शब्दस्यैव जगत्कारणत्वमुपपादयति ॥

स्वमात्रा परमात्रा वा श्रुत्या प्रक्रम्यते यथा (३) ।
तथैव रूढतामेति तथा ह्यर्थो विधीयते ॥ १३० ॥

सर्व्वो हि विकार आत्ममात्रेति केषां चिद्दर्शनम्। स च प्रतिपुरुषमन्तःसन्निविष्टो बाह्यइव प्रत्यवभासते वस्तुतस्तस्यैकत्वादमूर्तत्वादरूपत्वाच्च व्यवहारमात्रमिदमन्तर्बहिरिति अपरेषां मतम् । एकस्य चितितत्त्वस्यायं परिणाम इत्यादिस्वमात्रावादिनां दर्शनम्। चैतन्यं भूतयोनितिलच्चोदरसवत्प्रविभज्यतइत्येकेषां मतम् । अन्येषान्तु दर्शनं यथा महतोग्नेर्विस्फुलिङ्गाः सूक्ष्मा वायोरभ्रसंघातश्चन्द्रकान्ताद्विभागिन्यस्तोयधाराः पृथिव्या वासावारोहप्रसवान्ययोधा इत्येवमादिपरमात्रावादिनान्दर्शनं विद्याभाष्येभ्यः प्रतिपत्तव्यम् । ए-

(१) पृथग्वदेव भासन्त इति पा० २ ।
(२) अविभज्यात्मनात्मानमिति पा० २ ।
(३) श्रुत्वा प्रक्रम्यते यथा इति पा० २ ।

७

वभूत: सर्वोऽपि प्रपञ्च: यथा श्रुत्या प्रक्रम्यते । श्रुत्यान्त:सन्निवेशिना शब्देन सुखदु:खादिभावेन प्राणिषु बहुधा प्रक्रम्यते दर्श्यते स तथैव तत्र शब्दे रूढतामेति । अत एव तया श्रुत्यार्थो विधीयते निश्चीयते न सङ्कीर्यतइत्यर्थः ॥ १३० ॥

तदेवोपपादयति ॥

अत्यन्तमतथाभूते निमित्ते श्रुत्यपाश्रयात् ।
दृश्यते ऽलातचक्रादौ वस्त्वाकारनिरूपणा ॥ १३१ ॥

श्रुतौ सर्व्वमर्थस्वरूपं संनिविष्टं यत: सा तमर्थं जनयतीव स हि तस्यां प्रत्याय्यात्मना नित्यमवस्थित: । नहि बाह्यं वस्तुगतं सत्त्वं श्रुतिरपेक्षते । यथा सर्वप्रदेशव्यापिक्रियायां शब्दभावनानुगतायामलातचक्रादिश्रुतिरवतिष्ठमाना व्यावहारिकाणां तेषां शब्दानां स्वानुगतार्थेनार्थवत्तां प्रकल्पयति । तथा च श्रुत्या कल्पितो वस्त्वाकार: सत्यप्यनुमानबलीयस्त्वे रूढो भवति । अत्यन्तासत्सु च शशविषाणादिषु श्रुतिरेवार्थं नयति प्रत्यक्षविरोधेपि । एवं च सर्वत्र प्रत्यक्षसिद्धे ऽत्यन्तासिद्धे वार्थे बोधोपयोगिशब्द एव कारणमिति तात्पर्यम् ॥ १३१ ॥

अन्तर्यामिण एव शब्दत्वे युक्त्यन्तरमाह ॥

अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम् ।
प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते (१) ॥ १३२ ॥

इह द्वौ शब्दात्मानौ कार्यो नित्यश्च तत्राद्यो व्यावहारिक: पुरुषस्य वागात्मन: प्रतिबिम्बोपग्राही अन्यस्तु सर्वव्यवहारयोनि: संहृतक्रम: सर्वेषामन्त:संनिवेशी प्रभवो विकाराणामाश्रय: । सर्वकर्मणामधिष्ठानं सुखदु:खयो: सर्वत्राप्रतिहितकार्यशक्ति: परिगृहीतभोगक्षेत्रावधि: सर्वमूर्तीनामपरिणामा प्रकृति: बोधरूपतया नित्य-

(१) सायुज्यमश्नुतइति पा० २ ।

प्रवृत्तप्रत्यवभासप्रवृत्तिनिवृत्तिपदाभ्यां पर्जन्यवदग्निवच्च प्रसवोच्छेद-शक्तियुक्तः सर्वेश्वरः सर्वशक्तिर्महान् शब्दवृषभस्तस्मिन् खलु वाग्योग-विदो विच्छिद्याहङ्कारग्रन्थीनत्यन्तं संसृज्यन्ते । आह च । 'चत्वारि शृङ्गा त्रयो अस्य पादा' इत्यादिऋग्वर्णः ॥ १३२ ॥

तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः ।
तस्य प्रवृत्तितत्त्वज्ञस्तद्ब्रह्मामृतमश्नुते ॥ १३३ ॥

व्यवस्थितसाधुभावे हि शब्दतत्त्वे संस्क्रियमाणे ऽपभ्रंशापगमादाविर्भूते धर्मविशेषे नियतोऽभ्युदयः । तदभ्यासाच्च शब्दपूर्वकं योगमधिगम्य प्रतिभातत्त्वप्रभवां भावविकारप्रकृतिसत्तां साध्यसाधनशक्तियुक्तां सम्यगवबुध्य नियतं क्षेममाप्नोतीत्यर्थः । आह च । 'प्राणवृत्तिमतिक्रान्ते वाचस्तत्त्वे व्यवस्थितः । क्रमसंहारयोगेन संहृत्यात्मानमात्मनि ॥ वाचः संस्कारमाधाय वाचः स्थाने निवेश्य च (१) । विभज्य बन्धनान्यस्याः कृत्वा तां छिन्नबन्धनाम् ॥ ज्योतिरान्तरमासाद्य छिन्नग्रन्थिपरिग्रहम् । परेण ज्योतिषैकत्वं (२) छित्त्वा ग्रन्थीन्प्रपद्यत (३)' इति ॥ १३३ ॥

न जात्वकर्तृकं कश्चिदा(४)गमं प्रतिपद्यते ।
बीजं सर्वागमापाये(५) त्रय्येवादौ व्यवस्थिता ॥१३४॥

अनेन सर्वागमानां प्रवाहानादित्वं व्यवस्थापयति । सर्वप्रवादेष्वागमवाक्यानां स्मृतिवाक्यानां प्रणेतृपरिग्रहेण पौरुषेयत्वमुपगम्यते । वेदवाक्यान्येव त्वपौरुषेयाणि । तानि पूर्वागमेषु विच्छिन्नेषु अ-

---

(१) वाचं ज्ञाने निवेश्य चेति पा० २ ।
(२) कारणज्योतिषैकत्वमिति पा० २ ।
(३) प्रवर्त्तत इति पा० २ ।
(४) न जात्वकर्तृकं कश्चिदिति पा० २ ।
(५) सर्वागमोपाये इति पा० २ ।

न्येषु प्रणेतृषु आगमान्तरानुसंधाने बीजवदवतिष्ठन्ते । तान्येव बीजान्यासाद्य पुनः प्रणेतृभिरागमा निबध्यन्तइति प्रवाहानादित्वं सिद्धमिति नागमा अप्रमाणमिति भावः ॥ १३४ ॥

तमेवार्थं युक्त्यन्तरेण साधयति ॥

अस्तं यातेषु वादेषु कर्तृष्वन्येष्वसत्स्वपि ।
श्रुतिस्मृतिगतं धर्म्मं लोको न व्यतिवर्त्तते ॥ १३५ ॥

इह प्रणेतृवदागमानामपि प्रवादेषु विच्छेदो नावगम्यते । तेषु प्रत्यस्तमितेषु यावदन्ये प्रणेतारो नोत्पद्यन्ते आगमान्तराणि च न प्रतायन्ते । तत्राप्यन्तरा श्रुतिविहितानि कर्माणि स्मृतिनिबन्धनांश्च भक्ष्यादिनियमान्नातिक्रामन्ति शिष्टा इत्यर्थः ॥ १३५ ॥

ज्ञाने स्वाभाविके नार्थः (१)
शास्त्रैः कश्चन विद्यते ।
धर्मो ज्ञानस्य हेतुश्चे-
त्तत्राम्नायो (२) निबन्धनम् ॥ १३६ ॥

अनुपदेश्यं हि ज्ञानं कस्य चिदभ्युपगच्छतामहितप्रतिषेधार्थानां हितप्रतिपादनार्थानां चोपदेशशास्त्राणां वैयर्थ्यं प्रसज्येत । यदि तु धर्मविशेषात्कस्य चिदेवोपदेशमन्तरापि ज्ञानमुत्पद्यते कस्य चित्त्वतादृशस्य शास्त्रेण तथापि तस्य धर्मस्य व्यवस्थितेन निबन्धनेन भवितव्यम् । विच्छिद्यन्ते चान्यानि निबन्धनानि । तस्मादाम्नायनिबन्धनं धर्ममासेवमानाः पृथक् प्रवादानाम्प्रणेतारस्तांतां बहुविकल्पां सिद्धिं लभन्तइत्येष्टव्यमिति भावः ॥ १३६ ॥

ननु तर्क एव ज्ञानसाधनमस्त्वत आह ॥

---

(१) स्वाभाविके कोर्थे इति पा० २ ।
(२) तस्य स्तेय इति पा० २ ।

वेदशास्त्राविरोधी च तर्कश्चक्षुरपश्यताम् ।
रूपमात्राद्धि वाक्यार्थः केवलान्नावतिष्ठते ॥१३७॥

एवं चागमाविरोधी तर्क एव प्रमाणम् । अतर्कश्चागमो विफल इति भावः ॥ १३७ ॥

तदेवोपपादयति ॥

यतो विवक्षा पारार्थ्यं (१) व्यक्तिरर्थस्य लैङ्गिकी (२) ।
इति न्यायो बहुविधस्तर्केण प्रविभज्यते ॥ १३८ ॥

'कर्तुरीप्सिततमं कर्म' 'तस्यापत्यं' 'ग्रहं सम्मार्ष्टि' 'कर्मणा यमभिप्रैति' इत्यादौ लिङ्गसङ्ख्याकालानामविवक्षा क्व चित् क्व चिच्च विवक्षेति लक्षणव्यवस्था तर्काधीना । पारार्थ्यं यथा 'नक्षत्रं दृष्ट्वा वाचं विसृजेदि'त्यादौ कालोपलक्षणार्थं नक्षत्रग्रहणम् । अतः सत्यपि दिवा नक्षत्रदर्शने न सा विसृज्यते । यथा वा काकेभ्यो दधि रक्ष्यतामित्यादौ उपघातप्रतिषेधस्य चिकीर्षितत्वात्काकेष्वसत्स्वपि श्वभ्यो रक्ष्यते । यथा वा पात्राणि सम्मृज्यन्तामिति भुजिक्रियाङ्गोपसंहारपरत्वात्पात्राभावेप्यङ्गान्तराण्युपसंक्रियन्ते । लैङ्गिकी खल्वपि व्यक्तिः । अक्ताः शर्करा उपदधातीति सर्वाञ्जनद्रव्यप्रसङ्गे तेजो वै घृतमिति लिङ्गाद्विशेषप्रतिपत्तिरिति । एवञ्च तर्काधीना शास्त्रव्यवस्थेत्यर्थः ॥ १३८ ॥

शब्दानामेव सा शक्तिस्तर्को यः (३) पुरुषाश्रयः ।
स शब्दानुगतो न्यायो ऽनागमेष्वनिबन्धनः ॥१३९॥

शब्दसामर्थ्यमेवानुगच्छन्तो वक्तारो ऽविवक्षादौ वर्तन्ते । नियता-

(१) वागर्थेति पा० २ ।
(२) लौकिकीति पा० २ ।
(३) तत्कार्य इति पा० २ ।

न्तु शब्दशक्तिमर्थप्रकरणलिङ्गवाक्यादिभिरनुगच्छन्ति । शब्दाश्रितमेव सामर्थ्यं पुरुषाश्रयो ऽयं तर्क इति मन्यन्ते । शब्दशक्तिरूपापरिगृहीतस्तु साधर्म्यवैधर्म्यमात्रानुसारी सर्वागमोपघातहेतुत्वादनिबन्धनः शुष्कतर्क इत्युच्यते । यथा । 'यदुदुम्बरवर्णानाङ्घटीनाम्मण्डलम्महत् । पीतं न गमयेत्स्वर्गं किन्तत् क्रतुगतं नयेदि'ति ॥ १३९ ॥

रूपादयो यथा दृष्टाः प्रत्यर्थं यतशक्तयः (१) ।
शब्दास्तथैव दृश्यन्ते विषापहरणादिषु ॥ १४० ॥

इहैषां रूपरसगन्धस्पर्शानाम्प्रत्येकं समुदितानाञ्च दृष्टादृष्टफलाः प्रत्यर्थनियतशक्तयो दृश्यन्ते । दृष्टफलास्तावत् विषौषध्ययस्कान्तप्रभृतीनाम् अदृष्टफलास्तीर्थोदकादीनां शब्दानाञ्च विषापहरणादि दृष्टं फलमुपलभ्यते । तथा सूक्तादीनामभ्यासादभ्युपगम्यते विशिष्टमदृष्टम्फलं शास्त्रज्ञानपूर्वके प्रयोगे ऽभ्युदय इत्यागमादेव प्रतिपन्नम् । उपोद्घलकमात्रं त्विदमुक्तम् ॥ १४० ॥

यथैषान्तत्र सामर्थ्यं
धर्मेप्येवम्प्रतीयते (२) ।
साधूनां साधुभिस्तस्मात्
वाच्यमभ्युदयार्थिभिः (३) ॥ १४१ ॥

सन्ति च दृष्टफलाः काश्चिच्छब्दशक्तय इत्यागमात्प्रतीतम् एवमागमादेव साधूनामाश्रीयतान्धर्मसाधनत्वम् । अत आगमादेवाभ्युदयार्थिभिः साधव एव प्रयोक्तव्या इति सिद्धम् ॥ १४१ ॥

ननु विषापहरणादिषु सामर्थ्यवद्धर्मेपि कस्मान्न प्रतीयते किञ्चा-

---

(२) प्रत्यर्थयतशक्तय इति पा० २ ।
(३) प्रतीयताम् इति पा० २ ।
(४) वाच्यमभ्युदयार्थिनामिति पा० २ ।

स्मादेव दृष्टान्तादस्तु शब्दविपर्य्ययप्रतिपत्तिरत आह ॥

सर्वा दृष्टफलानर्थानागमात्प्रतिपद्यते ।
विपरीतञ्च सर्वत्र शक्यते वक्तुमागमे (१) ॥ १४२ ॥

सर्वेष्वागमेषु अदृष्टफलासु प्रतिपत्तिषु विपरीतफलप्राप्तिः शक्यते वक्तुम् । तस्मादागमम्प्रमाणीकृत्य का चिद्युक्तिरुच्यमाना उपोद्बलकत्वं लभतइति तात्पर्यम् ॥ १४२ ॥

किमेतावता प्रकृते समागतमत आह ॥

साधुत्वज्ञानविषया
सैषा व्याकरणस्मृतिः ।
अविच्छेदेन शिष्टाना-
मिदं स्मृतिनिबन्धनम् (२) ॥ १४३ ॥

यथैव भक्ष्याभक्ष्यगम्यागम्यवाच्यावाच्यविषया व्यवस्थिताः स्मृतयस्तासु निबद्धं समाचारं शिष्टा न व्यतिक्रामन्ति । तथेयमपि वाच्यावाच्यविशेषविषया व्याकरणस्मृतिः । स्मृतौ ह्यर्थः पारम्पर्य्यादविच्छेदेन पुनःपुनर्निबध्यतइत्यनादिरागममूला चेयमपि स्मृतिः स्मृत्यन्तरवदत्यादरणीयेति तात्पर्यम् ॥ १४३ ॥

व्याकरणमेव स्तौति ॥

वैखर्य्या मध्यमायाश्च
पश्यन्त्याश्चैतदद्भुतम् ।
अनेकतीर्थभेदाया-
स्त्रय्या वाचः परं पदम् (३) ॥ १४४ ॥

---

(१) वक्तुमागतइति पा० २ ।
(२) व्याकरणं धनमिति पा० २ ।
(३) अनेकतीर्थभेदायास्त्रयीवाचः परम्पदमिति पा० २ ।

यस्याः श्रोत्रविषयत्वेन प्रतिनियतं श्रुतिरूपं सा वैखरी श्लिष्टव्यक्तवर्णसमुच्चारणप्रसिद्धसाधुभावा भ्रष्टसंस्कारा च दुन्दुभिवेणुवीणादिशब्दरूपा चेत्यपरिमितभेदा। मध्यमा त्वन्तःसन्निवेशिनी परिगृहीतक्रमेव बुद्धिमात्रोपादाना सूक्ष्मा प्राणवृत्त्यनुगता प्रतिसंहृतक्रमा सत्यप्यभेदे समाविष्टक्रमशक्तिः। पश्यन्ती तु सा चलाचलाप्रतिबद्धसमाधाना सन्निविष्टज्ञेयाकारा प्रतिलीनाकारा निराकारा च परिच्छिन्नार्थप्रत्यवभासा संसृष्टार्थप्रत्यवभासा च प्रशान्तसर्वार्थप्रत्यवभासा चेत्यपरिमितभेदा। तत्र व्यावहारिकीषु सर्वासु वागवस्थासु व्यवस्थितसाध्वसाधुप्रविभागा पुरुषसंस्कारहेतुः परन्तु पश्यन्त्या रूपमनपभ्रंशमसङ्कीर्णं लोकव्यवहारातीतम्। तस्या एव वाचो व्याकरणेन साधुत्वज्ञानलभ्येन शब्दपूर्वेण योगेनाधिगम इत्येकेषामागमः। तदुक्तमितिहासे आश्वमेधिके पर्वणि ब्राह्मणगीतासु। 'गौरिव प्रचरत्येका रसमुत्तमशालिनी। दिव्यादिव्येन रूपेण भारती गौः शुचिस्मिता॥ एतयोरन्तरम्पश्य सूक्ष्मयोः स्यन्दमानयोः। प्राणापानान्तरे नित्यमेका सर्वस्य तिष्ठति॥ अन्या त्वपरिमाणेव(१) विना प्राणेन वर्त्तते। जायते हि ततः प्राणो वाचमाप्याययन्पुनः॥ प्राणेनाप्यायिता सैव व्यवहारनिबन्धनम् (२)। सर्व्वस्योच्छ्वाससमासाद्य न वाग्वदति कर्हि चित्॥ घोषिणी (३) जातनिर्घोषा अघोषा च प्रवर्तते। तयोरपि च घोषिण्या निर्घोषैव गरीयसी'ति॥ पुनश्चाह। 'स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा। वैखरी वाक् प्रयोक्तॄणाम्प्राणवृत्तिनिबन्धिनी (४)॥ केवलम्बुद्ध्युपादानक्रमरूपानु-

(१) अन्या त्वप्रेर्यमाणेवेति पा० २।

(२) प्राणेनाप्याययत्सैव व्यवहारनिबन्धिनीति पा० २।

(३) घोषिणामिति पा० २।

(४) प्राणवृत्तिनिबन्धनेति पा० २।

पातिनी । प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते ॥ अविभागा तु पश्यन्ती सर्वतस्संहृतक्रमा । स्वरूपज्योतिरेवान्तस्सैषा वागनपायिनी ॥ सैषा सङ्कीर्यमाणापि नित्यमागन्तुकैर्मलैः (१) । अन्त्या कलेव सोमस्य नात्यन्तमभिभूयते ॥ तस्यां दृष्टस्वरूपायामधिकारो निवर्तते । पुरुषे षोडशकले तामाहुरमृताङ्कलाम्' (२) इति ॥ सैषा त्रयीवाक् चैतन्यग्रन्थिविवर्तवदनाख्येयपरिमाणा तुरीयेण भागेन मनुष्येषु प्रत्यवभासते । तत्रापि चास्याः किञ्चिदेव व्यावहारिकमन्यत्तु सामान्यव्यवहारातीतम् । आह खल्वपि । चत्वारि वाक्परिमिता पदानीत्यादि । तस्याश्चासङ्कीर्णं वाचो रूपं सामान्यविशेषवत्यस्मिन् लक्षणे व्याकरणाख्ये निबन्धनम् । अर्वाग्दर्शिनां तु पुरुषाणाम्प्रायेण सातिशयाः प्रतिघातिन्यः सापराधाः शक्तयः निरपराधशास्त्रमार्गो यः शब्दानां प्रतिपत्त्युपायो व्याकरणाख्यः ॥ १४४ ॥

तद्विभागाविभागाभ्यां क्रियमाणमवस्थितम् ।
स्वभावज्ञैश्च (३) भावानां दृश्यन्ते शब्दशक्तयः ॥१४५॥

विभागो नाम परप्रत्यायनाय कल्पितः प्रकृतिप्रत्ययादिभेदः । यथा धातोस्तव्यदादय इति । अविभागस्तु यत्र स्वरूपेणोच्चारणम् । यथा दाधर्त्ति दर्धर्तीति । तत्र कानि चिद्व्याकरणानि बहून् शब्दान् विभागेन बहून्प्रत्यक्षपक्षेण प्रतिपादयन्ति कानि चित्तु विभज्यविभज्यानुमानपक्षेण बहुतरं समुदायानाम्प्रतिपादनङ्कुर्वन्ति । सैषा स्मृतिर्यथाकालम्पुरुषशक्त्यपेक्षया साधुप्रयोगानुमेयैः शिष्टैस्सर्वज्ञैयेष्वप्रतिबद्धान्तःप्रकाशैः विशिष्टकालावधि प्रविभागं यथाकालन्धर्म्माधर्म्मसाधनभावेन समन्वितं शब्दस्वभावमव्यभिचारेण ये पश्यन्ति तैस्तथा

(१) नित्यमागन्तुभिर्मलैरिति पा० २ ।
(२) तामाहुरमृतां कलामिति पा० २ ।
(३) तु इति पा० २ ।

व्यवस्थाप्यते ॥ १४५ ॥

अनादिमव्यवच्छिन्नां श्रुतिमाहुरकर्तृकाम् ।
शिष्टैर्निबध्यमाना तु न व्यवच्छिद्यते स्मृतिः ॥ १४६ ॥

ये केवलं शब्दप्रमाणकाः सर्वमेव पुरुषदर्शनमदृष्टफलेष्वर्थेषु अति-शङ्कनीयत्वादप्रमाणम्मन्यन्ते ते श्रुतिस्मृत्योरविच्छेदाविशेषे तुल्येपि उभयोरप्यर्थस्य नित्यत्वेपि श्रुतिरव्यभिचरितस्वरवर्णानुपूर्व्वी अदेश-कालनियमा न केन चित्कर्त्रा प्रकारान्तरेणावस्थापितपूर्वा स्मृति-स्त्वेतद्विपरीता सर्वेषु च देशेषु शास्त्रादेव केवलन्धर्म्माधर्माभिव्यक्तिः शास्त्रीयानुष्ठाने च धर्म्मः तदतिक्रमे च प्रत्यवायः येषामेव हि गोव-धादीनां विषयान्तरे पापजनकत्वन्तेषामेव विषयान्तरेभ्युदयहेतुत्वं शास्त्रेणोच्यतइति न विना शास्त्रन्धर्म्माद्यवगम इति तात्पर्यम् ॥१४६॥

मतान्तरमाह ॥

अविघाताद्विवृत्तानामभिख्या स्वप्नवच्छ्रुतौ(१) ।
भावतत्त्वन्तु विज्ञाय लिङ्गेभ्यो विहिता स्मृतिः ॥१४७॥

कायवाग्बुद्धिविषया
ये मलास्समवस्थिताः ।
चिकित्सालक्षणाध्यात्म-
शास्त्रैस्तेषां(२) विशुद्धयः ॥ १४८ ॥

यथा शरीरे दोषशक्तिं रसौषधादिषु दोषप्रतीकारसामर्थ्यञ्च दृष्ट्वा चिकित्साशास्त्रमारब्धम् । यथा च रागादीन्बुद्धेरुपप्लवान्दृष्ट्वा तदुप-घातहेतुज्ञानोपायभूतान्यध्यात्मशास्त्राण्युपनिबद्धानि । तथेदमपि सा-

---

(१) अविभागाद्विवृत्तानामभिधा स्वप्नवच्छुभाविति पा० २ ।
(२) चिकित्सालक्षणाध्यात्मशास्त्रे तेषाम् इति पा० २ ।

ध्रुवात्संस्काराणाञ्ज्ञापनार्थमपभ्रंशानाञ्चोपघातकानान्निवृत्त्यर्थं लक्षणमारब्धमित्यर्थः ॥ १४८ ॥

के पुनरपभ्रंशास्तत्राह ॥

शब्दसंस्कारहीनो यो गौरिति प्रयुयुक्षिते ।
तमपभ्रंशमिच्छन्ति विशिष्टार्थनिवेशिनम् ॥ १४९ ॥

शब्दप्रकृतिरपभ्रंश इति सङ्ग्रहकारोक्तेरपभ्रंशो नाम न स्वतन्त्रः कश्चन विद्यते । सर्वस्य ह्यपभ्रंशस्य साधुरेव प्रकृतिः प्रसिद्धेस्तु रूढिमापाद्यमानाः स्वातन्त्र्यमिव केचिदपभ्रंशा लभन्ते । एवञ्च गौरिति प्रयोक्तव्ये अशक्त्या प्रमादादिभिर्वा गोण्यादयस्तत्प्रकृतयोपभ्रंशाः प्रयुज्यन्ते । ते च व्यवहारात्तावत्येव लब्धस्वरूपाः साधुत्वं विजहतीत्यर्थः । अर्थान्तरे तु प्रयुज्यमानाः केचित्साधव एव विज्ञायन्ते ॥ १४९ ॥

नह्येषां रूपमात्रप्रतिबद्धमसाधुत्वमित्याह ॥

अश्वगोण्यादयः (१) शब्दाः साधवो विषयान्तरे ।
निमित्तभेदात्सर्वत्र साधुत्वन्तु व्यवस्थितम् ॥ १५० ॥

आवपने गोणीति स्ववियोगाभिधाने च अश्व इति साध्वेव । सास्नादिमति क्लेषितादिमति च निमित्तान्तरात्प्रवृत्तयोरत्र विषये लब्धसंस्कारयोः साधुत्वमेव विज्ञायते । गोणीवेयं गौः गोणी बहुक्षीरधारणविषयादावपनत्वसामान्यादभिधीयते । तथा अविद्यमानं स्वमस्याश्व इति । यदा तु निमित्तं विनैव गवादिष्विमे प्रयुज्यन्ते तदा असाधव एव । न त्वेषान्नियतं साधुत्वमसाधुत्वं वा व्यवस्थितमस्ति ॥ १५० ॥

अथ तेषाम्बोधजनने उपायमाह ॥

ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः ।

---

(१) यथा गोण्यादय इति पा० २ ।

तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः ॥ १५१ ॥

अच्चिनिकीचादिवदपभ्रंशा अपि साधुप्रनाडिकयार्थम्प्रत्याययन्ति ॥ १५१ ॥

ननु साक्षादेव वाचकाः सन्तु गाव्यादयश्च गोशब्दस्य पर्यायास्सन्तु अत आह ।

न शिष्टैरनुगम्यन्ते पर्य्यायाइव साधवः ।

न यतः स्मृतिशास्त्रेण तस्मात्साक्षादवाचकाः ॥१५२॥

एते यदि पर्य्यायाः स्युस्तदा स्मृतिशास्त्रेण लक्षणेनानुगम्येरन् शिष्टैश्च गोशब्दतुल्यतया प्रयुज्येरन् नैवं दृश्यते तस्मान्न पर्य्यायाः । अत एव साक्षादवाचका इत्यर्थः ॥ १५२ ॥

साध्वनुमानेनैव वाचकत्वं सदृष्टान्तमुपपादयति ।

अम्बाम्बेति यदा बालः शिक्ष्यमाणोपभाषते ।

अव्यक्तन्तद्विदान्तेन व्यक्ते (१) भवति निश्चयः ॥१५३॥

बालो हि करणशक्तिवैकल्यादव्यक्तां श्रुतिम्प्रयुङ्क्ते प्रतिपत्तारश्च तत्प्रकृतिं व्यक्तां शब्दमवधारयन्ति तमेव चार्थबोधकम्मन्यन्ते न बालप्रयुक्तमव्यक्तम् ॥ १५३ ॥

एवं साधौ प्रयोक्तव्ये यो ऽपशब्दः (२) प्रयुज्यते ।

तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते ॥ १५४ ॥

सङ्कीर्णायां वाचि ये ऽपशब्दाः प्रयुज्यन्ते तैः शिष्टा लक्षणविदः साधून्प्रतिपद्यन्ते । तैश्च साधुभिरर्थमभिधीयमानम्पश्यन्ति अनुमानन्तु धूमइवाग्नेः ॥ १५४ ॥

केषाञ्चित्त्वसाधुरेव साक्षाद्वाचक इत्याह ।

---

(१) व्यक्तेरिति पा० २ ।

(२) अपभ्रंश इति पा० २ ।

पारम्पर्यादपभ्रंशा निर्गुणेष्वभिधातृषु (१) ।
प्रसिद्धिमागता ये तु तेषां साधुरवाचकः ॥ १५५ ॥

इहाभ्यासात् स्त्रीशूद्रबालादिभिरपभ्रंशाः प्रयुज्यन्ते प्रमादवद्भिश्च वक्तृभिस्तेषां च तैरेव प्रसिद्धतरो व्यवहारः । अत एव प्रयुक्ते साधौ संशये यः तस्यापभ्रंशस्तेन सम्प्रति निर्णयः क्रियते । ते तमेवासाधुमत्यन्तपक्षेण वाचकम्मन्यन्ते । साधुं त्वसाध्वनुमानेनेत्यर्थः ॥ १५५ ॥

दैवी वाग् व्यवकीर्णेयमशक्तैरभिधातृभिः ।
अनित्यदर्शिनां त्वस्मिन्वादे (२) बुद्धिविपर्ययः ॥ १५६ ॥

श्रूयते हि पुराकल्पे स्वशरीरज्योतिषाम्मनुष्याणां यथैवानृतादिभिरसङ्कीर्णा वागासीत् एवं सर्वैरपभ्रंशैरिदानीन्तु तत्सङ्कीर्णा वक्तृशक्तेः कालवशाद्धि प्रकृतिरेव प्रयोक्तॄणां तथा रूढिमुपागता । अनित्यवादी तु स यः साधूनां धर्म्महेतुत्वं न प्रतिपद्यते । स हि सर्वशब्दानां समूहं स्वाभाविकमाचष्टे ॥ १५६ ॥

तन्मतेपि ।

उभयेषामविच्छेदे
ऽप्यन्यशब्दविवक्षया (३) ।
योऽन्यः प्रयुज्यते शब्दो
न सो ऽर्थस्याभिधायकः ॥ १५७ ॥

येषामपि दैवी वाङ्ग कदा चिदप्यसङ्कीर्णा तेषापपि गम्यागम्यादिव्यवस्थावदियं साध्वसाधुव्यवस्था नित्यमविच्छेदेन स्मर्यते शिष्टैः । तत्रान्यशब्दविवक्षया बालप्रलापवदन्यः साधुरसाधुश्चार्थबोधाय प्रयु-

(१) द्विगुणेष्वभिधातृष्विति पा० २ ।
(२) यस्मिन्वादे इति पा० २ ।
(३) अश्वशब्दाविवक्षयेति पा० २ ।

ज्यमानो नार्थस्य वाचक इत्यर्थः ॥ १५७ ॥

इति श्रीमहावैयाकरणहरिवृषभविरचितवाक्यपदीयप्रकाशे आगमसमुच्चयो नाम ब्रह्मकाण्डं प्रथमं समाप्तम् ॥

श्रीः

अथ सटीके वाक्यपदीये

द्वितीयकाण्डारम्भः ।

अविघ्नमस्तु ।

एवं शब्दस्य प्रयोजनसहितं स्वरूपादिकं लेशतो निर्णीतं तस्य च साधारण्येन वाचकत्वं व्यवस्थापितम् इदानीं मतभेदेन केषां चित्पदं वाचकमन्येषां वाक्यमिति वाचकात्मनो वाक्यस्वरूपस्य तावद्वितत्य स्वरूपप्रतिपादनाय द्वितीयकाण्डप्रारम्भः । तत्राचार्यमतभेदाश्रयेण तावद्वाक्योद्देशार्थमाह ॥

आख्यातशब्दः सङ्घातो जातिः सङ्घातवर्त्तिनी ।
एकोनवयवः शब्दः क्रमो बुद्ध्यनुसंहृतिः ॥ १ ॥
पदमाद्यं पृथक्सर्वपदं साकाङ्क्षमित्यपि ।
वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायवादिनाम् ॥२॥

एते ऽष्टौ वाक्यविकल्पा आचार्याणाम् । तत्राखण्डपक्षे जातिः सङ्घातवर्त्तिन्येकोनवयवः शब्दो बुद्ध्यनुसंहृतिरिति त्रीणि लक्षणानि । खण्डपक्षे तु आख्यातशब्दः क्रमः सङ्घातः पदमाद्यं पृथक्सर्वपदं साकाङ्क्षमिति पञ्च लक्षणानि । अत्रापि सङ्घातः क्रम इत्यभिहितान्वयपक्षे लक्षणद्वयम् । आख्यातशब्दः पदमाद्यं पृथक्सर्वपदं साकाङ्क्षमित्यन्विताभिधानपक्षे लक्षणत्रयमिति विभागः । इह च पदप्रकृतिः संहितेति प्रातिशाख्यम् । तत्र पदानां प्रकृतिः कारणं पदप्रकृतिः संहितेत्यखण्डपक्षः । पदानि प्रकृतिर्यस्याः सेति खण्डपक्षः प्रादुर्भव-

ति । तत्राख्यातशब्दो वाक्यमिति परस्ताच्छब्दार्थनिर्णयइति प्रकरणे दर्शयिष्यति । यथा "आख्यातशब्दो नियतं साधनं यत्र गम्यते । तदप्येकं समाप्तार्थं वाक्यमित्यभिधीयत" इति । केवलेन पदेनार्थ इत्यादिना श्लोकाष्टकेन सङ्घातो वाक्यमिति दर्शयिष्यति । यथैक एव सर्वार्थ इत्यादिना देवदत्तादयो वाक्ये तथैव स्युरनर्थका इत्यन्तेन ग्रन्थेन । तथा अव्यक्तः क्रमवानित्यादिना व्यावृत्तभेदो येनार्थ इत्यन्तेन चाखण्ड एव स्फोटलक्षणः शब्दो वाक्यमिति दर्शितम् । उक्तञ्च येनोच्चरितेन सास्नालाङ्गूलखुरककुदविषाण्यर्थरूपं प्रतिपाद्यते स शब्दः । तथा स्फोटः शब्दो ध्वनिः शब्दगुण इति । स्फोटश्च द्विविधो बाह्य आभ्यन्तरश्चेति । बाह्योपि जातिव्यक्तिभेदेन द्विविधः । तत्र जातिलक्षणस्य जातिः सङ्घातवर्त्तिनीति । व्यक्तिलक्षणस्यैकोनवयवः शब्द इति । आभ्यन्तरस्य तु बुद्ध्यनुसंहृतिरित्यनेनोद्देशः । तत्र जातिव्यक्तिलक्षणस्य बाह्यस्य यथैक एवेत्यादिना पुनरव्यक्तः क्रमवानित्यादिना ग्रन्थेन स्वरूपमुक्तम् । यदन्तःशब्दतत्त्वमित्यादिना श्लोकचतुष्टयेन आन्तरस्य स्वरूपमुक्तं, संप्रत्ययेत्यादिश्लोकचतुष्टयेन क्रमो वाक्यमिति दर्शयिष्यति, नियतं साधने साध्यमित्यनेन च श्लोकद्वयेन पदमाद्यं पृथक्सर्वपदं साकाङ्क्षमिति लक्षणद्वयं व्याख्यास्यति । अन्यदपि वार्त्तिककारीयं पारिभाषिकं शास्त्रे वाक्यलक्षणमस्ति । आख्यातं साव्ययकारकविशेषणं वाक्यमेकतिङिति च । जरन्मीमांसकोक्तं लौकिकमप्यस्ति 'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यादि'ति । अनयोः सङ्घातपक्षे ऽन्तर्भावः । एतेपि प्रथममेव निघातादिव्यवस्थार्थमित्यादिना विचारयिष्यन्ते । इत्थमष्टावेव वाक्यविकल्पा मतभेदेन सम्पद्यन्तइति बोद्धव्यम् । यत्पुनरनेन वृत्तावुक्तम् उदाहरणमात्रमेतत् अन्यान्यपि वाक्यलक्षणानि दर्शयिष्यतीति । तद्वार्त्तिककारीयवाक्यलक्षणादेरन्तर्भावमनपेक्ष्येति मन्तव्यम् । उद्दिष्टानां च

वाक्यलक्षणानां यथान्यासमग्रे कारिकाभिरेव दर्शितक्रमेण स्वरूपमुन्मीलयिष्यतीति नार्थ इह तत्प्रदर्शनेन, वाक्यलक्षणप्रसङ्गेन च तथा वाक्यार्थस्य सम्बन्धस्य च मतभेदं दर्शयिष्यति। तत्राखण्डपक्षे त्रिष्वपि लक्षणेषु प्रतिभा वाक्यार्थः। यथा दर्शयिष्यति "विच्छेदग्रहणेऽर्थानां प्रतिभान्यैव जायते। वाक्यार्थ इति तामाहु"रिति। अवशिष्टेषु पञ्चसु लक्षणेषु मध्यादाख्यातशब्दो वाक्यमित्यस्मिन्पक्षे क्रिया वाक्यार्थः। यथा वक्ष्यति, क्रिया क्रियान्तराङ्गिन्नेत्यादि। यथा च "प्रतिभा यत्प्रभूतार्था यामनुष्ठानमाश्रितम्। फलं प्रसूयेत यतः सा क्रिया वाक्यगोचर" इति। सङ्घातपक्षे क्रमपक्षे च संसर्गो वाक्यार्थः। स च "सम्बन्धे सति यत्त्वन्यदाधिक्यमुपजायते। वाक्यार्थमेतं सम्प्राहुरनेकपदसंश्रय"मित्यादिना दर्शयिष्यते। तथा सङ्घातपक्षएव सर्वभेदानुगुण्यमित्यादिना प्रकारान्तरेणाभिहितान्वयपक्षे प्रतिपाद्यमाने "कार्यानुमेयः सम्बन्धो रूपं तस्य न विद्यत"इत्यनेन श्लोकेन विशेषविश्रान्तः पदानामिवार्थो वाक्यार्थ इति लक्ष्यते। पदमाद्यं पृथक्सर्वपदं साकाङ्क्षमित्यस्मिन् तु (१) पक्षद्वये संसृष्ट एव प्रथमतरं प्रक्रम्यते वाक्यार्थः। यथा निरूपयिष्यति "तेषां तु कृत्स्नो वाक्यार्थः प्रतिभेदं समाप्यते"। तथा "पूर्वैरर्थैरनुगतो यथार्थात्मा परः परः। संसर्ग एव प्रक्रान्तस्तथाद्येष्वर्थवस्तुष्वि" (२)ति। "अभिधेयः (३) पदस्यार्थो वाक्यस्यार्थः प्रयोजनम्" इत्यनेन प्रयोजनं वाक्यार्थत्वेन प्रदर्शितम्। तत्केषाञ्चिन्मते सर्वलक्षणसाधारणमिति न प्रयोजनवाक्यार्थो वाक्यलक्षणेषु पृथग्विभज्यते। तदेवं प्रतिभा संसर्गः संसर्गवशान्निराकाङ्क्षो विशेषावस्थितः पदार्थ एव संसृष्ट एवार्थः क्रिया

---

(१) तु इति पुस्तकान्तरे नास्ति।

(२) तथाद्येष्वपि वस्तुष्विति पा० २।

(३) अविभेय इति पा० २।

प्रयोजनं चेति षड्वाक्यार्था इहोपदर्शिताः । संसर्गे संसर्गवशाद्विशेषावस्थिते पदार्थे च वाक्यार्थेभिहितान्वयः । संसृष्टे क्रियायां चान्विताभिधानम् । प्रतिभायां त्वेकरसैव प्रतिपत्तिरिति न तत्र काचिदभिहितान्वयान्विताभिधानचर्चा । प्रयोजने त्वभिहितान्वय एव विधिनियोगभावनासंज्ञास्तु वाक्यार्था न निरूपिताः । यस्माद्भावनाक्रिययोः पर्यायता प्रायशो लक्ष्यते । केवलं प्रकृत्यर्थप्रत्ययार्थतायामत्र वैयाकरणमीमांसकयोर्विवादः । किञ्च भावना सकर्मिकैवाकर्मिकापि क्रियेति सत्यपि भेदे साध्यत्वाविशेषादभेद एवानयोः । यथा धात्वर्थभूता क्रिया साध्यरूपैव तथा भावनापीति कथमवान्तरभेदाद्भेदोनयोर्भवेत् । विधिनियोगौ तु लिङ्लोट्कृत्यान्तेष्वेव वाक्येष्वर्थाविव्यसर्वविषयत्वादनादृताविहेति न तत्प्रदर्शनं कृतम् । तत्तदनादिवाक्यार्थविकल्पाहितवासनाप्रबोधजन्मा क्रमवद्भिरिवाक्रमैर्बहीरूपतयाऽध्यस्तैः पदार्थैश्चित्रीकृत इव विकल्पविशेषोल्लिख्यमान आकारो बहीरूपतयाऽध्यस्तो निर्विभाग एव शाक्यानां वाक्यार्थ इति प्रायशः प्रतिभासोदर एवासौ मन्तव्यः । वाक्यमपि तत्तदनादिवाक्यविकल्पाहितवासनाप्रबोधजन्म क्रमवद्भिरिवाक्रमैः पदैश्चित्रीकृत इव बहीरूपतया ऽध्यस्यमानो विशिष्टविकल्पोल्लिख्यमान आकारविशेष एव बहीरूपतयाध्यस्त इति प्रायशो बुद्ध्यनुसंहृतिरित्यस्य सोदरमेवेति न तन्मतानुसारेण वाक्यवाक्यार्थयोरिहासङ्ग्रहो वेदितव्यः । नैयायिकादीनां तु पूर्वपूर्ववर्णस्मृतिसचिवोन्त्यो वर्णो नश्यदवस्थानुभवविषयीक्रियमाणः पदं यथा तथैव पूर्वपूर्वपदस्मृतिसचिवमन्त्यमेव पदं नश्यदवस्थानुभवविषयीक्रियमाणं वाक्यमिति प्रायशः संसर्गपक्षएवान्तर्भवति । तथा पूर्वपूर्वपदार्थस्मरणसचिवेनान्त्येन पदेनोपजन्यमाना प्रतीतिर्वाक्यार्थ इति प्रायशः संसर्गपक्षएवास्यान्तर्भाव इति न तदसङ्ग्रहेणाव्याप्तिरत्र वक्तव्या । अथात्रानवयवएव एकस्मिन्

स्फोटात्मके वाक्ये प्रतिभालक्षणे च वाक्यार्थे वाक्यवाक्यार्थयोरध्यासरूपः सम्बन्धः । यद्वक्ष्यति वाक्यवृत्तस्य वाक्यार्थे वृत्तिरित्यादि । अवशिष्टेषु पक्षेषु वाच्यवाचकभावलक्षणो योग्यताख्य एव शब्दार्थयोः सम्बन्धो मीमांसकदृष्ट्या । शाक्यदर्शनानुसारेण तु विज्ञानवादनयेन बौद्धे शब्दार्थे सर्वत्र कार्यकारणभाव एव । वाह्यार्थवादे तु तत्र संकेतलक्षणोसौ बोद्धव्यः । नैयायिकाद्यनुसारेण च संकेतलक्षण एवासावित्येवमत्र वाक्यवाक्यार्थसम्बन्धानां संक्षेपतः स्वरूपं बोद्धव्यं सम्बन्धेषु मध्यादत्राध्यासमेव दर्शयिष्यति पदकाण्डे तु सर्वानभिधास्यति । तत्र वैयाकरणस्याखण्ड एवैकोनवयवः शब्दः स्फोटलक्षणो वाक्यं प्रतिभैव वाक्यार्थो ऽध्यासश्च सम्बन्ध इति पदवादिपक्षदूषणपरः परं टीकाकारो व्यवस्थापयतीत्यस्य काण्डस्य संक्षेपः ॥ २ ॥

अथ वार्त्तिककारमीमांसकोक्तयोर्वाक्यलक्षणयोः किं समावेश उत भिन्नविषयतेति विचारार्थमाह ॥

निघातादिव्यवस्थार्थं शास्त्रे यत्परिभाषितम् ।
साकाङ्क्षावयवं तेन (१) न सर्वं तुल्यलक्षणम् ॥ ३ ॥

इह पदविधिः सामर्थ्ये सति परिभाषितः । तत्र सत्यपि पदानां सामर्थ्ये निघातादयः क्वचिन्नेष्यन्ते । यथा । अयं दण्डो हरानेन । ओदनं पच मम भविष्यति । ओदनं पच तव भविष्यतीति । अत्रानेनेति सर्वनाम्ना दण्डस्य परामर्शाद्धरतिना सह तस्य सामर्थ्यम् । तथा युष्मदर्थस्यौदनेन सम्बन्धात्पचत्यर्थस्य तेन सह सामर्थ्यम् । एवं च सति सामर्थ्ये तिङ्ङतिङ इति निघातः प्राप्नोति । तेमयावेकवचनस्येति चादेशौ । नचेष्यन्ते । वाक्यभेदात् । सामर्थ्याभावेपीष्यन्ते । यथा, नद्यास्तिष्ठति कूले शालीनां ते ओदनं दास्यामीति । अत्र न-

(१) साक्षाद्बहुविधानेनेति पा० २ ।

द्यास्तिष्ठतीत्यस्य च सम्बन्धानुपपत्तेः सामर्थ्यं नास्ति । इष्यते च निघातः । तथा शालीनां युष्मदश्च सामर्थ्याभावः । इष्यते च तेमयाविकवचनस्येति युष्मदादेश इत्यालोच्य वार्त्तिककृता निघातादिव्यवस्थार्थमारब्धं 'समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्या' इति । एवं चायं दण्ड इत्यत्र सत्यपि सामर्थ्ये नास्ति निघातस्य प्रसङ्गोऽवध्यवधिमतोर्भिन्नवाक्यतयावस्थानात् । अस्तीत्यध्याहारेण ह्ययं दण्ड इत्येकं वाक्यम् । हरानेनेति च द्वितीयं वाक्यम् । नद्यास्तिष्ठतीत्यादौ त्ववध्यवधिमतोः पदयोः सामर्थ्याभावेऽप्येकवाक्यव्यवस्थितौ प्रवर्त्तत एव निघातादय इति नास्त्येषामव्यवस्था । समानवाक्ये निघातादयो वक्तव्या इत्युक्तम् । तत्र वाक्ये विज्ञाते समानवाक्यत्वं ज्ञायतइति प्रसङ्गात्तत्र वार्त्तिककारेणादावेव वाक्यलक्षणमुक्तम् 'आख्यातं साव्ययकारकविशेषणं वाक्यमेकतिङि'ति चे'ति । एवं च मीमांसकोक्तिनास्य सर्वत्र समावेशोस्ति न वेति विचार्यते । शास्त्रे वाक्यकारेण निघातादिव्यवस्थार्थं यद्वाक्यलक्षणं परिभाषितं तेन मीमांसकोक्तं वाक्यलक्षणं सकलं न तुल्यलक्षणम् । साकाङ्क्षावयवमित्यनेन मीमांसकोक्तं वाक्यलक्षणं सूचितम् । तत्र क्व चिदेते समाविशतः । यथा नद्यास्तिष्ठति कूले शालीनां तश्ओदनं दास्यामीति । अयं दण्डो हरानेन ओदनं पच तव भविष्यतीत्यादावसमावेशः । मीमांसकवाक्यलक्षणसमाश्रयणेनात्र प्राप्नुवन्ति निघातादय एकप्रयोजनत्वात् । न चेष्यन्ते । तस्माद्वार्त्तिककारीयमेव वाक्यलक्षणं न्यायः ॥ ३ ॥

अथात्र प्रसङ्गान्मीमांसकवाक्यलक्षणमर्थद्वारेण प्रदर्शयितुमाह ॥

साकाङ्क्षावयवं भेदे परानाकाङ्क्षशब्दकम् ।
कर्मप्रधानं गुणवदेकार्थं वाक्यमिष्यते (१) ॥ ४ ॥

भेदे विभागे विशेषजिज्ञासायां यत्साकाङ्क्षावयवम् । अविभागे तु

(१) वाक्यमुच्यतइति पा० २ ।

परानाकाङ्क्षाः शब्दाः पदानि यस्मिन् तत्परानाकाङ्क्षशब्दकम् । कर्मप्रधानं क्रियापदप्रधानमित्यर्थः । तस्यैव प्रधानाभिधेयप्रयुक्तत्वादित्यभिप्रायः । गुणवद्विशेषणपदयुक्तम् । एकार्थमेकप्रयोजनम् ॥ ४ ॥

इदानीं वार्त्तिककारीयस्य वाक्यलक्षणस्याव्याप्तिमाशङ्क्याह ॥

सम्बोधनपदं यच्च तत् क्रियाया विशेषकम् ।
व्रजानि देवदत्तेति निघातोऽत्र तथा सति ॥ ५ ॥

व्रजानि देवदत्तेत्यत्र देवदत्तेत्येतत्पदं नाव्ययं न च कारकं नापि तद्विशेषणमिति वाक्यलक्षणेनासंगृहीतत्वादाष्टमिक आमन्त्रितस्य चेति निघातो न प्राप्नोतीति चोद्यम् । आख्यातं साव्ययं सकारकं सविशेषणमिति सामान्येनाभिधानात्सक्रियाविशेषणस्याप्याख्यातस्य वाक्यतेत्यदोषः । तथाहि । अत्र संबोध्यमानदेवदत्तविषया व्रजतिक्रिया असंबोध्यमानदेवदत्तविषयायाः संबोध्यमानयज्ञदत्तविषयाया वा पृथगेवेति विशिष्टैवात्र व्रजतिक्रिया । क्रियायाश्च विशेषणं कदाचित्सामानाधिकरण्येन भवति । यथा सुष्ठु करोति शोभनं करोतीति । अत्र करोत्यर्थस्य सुष्ठ्वित्यादिविशेषणविशिष्टस्यैव प्रतीतेः सुष्ठ्वित्यादीनां करोत्यादिक्रियया सामानाधिकरण्यम् । एवं चासत्त्वभूतायाः क्रियाया विशेषणमित्यसत्त्वप्रधानत्वाल्लिङ्गसर्वनाम्ना नपुंसकेन योगः क्रियायाश्च निर्वर्त्यत्वात्कर्मत्वमिति न्यायसिद्धमेव कर्मत्वं नपुंसकता चेति 'क्रियाविशेषणानां कर्मत्वं नपुंसकलिङ्गता चे'ति नारम्भणीयं वचनम् । वैयधिकरण्येनापि विशेषणं भवति यथा व्रजानि देवदत्तेति । अत्र हि देवदत्त व्रजानीति देवदत्तस्य व्रजनक्रियायाश्च सामानाधिकरण्यं नास्ति । केवलमामन्त्र्य देवदत्तं व्रजत्यसाविति देवदत्तामन्त्रणविशेषिता केवला या विलक्षणा व्रजनक्रियेत्याख्यातं सविशेषणमेवेति वाक्यलक्षणसद्भावात्प्रवर्त्तते एव निघा-

तः । देवदत्त व्रजानीत्येवमुदाहरणं न प्रदर्शितम् । आमन्त्रितं पूर्वमविद्यमानवदिति न निघातः स्यादिति ॥ ५ ॥

पुनरप्यव्याप्तिं वार्त्तिककारलक्षणस्याशङ्क्य परिहर्त्तुमाह ॥

यथानेकमपि क्त्वान्तं तिङन्तस्य विशेषकम् ।
तथा तिङन्तं तत्राहुस्तिङन्तस्य(१) विशेषकम् ॥ ६ ॥

इह पूर्वं स्नाति पचति ततो व्रजति तत इत्यत्र तत इत्येतस्मादुत्तरस्य व्रजतीत्यस्य निघातो न प्राप्नोति वाक्यभेदात् । इष्यते च । अत्र तिङन्तादुत्तरस्य तु तिङन्तस्यातिङिति प्रतिषेधान्निघातनिवृत्तिः सिद्धेति नात्र स्नातीत्यस्मादुत्तरस्य पचतिशब्दस्य निघातः प्राप्नोतीति चोद्यमुद्भावनीयम् । इष्टस्य निघातस्याप्राप्तिरेवात्रोद्भावनीया । अत्रोच्यते । नास्त्यत्र वाक्यभेदः व्रजतीत्येतत्प्राधान्येनैकं क्रियापदमत्र स्थितम् अन्यानि क्रियान्तराणि तद्विशेषणान्येव । यथा स्नानभोजनपानैः कृदन्तैर्विशिष्यते व्रजतिक्रिया तथात्र तिङन्तैः स्नातिप्रभृतिभिः प्रधानं व्रजतिक्रियैव विशिष्यतइत्येकैवात्र सविशेषणा व्रजतिक्रिया । केवलायास्तस्याः पृथगेवेत्येतत्सविशेषणमेकमेव वाक्यमिति वाक्यभेदाभावान्नास्ति निघातासिद्धिदोषः । एकवाक्यत्वे च तिङन्तादुत्तरस्य तिङन्तस्यातिङिति प्रतिषेधान्निघाताभावः । यथा वक्ष्यति । 'बहुष्वपि तिङन्तेषु साकाङ्क्षेष्वेकवाक्यता । तिङां तिङ्भ्यो निघातस्य पर्युदासस्तथार्थवान्' इति एवं चातिङ्ग्रहणे सप्रयोजने स्थिते वार्त्तिककारेण यदुक्तमतिङ्ग्रहणमनर्थकं समानवाक्याधिकारादिति तत्राभिप्रायो वाच्यः । एवं वादिनस्तस्य वाक्यभेदोत्राभिमत इत्यभिप्राय आख्यातं साव्ययकारकविशेषणमित्यत्रैकवचनस्य विवक्षितत्वादिति । तथा च टीकाका-

(१) अत्राहुस्तिङन्तस्येति पा० २ ।

रः प्रदर्शयिष्यति । "एकतिङ्वाक्यं तु वाक्यं तु शास्त्रे नियतलक्षणम् । तस्यातिङ्ग्रहणे नार्थो वाक्यभेदान्न विद्यत" इति । सूत्रकारस्य त्वतिङ्ग्रहणादेकमेवाखण्डं वाक्यमर्थैकत्वादाख्यातभेदेप्यभिप्रेतमिति गम्यते । तदभिप्रायानुसारेणैव निरूपयिष्यति । "अनेकाख्यातयोगेपि वाक्यं न्यायपथानुगैः । एकमेवेष्यते कैश्चिद्भिन्नरूपमिवस्थित"मिति ॥ ६ ॥

टीकाकारश्चामुमेव पक्षं सूत्रकाराभिप्रायसमाश्रयणेन युक्तियुक्तं मन्यमानो बहीरूप आन्तरो वा निर्विभागः शब्दार्थमयो बोधस्वभावः शब्दः स्फोटलक्षण एव वाक्यमिति क्रमेण व्याजिहीर्षुश्चित्रज्ञानचित्ररूपदृष्टान्तप्रदर्शनं पूर्वमुपक्रमते । तत्र चित्रबुद्धिदृष्टान्तप्रदर्शनार्थमाह ॥

यथैक एव सर्वार्थप्रत्ययः (१) प्रविभज्यते ।
दृश्यभेदानुकारेण वाक्यार्थानुगमस्तथा ॥ ७ ॥

चित्रज्ञानं सर्वाकारमेकमेव । प्रविभागस्त्वस्य दृश्यभेदसमाश्रयेण क्रियते । नीलपीताद्यनेकाकारमेव विज्ञानमुपजातमिति । वस्तुस्थित्या तत्र ज्ञानआकारभेदो नास्ति । तथा वाक्यवाक्यार्थयोः स्वरूपं बोद्धव्यम् । वाक्यार्थानुगमस्तथेत्यनेन हि वाक्यवाक्यार्थयोरखण्डत्वं पानकरसमयूराण्डरसचित्ररूपनरसिंहगवयचित्रज्ञानवत्समानमेवेत्युच्यते यथा वाक्यं निर्विभागं स्फोटलक्षणं वाचकं तथा वाक्यार्थोपि तथाविध एवेत्यनयोरेकयोगक्षेमत्वमुक्तम् ॥ ७ ॥

एवमान्तरं दृष्टान्तमुपदर्श्य बाह्यमप्युपदर्शयितुमाह ॥

चित्रस्यैकस्वरूपस्य यथा भेदनिदर्शनैः (२) ।

---

(१) सर्वार्थप्रकाश इति पा० २ ।
(२) चित्रस्यैकस्य रूपस्य यथा भेदनिदर्शनमिति पा० २ ।

नीलादिभिः समाख्यानं क्रियते भिन्नलक्षणैः ॥ ८ ॥

चित्रं हि रूपमवयविगतमनंशमेकमेव । तस्यैवावयवगतैर्यथा नीलादिभिः भेदेन निदर्शनं प्रदर्शनं येषां तैः पृथग्रूपैरेव समाख्यानं क्रियते ॥ ८ ॥

तथा प्रकृते किमित्याह ॥

तथैवैकस्य वाक्यस्य निराकाङ्क्षस्य सर्वतः ।
शब्दान्तरैः समाख्यानं साकाङ्क्षैरनुगम्यते ॥ ९ ॥

एकस्य निर्विभागस्य वाक्यस्य सर्वतः परिपूर्णस्य वाक्यान्तरगतैः पदान्तरैरन्वाख्यानं तथैव क्रियतइति ॥ ९ ॥

न वा पदस्यार्थे प्रयोगादित्यस्मिन् दर्शने यथाखण्डमेव पदं प्रकृतिप्रत्ययादिभिः कल्पितैरेव विभज्यते । तथा वाक्येप्यसत्यभूतानामिवाबुधबोधनाय पदानां विभागो द्रष्टव्य इति प्रदर्शयितुमाह ॥

यथा पदे विभज्यन्ते प्रकृतिप्रत्ययादयः ।
अपोद्धारस्तथा वाक्ये पदानामुपवर्ण्यते ॥ १० ॥

पदे हि यथा प्रकृतिप्रत्ययविभागोऽसत्य एव बालव्युत्पादनाय क्रियते । तथा वाक्ये वाक्यार्थप्रतिपादनायापोद्धारः पदानामुपवर्ण्यतइति बोद्धव्यम् ॥ १० ॥

तत्र वाक्यादपोद्धृतानां पदानां केवलमितरपदसारूप्यमात्रं दृश्यतइति प्रतिपादयितुमाह ॥

वर्णान्तरसरूपं च वर्णभागेषु दृश्यते ।
पदान्तरसरूपाश्च पदभागा अवस्थिताः ॥ ११ ॥

यथा संध्यक्षरेषु भागा वर्णान्तरसरूपा दृश्यन्ते परमार्थतस्त्वव्यवपृक्तत्वान्निर्विभागा एव । एवं वाक्ये पदान्तरसरूपाः पदरूपा भागाः पदभागाः । पदे वा निरंशे ये भागाः प्रकृतिप्रत्ययरूपास्तेव-

स्थिता इति ॥ ११ ॥

एतदेव व्यक्तीकुर्वन्नाह ॥

भागैरनर्थकैर्युक्ता वृषभोदकयावकाः ।
अन्वयव्यतिरेकौ तु (१) व्यवहारनिबन्धनम् ॥ १२ ॥

नहि वृषभे ऋषभस्योदकयावकयोर्वोदयावशब्दयोरर्थानुगमः कश्चिदस्ति । अपि तु शास्त्रे पदस्य प्रकृतिप्रत्यययोरन्वयव्यतिरेकाभ्यां विना कथमज्ञो व्युत्पाद्येत । एवं च निरंशमेव वाक्यं वाचकमित्येव युक्तम् ॥ १२ ॥

अथ वाक्यार्थस्यापि तथैव निर्विभागत्त्वं प्रतिपादयितुमाह ॥

शब्दस्य न विभागोस्ति कुतोर्थस्य भविष्यति ।
विभागैः प्रक्रियाभेदमविद्वान्प्रतिपद्यते ॥ १३ ॥

शब्दस्य स्फोटलक्षणस्य विभागो नास्ति । तद्वाच्यस्य प्रतिभारूपस्यार्थस्य कुतो भविष्यति । यथा निदर्शयिष्यति । 'विच्छेदग्रहणेर्थानां प्रतिभान्यैव जायते । वाक्यार्थ इति तामाहु'रिति । तस्य पदानुरोधेन पदार्थस्यापि प्रकृतिप्रत्ययानुरोधेन भागकल्पना । मूढस्तु विभागेन प्रक्रियाभेदं प्रक्रियाभेदे चार्थभेदमसत्यमपि प्रतिपद्यतइति । किं कुर्मः ॥ १३ ॥

युक्तं चैतत् यद्वाक्ये पदार्थभेदो नास्तीति दृष्टान्तप्रदर्शनपूर्वकमाह ॥

ब्राह्मणार्थो यथा नास्ति कश्चिद्ब्राह्मणकम्बले ।
देवदत्तादयो वाक्ये तथैव स्युरनर्थकाः ॥ १४ ॥

यथा ब्राह्मणकम्बलशब्दे ब्राह्मणशब्दस्य न कश्चिदर्थो विद्यते । तथैव देवदत्त गामभ्याजेत्यादौ वाक्ये देवदत्तादीनां पृथगर्थो नास्ती-

(१) चेति पा० २ ।

त्यनर्थकान्येव पदानि । अतश्च स्थितमेतत्, पदखण्डं निराकाङ्क्षमेकं पदव्यतिरिक्तं वाक्यं पदार्थव्यतिरिक्तो वाक्यार्थश्च तथैवेति ॥ १४ ॥

यत्पुनर्मीमांसकैरुच्यते । यथा पदसंघात एवाकाङ्क्षायोग्यतासन्निधानवशात्परस्परसमन्वितो वाक्यं संसर्गश्च वाक्यार्थ इति तद्दूषयितुमाह ॥

सामान्यार्थस्तिरोभूतो न विशेषेऽवतिष्ठते ।
उपात्तस्य कुतस्त्यागो निवृत्तः क्वावतिष्ठताम् ॥ १५ ॥

इह देवदत्त गामभ्याज शुक्लां दण्डेनेति देवदत्तादीन्येव पदानि वाक्यम् । तत्र देवदत्तपदं तावद्यदि सामान्यमात्रे प्रथमं वर्तते तत्तस्य गवादिपदकाले वाचः क्रमवर्त्तित्वात्तिरोधानादसत्त्वमेवेति कुतः पदान्तरश्रवणकाले तदर्थप्रतीतिरसत्त्वादेव च न पदान्तरसंनिधाने तस्य विशेषे ऽवस्थानम् । अभ्युपगम्यापि स्मर्यमाणपदान्तरसंनिधाने विद्यमानत्वं पदस्य न विशेषेवस्थानं युज्यतइत्याह । उपात्तस्येति । सामान्यलक्षणस्य सकलपदार्थसाधारणस्यार्थस्य पूर्वमुपात्तस्य वाच्यत्वेन परिगृहीतस्येदानीं पदान्तरसंनिधाने त्यागः कुतो युज्यते शब्दार्थसम्बन्धस्यानित्यताप्राप्तेः । न च तथा मीमांसकस्याभ्युपगम इति । तदप्यभ्युपगम्योच्यते । निवृत्त इति । स्वार्थान्निवृत्तोसौ पदान्तरसंनिधाने शब्दः क्वेदानीमवतिष्ठताम् । शब्दान्तरबोध्येर्थे तस्य वाचकभावविरहात्स्थितिः कथं युज्यते ॥ १५ ॥

अथोच्यते अर्थप्रतिपत्तिर्दृष्टा देवदत्तेत्यादिकात्समुदायात् सा कथमपन्हूयते तत्राह ॥

अशब्दो यदि वाक्यार्थः पदार्थोऽपि तथा भवेत् ।
एवं च सति सम्बन्धः शब्दस्यार्थे न हीयते ॥ १६ ॥

उक्तनीत्या शब्दा न युज्यन्ते वाचकाः । तदभावाच्चाशब्दो वाक्या-

र्थो यद्यभ्युपगम्यते । तदयमपरस्ते दोषः । पदार्थोपि पदप्रतिपाद्यो न कश्चिदनेकवर्णवर्त्तित्वाद्वाच उच्चरितप्रध्वंसित्वाच्च वर्णानामिति पदमप्येकं नास्ति तदभावात्कः पदार्थः स्यात् । इत्थमशब्दो ऽवाचको वाक्यार्थ इति वाच्यवाचकभावलक्षणः सम्बन्धः शब्दार्थयोस्त्यक्तः स्यान्मीमांसकेनेत्याह । एवं चेति ॥ १६ ॥

एवं तावदभिहितान्वयवादी निरस्तः इदानीमन्विताभिधानसमाश्रयणेन पदमाद्यं पृथक्सर्वपदं साकाङ्क्षमित्युद्दिष्टे वाक्यलक्षणे प्रदर्शयितुकाम आह ॥

विशेषशब्दाः केषां चित्सामान्यप्रतिरूपकाः ।
शब्दान्तराभिसम्बन्धाद्व्यज्यन्ते प्रतिपत्तृषु ॥ १७ ॥

इह देवदत्त गामभ्याजेत्यत्र देवदत्तपदं गां बधानेत्यस्माद्विशिष्टमेव वक्त्रा समुदीरितं भ्रमात् तु सकलसाधारणं प्रतिभाति । उत्तरकालं गवादिपदसम्बन्धाद्विशिष्टा प्रतिपत्तिरभिव्यज्यतइति तदेव वाक्यम् । सकलविशेषणखचितस्य प्रथमतरमेवोपक्रान्तः संसृष्ट एवार्थो वाक्यार्थ इति । यथा वक्ष्यति "पूर्वैरर्थैरनुगतो यथार्थात्मापरः परः । संसर्ग एव प्रक्रान्तस्तथाद्येष्वर्थवस्तुषु" इति ॥ १७ ॥

एतदेव स्फुटीकर्त्तुमाह ॥

तेषां तु कृत्स्नो वाक्यार्थः प्रतिभेदं समाप्यते ॥१७ऽऽ॥

उपक्रम एव विवक्षितार्थप्रत्यायनाय विशिष्टपदोदीरणमारभतइत्याद्य एव पदे प्रत्येकं वा सकलस्य वाक्यार्थस्य समाप्तिरवगन्तव्या ॥ १७ऽऽ ॥

यद्येकस्मादेव पदात्सकलवाक्यार्थप्रतीतिः तर्हि इतरपदवैयर्थ्यमित्याशङ्क्याह ॥

व्यक्तोपव्यञ्जना सिद्धिरर्थस्य प्रतिपत्तृषु ॥ १८ ॥

प्रतिपत्तृषु वाक्यार्थस्य सिद्धिरवगतिर्व्यक्तोपव्यञ्जना । व्यक्ता उदीरिता उपव्यञ्जना अभिव्यञ्जकाः पदविशेषा यस्याः सा तथोक्ता । अभिव्यक्ताभिव्यञ्जका वाक्यार्थावगतिरिति पदान्तराणां वाक्ये नास्त्येव वैयर्थ्यमित्यन्विताभिधानप्रदर्शनम् । दूषणमस्याग्रे तत्रतत्राभिधास्यति । यथा, नियमार्था श्रुतिर्भवेदित्यादि । तथाहि । यद्येकेन पदेन सकलवाक्यार्थस्याशेषविशेषखचितस्यावगतिस्तदोत्तरेषां पदानां नियमायानुवादाय वोच्चारणं स्यात्, न चैतद्युक्तमिति वक्ष्यामः । एकस्मादेव पदात्समस्तविशेषखचितस्य वाक्यार्थस्य प्रतीतिरुत्तरेषामानर्थक्यं स्यादेव । न च तस्मादेव वाक्यार्थप्रतीतिर्दृश्यते । व्यक्तोपव्यञ्जनेत्यसमाधानमेव । यतः किमेकस्माद्वाक्यार्थावसायोन्येषामुपव्यञ्जकत्वम् । अथ समस्तेभ्य एव तेभ्यः सर्वथोत्तराणि पदानि वाक्यार्थप्रतीतय उपादीयन्तएवेत्यन्विताभिधानमसमञ्जसमेव । एकस्य वा परपदोच्चारणकाले तिरोधानादभिहितान्वयस्याप्यसम्भव इत्यर्थभागे दूषणं शब्दभागसमाश्रयणेन द्वयोरपि पक्षयोर्दूषणं पदानि वाक्ये तान्येवेत्यादि श्लोकद्वयेनाभिधास्यति ॥ १८ ॥

सम्प्रति प्रतिभाभेदव्याचिख्यासया ऽखण्डपक्षमेवानुबध्नन्नाह ॥

अव्यक्तः क्रमवान् शब्द उपांश्वयमधीयते (१) ।
अक्रमस्तु वितत्येव बुद्धिर्यत्रावतिष्ठते ॥ १९ ॥

इह निरंश एवाभिन्नो व्यक्तिस्फोटो जातिस्फोटो वा बहीरूप आन्तरः शब्दार्थमयो वा बुद्ध्यनुसंहारो वाक्यमिति स एव वाचक उपपन्नः । यस्तु भेदप्रतिभासः सो ऽसावुपाधिकृत एवेत्यर्थः । तथोपांशुपरमोपांशुव्यक्तो व्यक्ततरश्च विलम्बितो विलम्बिततरश्च द्रुतो द्रुततरश्चेत्यादिकाः प्रतिभासा अभिव्यञ्जकध्वनिकृता न पुनः स-

(१) उपांशु समधीयतइति पा० ॥

त्या इति बोद्धव्यम् । तस्माद्यः शब्दो व्यक्त उपांशु कृत्वाधीयते । सो ऽभिव्यञ्जकध्वनिकृतात्क्रमात्क्रमवान्नानाविधावस्थायुक्तः प्रतीयते । परमार्थतस्त्वसावक्रम एव स्फोटात्मा प्रतिभास उपाधिवशात्तु तत्र बुद्धिर्विततेवानुगम्यतइति बोद्धव्यम् । अनेनैकोनवयवः शब्द इत्युद्दिष्टस्य व्यक्तिस्फोटस्य स्वरूपमुक्तमिति बोध्यम् ॥ १६ ॥

अथ जातिः सङ्घातवर्त्तिनीत्युद्दिष्टस्य जातिस्फोटस्यापि दृष्टान्तप्रदर्शनद्वारेण स्फुटीकरणायाह ॥

यथाक्षेपविशेषे ऽपि कर्मभेदो न गृह्यते ।
आवृत्तौ व्यज्यते जातिः कर्मभिर्भ्रमणादिभिः ॥२०॥
वर्णवाक्यपदेष्वेवं तुल्योपव्यञ्जना श्रुतिः ।
अत्यन्तभेदे तत्त्वस्य सरूपेव प्रतीयते ॥ २१ ॥

इह भ्रमणलक्षणा कर्मजातिर्यथा विशिष्टप्रयत्नजनितेन क्षेपविशेषेणाभिव्यक्ता प्रत्येकपरिसमाप्तत्वात् । न च पार्श्वस्थेन सा विज्ञायते । भ्रमणानामावृत्तौ तु भ्रमणंभ्रमणं प्रति प्रतिपत्त्वा सा गृह्यते । एवं वर्णपदवाक्येषु श्रुतिरभिव्यञ्जको ध्वनिरत्यन्तभेदे तत्त्वस्य वर्णपदवाक्यस्फोटलक्षणस्य साभिव्यञ्जिका सरूपेव प्रतीयते । परमार्थतो भिन्ना ऽपि (१) सती । कीदृशी, तुल्योपव्यञ्जनेति । तुल्यः सदृश उपव्यञ्जनः स्थानकरणाभिघातलक्षणो यस्याः सा तथेति । तेन भिन्नप्रयत्नोदीरितध्वन्यभिव्यक्तो ऽयं जातिस्फोटो विलक्षण एवेति बोद्धव्यम् । युक्तं चैतत्, यथा निरंशस्यास्य स्फोटस्य पूर्वापरभाव उपाधिकृतो न स्वतो नित्यत्वादिति ॥ २१ ॥

वैतत्येन नित्यत्वसमर्थनार्थमाह ॥

नित्येषु तु कुतः पूर्वं परं वा परमार्थतः ।

(१) अपीति पुस्तकान्तरे नास्ति ॥

एकस्यैव तु सा शक्तिर्यद्देवमवभासते ॥ २२ ॥

नित्येषु हि परमार्थतः पूर्वापरभावो ऽसंभव्युपाधिकृतो दृश्यत-एव । ननु सदैकरूपतया किं नावभासते नहि तत्र स्वभावभेद-स्य सम्भव इत्याशङ्क्योक्तमेकस्येत्यादि । एकस्वभावोपि तथाविधश-क्तियुक्त एव वस्तुस्वाभाव्यात् । यदेवं वैतत्येन पूर्वापरभावस्वरूपतया उपाधिभेदानुवर्तनेनावभासतइति ॥ २२ ॥

पुनरप्युपाधिभेदेनैव शब्दस्य भेदप्रतिभासो न स्वतो नित्यत्वादि-ति दृष्टान्तप्रदर्शनपूर्वकमाह ॥

चिरं क्षिप्रमिति ज्ञाने कालभेदादृते यथा ।
भिन्नकाले प्रकाशेते स धर्मो ह्रस्वदीर्घयोः ॥ २३ ॥

चिरमिति ज्ञानं क्षिप्रमिति च यथा ज्ञानत्वाविशेषादेककालम-पि ज्ञेयसमाश्रयणेन भिन्नकालमिव प्रथते । चिरज्ञानं विततप्रति-भासमिवाभाति । क्षिप्रज्ञानमेतद्विपरीतम् । तद्वद्ध्रस्वदीर्घयोर्धर्मः स्वभावो ऽवगन्तव्यः । न तु ह्रस्वादिरूपता काचित्स्फोट इति ना-स्ति स्फोटस्य स्वतो भेदः ॥ २३ ॥

अथोच्यते न नित्यमुपाधिवशाद्भिन्नं वक्तुं युक्तं स्वभावभेदप्रसङ्गादि-त्याशङ्क्याह ॥

न नित्यः परमात्राभिः कालो भेदमिहार्हति ॥२३ऽऽ॥

इह कालोपि नित्य एवाभ्युपगतो नित्यमेकमित्यादिलक्षणकथ-नात् तस्येदानीं क्षणलवनिमिषेत्यादिव्यवहारः कथमुपपद्यते । अथ परमात्राभिस्तस्य भेद उपचर्यते । यथा परमाणोः स्वावरुद्धनभोदे-शत्यागोपलक्षितः कालः क्षणः क्षणद्वयं च लव इत्यादि । तथा नि-रंशे वाक्यश्रौपाधिकभेदपरिकल्पनायां कः प्रद्वेषः ॥ २३ऽऽ ॥

अथ ब्रूषे न वयं नित्यमेकमित्यादिलक्षणलक्षितं कालं व्यतिरिक्तं

जानीमः पूर्वापरीभूताः पदार्थमात्रा एव स्वभावभिन्नाः कालस्तत्समाश्रयणेन चायं क्रमयौगपद्यव्यवहारः न पुनस्तद्व्यतिरिक्तनित्यस्वभावकालकृत इति, तत्राप्याह ॥

व्यावर्त्तिनीनां मात्राणामभावे कीदृशः क्रमः ॥ २४ ॥

ताः पूर्वापरीभूताः पदार्थमात्रा उदयव्यययोगिन्य एवेति विशरारूणान्तासां कीदृशः क्रमः कथं च तत्समाश्रयणेन कालव्यवहार इति यत्किञ्चिदेतत् ॥ २४ ॥

अथ तथाविधपदार्थसमाश्रयणेन बुद्धिरुपजायमाना कालव्यवहारं निर्वर्तयिष्यतीत्याशङ्क्याह ॥

ताभ्यो या जायते बुद्धि-
रेका सा भागवर्तिनी (१) ॥ २४ऽऽ ॥

ताभ्यः पदार्थमात्राभ्यो या जायते बुद्धिः सापि न शक्नोति कालव्यवहारं निर्वर्त्तयितुं यत एकासौ बुद्धिर्निर्विभागेति कथं पूर्वापरव्यवहारं निर्वर्तयेत् ॥ २४ऽऽ ॥

तत्राह ॥

सा हि स्वशक्त्या भिन्नेव
क्रमप्रत्यवमर्शिनी ॥ २५ ॥
क्रमोल्लेखानुषङ्गेण ॥ २५ऽ ॥

बुद्धिर्हि भिन्नेव स्वशक्त्या क्रमप्रत्यवमर्शिनी भविष्यति यतः क्रमोल्लेखानुषङ्गेणैवासावनुभववासनावशादुपजायतइति कालव्यवहारनिवर्तनचतुरैव सा ॥

एतद्दूषयितुमाह ॥

तस्यां यद्बीजमाहितम् ।

---

(१) बुद्धिरेका ऽसौ भागवर्जितेति पा० २ ।

तत्त्वनानात्वयोस्तस्य
निरुक्तिर्नावतिष्ठते ॥ २६ ॥

तस्यां बुद्धौ यदाहितं पदार्थमात्राभिरनुभववशाद्बीजं वासनारूपं संस्कारस्वभावं तत्किं व्यतिरिक्तं तस्या उताव्यतिरिक्तमिति द्वयी गतिः । व्यतिरेके तस्यास्तेन न किञ्चिदिति कथं तद्वशात्क्रमादिको व्यवहारः । अव्यतिरेके पुनरपि सैवैका निर्विभागेति पदार्थमात्रावत् कालव्यवहारं कथं निर्वाहयेदिति तत्त्वनानात्वाभ्यां निर्वचनं बुद्धेः कर्त्तुं न पार्यतइति यत् किञ्चिदेतत् ॥ २६ ॥

पुनश्चातकाण्डकललवदविभक्ता एव युक्ता इति प्रतिपादयितुमाह ॥

भावनासमये त्वेतत् क्रमसामर्थ्यमक्रमम् ।
व्यावृत्तभेदो येनार्थो भेदवानुपलभ्यते ॥ २७ ॥

ब्रह्मकाण्डे सर्वशङ्कानिवारणपूर्वकं स्फोटस्वरूपं निरूपितमेव । तस्मादेतद्वाक्यमक्रमं स्फोटस्वभावमेकं वाचकं स्वपदार्थभावनावसरे तूपाधिवशात्क्रमसामर्थ्यं क्रमे सामर्थ्यं शक्तिर्यस्य तत्क्रमसामर्थ्यमवगतम् । येनार्थो वाच्यस्वरूपो व्यावृत्तभेदो ऽखण्ड एव पदार्थोपाधिवशाद्भेदवानिवोपलभ्यते न परमार्थतः ॥ २७ ॥

यस्य पुनस्तानि पदान्येवोपलभ्यमानानि वस्तुसन्ति वाक्ये ऽभिमतानि न तद्व्यतिरिक्तमेकमनंशमस्त्यखण्डस्वभावं वाक्यम् । तस्य पदान्यपि न वर्णव्यतिरेकेण विद्यन्ते । वर्णा अपि भागवन्त इति प्रकर्षप्राप्तो भेद एव सर्वत्र स्यादिति पदवादिनं दूषयितुमाह ॥

पदानि वाक्ये तान्येव वर्णास्ते च पदे यदि ।
वर्णेषु वर्णभागानां भेदः स्यात्परमाणुवत् ॥ २८ ॥

यथावयवव्यतिरेकेणावयविन एकस्यानङ्गीकरणे ऽवयवानामपि भागवत्त्वाद्भागपरिकल्पनाया अतिप्रसङ्गात् परमाणूनामवशेषः । ते-

शामपि केषां चिन्मते षट्केन युगपद्योगात्सांशतायामणीयसोप्यवयवस्यानुपपत्तिः । अतश्च व्यपदेश्यपदार्थविरहितं निरीहमेव जगदापतितम् ॥ २८ ॥

तथैव वर्णभागानामनुपश्लेषान्न वर्ण एकः कश्चित्स्यात् तदभावे पदमपि न भवेदिति प्रतिपादयितुमाह ॥

भागानामनुपश्लेषान्न वर्णो न पदं भवेत् ।
तेषामव्यपदेश्यत्वात्किमन्यदपदिश्यताम् ॥ २९ ॥

अतश्चोक्तरीत्या भागानामसत्त्वाद्व्यपदेशविरहात्किमत्र वाचकमेतद्व्यतिरिक्तमन्यदपदिश्यताम् । अखण्डस्यानङ्गीकरणात्पदानामुक्तेन न्यायेनानुपपत्तेरिति न कश्चिद्वाचकः स्यात् । अस्ति च वाक्यार्थस्य प्रतीतिः सा सनिमित्ता भवितुमर्हतीत्येक एव नित्यः पदाभिधेयो (१) ऽखण्डो व्यक्तिस्फोटो जातिस्फोटो वा वाचको ऽङ्गीकार्य इति सिद्धान्तः ॥ २९ ॥

एवं तावद्वह्वीरूपं व्यक्तिस्फोटं जातिस्फोटं वा वाचकमाश्रित्य वाक्यं व्याख्यातम् । इदानीमन्तरे वानवयवं बोधस्वभावं शब्दार्थमयं निर्विभागं शब्दतत्त्वमिति यन्नीतं तदेव नादैर्बहिः प्रकाशितं वाक्यमाहुराचार्या इत्यान्तरं बुद्ध्यनुसंहृतिरित्युद्दिष्टं व्याख्यातुमाह ॥

यदन्तः शब्दतत्त्वं तु नादैरेकं (२) प्रकाशितम् ।
तदाहुरपरे शब्दं तस्य वाक्ये तथैकता (३) ॥ ३० ॥

वाक्यविचारे प्रस्तुते तस्यान्तरस्यैकतास्तु निरंशतैव प्रतिपाद्यतइति तदेव सत्यत्वाद्वाक्यमस्तु किं तद्व्यतिरिक्तेनासत्येन वाक्येनेत्यर्थः ॥३०॥

---

(१) पदाभिव्यङ्ग्य इति पा० २ ।
(२) भागैरेकमिति पा० २ ।
(३) तथैकतामिति पा० २ ।

न केवलं वाक्यं तथा यावद्वाक्यार्थोऽप्यखण्डः प्रतिभात्मकः पदार्थभागैरभिव्यज्यतइति प्रसङ्गादाह ॥

अर्थभागैस्तथा तेषामान्तरोऽर्थः प्रकाश्यते ॥ ३०ऽऽ ॥

तेषामान्तरवाक्यवादिनामाचार्य्याणां मते आन्तर एवात्रापि वाक्यार्थ इति बोद्धव्यम् ॥ ३०ऽऽ ॥

तौ च शब्दार्थावभिन्नावेकस्यान्तरस्य तत्त्वस्य सम्बन्धिनौ वस्तुतः बहिः स्थितौ भेदाविव प्रतिभासेते इति बोध्यमित्याह ॥

एकस्यैवात्मनो भेदौ शब्दार्थावपृथक्स्थितौ ॥ ३१ ॥

ननु शब्दार्थौ वाच्यवाचकाविति प्रसिद्धमतः कथं तयोरभेद इत्याशङ्क्याह ॥

प्रकाशकप्रकाश्यत्वं कार्यकारणरूपता ।
अन्तर्मात्रात्मनस्तस्य शब्दतत्त्वस्य सर्वदा ॥ ३२ ॥

तस्य हि शब्दतत्त्वस्यान्तरस्य ज्योतीरूपस्य शक्तिभेदादयं भेदप्रतिभासो न विरुद्धः । एतच्चादावुक्त (१) मागमकाण्डएकस्य सर्वबीजस्येत्यादिना ॥ ३२ ॥

इदमपि तस्य शक्तिभेदादवभासतइति प्रसङ्गादाह ॥

तस्यैवास्तित्वनास्तित्वसामर्थ्ये समवस्थिते ।
अक्रमे क्रमनिर्भासे व्यवहारनिबन्धने ॥ ३३ ॥

तस्य तदेवैकं निर्विभागं परं तत्त्वमाश्रित्याशयं सकललोकसंव्यवहारः शक्तिभेदात्प्रतीयते । किं पुनरयं वाच्यवाचकविभागमात्ररूप इत्यखण्डपक्ष एव युक्तः ॥ ३३ ॥

इदानीं पदवादिमतमाशङ्क्य पुनरपि दूषयितुमाह ॥

संप्रत्ययप्रमाणत्वात्पदार्थास्तित्वकल्पने ।

---

(१) एवेति पुस्तकान्तरे ऽधिकमत्र ।

पदार्थाभ्युच्चये त्यागादानर्थक्यं प्रसज्यते ॥ ३४ ॥

यदि पदार्थसंप्रत्ययः प्रमाणं पदपदार्थसत्तायामुच्यते तदा देवदत्त गामभ्याज शुक्लां दण्डेनेत्यस्मिन्वाक्ये पूर्वपूर्वपदार्थानामुत्तरोत्तरपदार्थाभ्युच्चये स्वार्थत्यागात्तत्तत्पदोपादानस्यानर्थक्यं प्रसज्यते। ततश्चानर्थकस्योच्चारणवैफल्यादुच्चारिताद्वा तस्माच्छब्दमात्रात्पदार्थप्रत्ययस्यानुपपत्तेः किंनिबन्धना वाक्यार्थप्रतीतिः स्यादिति यत्किंचिदेतत् ॥ ३४ ॥

तथा च पदानामव्यवस्थितेः पदवादोऽनुपपन्न एव लक्ष्यते इत्यभिधातुमाह ॥

राजशब्देन राजार्थो
भिन्नरूपेण गम्यते ॥ ३४ऽऽ ॥

राजा राजानं राज्ञा राज्ञे राज्ञो राज्ञि राजनीत्येवमनियतस्वरूपेण राजपदेन राजार्थप्रतीतिर्दृश्यते । यदि पदस्य सत्यता स्यात्तदा नियतं तत्परिदृश्येत सर्वत्र न च दृश्यते ऽतो मन्यामहे मिथ्यैव पदानीति ॥ ३४ऽऽ ॥

इतोपि नास्ति पदमित्याह ॥

वृत्तावाख्यातसदृशं पदमन्यत्र युज्यते ।। ३५ ।।

राजपुरुष इत्यस्यां वृत्तौ राजशब्द आख्यातसदृशः ततश्च हे राजपुरुषेत्यत्र राज भ्राजस्व पुरुषेत्यर्थप्रतीतिः स्यात् न चैतदिष्टं तस्मात्पारमार्थिकानि पदानि न सन्त्येव ॥ ३५ ॥

न केवलं केवलानां नियतरूपासंभवस्तेषां यावद्वृत्तावपि स्थितानामित्याह ॥

यथाश्वकर्ण इत्युक्ते विनैवाश्वेन गम्यते ।
कश्चिदेव विशिष्टोर्थः सर्वेषु प्रत्ययस्तथा ॥ ३६ ॥

अश्वकर्ण इत्यत्राश्वपदार्थेन विनैव जात्यन्तरविशिष्टः कश्चिदर्थो गम्यते। तस्मात्सर्वेष्वपि पदेषु परामृष्टविभागेषु वाक्याभिव्यञ्जकेषु सत्स्वखण्डवाक्यावगतिपूर्वको वाक्यार्थप्रत्यय इत्येव युक्तम् ॥ ३६ ॥

ननु एवं सति योयं रूढ्यरूढिविभागः शब्दानामुच्यते स वृथेत्या-शङ्क्याह ॥

वाक्ये त्वर्थान्तरगतेः सादृश्यपरिकल्पने।
केषां चिद्रूढिशब्दत्वं शास्त्रएवानुगम्यते ॥ ३७ ॥

वृत्तिवाक्ययोः सादृश्यपरिकल्पने केषां चिच्छब्दानां वाक्ये विग्रहरूपे ऽर्थान्तरप्रतीतेः रूढिशब्दत्वमुच्यते यथा तैलपायिकेति। अत्र तैलं पिबतीति वाक्यवेलायामर्थप्रादुर्भावः। वृत्त्यवस्थायां तैलपायिकेति जात्यन्तरयुक्तार्थस्य कस्य चित्प्रतीतिः। न च तस्य तैलपानक्रिया लक्ष्यतइति रूढिरूपतास्योच्यते। केषां चित्तु वृत्तिवाक्ययोरर्थस्य सादृश्यात् यौगिकत्वम्, यथा राजपुरुष इति। परिकल्पनइत्यनेन सर्वमेतदवयवविभागादिकं शास्त्रसमयएव कल्पनामात्रम्। परमार्थतस्तु व्यवहारकाले निर्विभागमेवोपलभ्यतइति प्रतिपाद्यते। एतदेव शास्त्रएवानुगम्यतइत्यनेन व्यक्तीकृतम् ॥ ३७ ॥

कथमेतदुच्यतइत्याह ॥

उपादायापि ये हेयास्तानुपायान् प्रचक्षते ॥३७ऽऽ॥

शास्त्रमुपायः शब्दपरिज्ञाने। ज्ञातेषु च तेषु प्रयोजनसंपत्तेरनुपयोग इति तस्य परित्यागः ॥ ३७ ॥

उपायाश्च न नियता इत्याह ॥

उपायानां च नियमो नावश्यमवतिष्ठते ॥ ३८ ॥
अर्थं कथं चित्पुरुषः कश्चित्संप्रतिपद्यते ॥ ३८ऽऽ ॥

कश्चिदाचार्यः पाणिनिविरचितेन लक्षणशास्त्रेण शब्दानधिगच्छ-

ति कश्चिदन्येनेति न नियमः । एतदेव स्पष्टीकृतमर्थं कथं चिदि-त्यादिना ॥ ३८ ॥

तस्मात्संसृष्टस्य विभक्तस्य वार्थविशेषस्य वाक्यमेकमनंशमेव प्रतीतिनिबन्धनमिति पदपदार्थप्रविभागकल्पनमसमञ्जसमेवेति प्रतिपादयितुमाह ॥

संसृष्टा वा विभक्ता वा भेदा वाक्यनिबन्धनाः ॥३९॥

अतश्च निरंश एवायं पदार्थशून्यो वाक्यार्थोध्यासमात्रसंबन्धगर्भ एकस्मादपि वर्णात्प्रतीयतएवेत्यभिधातुमाह ॥

सोयमित्यभिसंबन्धो बुद्ध्या प्रक्रम्यते यदा ।
वाक्यार्थस्य तदैकोपि वर्णः प्रत्यायकः क्व चित् ॥४०॥

सोयमित्यभिसम्बन्धो ऽध्यासरूपो वाक्यार्थस्य वाक्येन सह यदा वक्त्रा प्रक्रम्यते । तदैकोपि वर्णो वाक्यार्थस्य वाचको भवत्येव । किं पुनरनेकमशेषविशेषा (१) भिधानविवक्षयोदीरितं पदमिति । एवमध्यासवशाद्वाक्यवाक्यार्थयोरभिन्नस्वरूपत्वाद्वाक्यार्थाभिव्यक्तौ वाक्यमपि स्फोटात्मकमभिव्यक्तमेवेत्युक्तं वाक्यार्थस्य तदैकोपीत्यादि ॥ ४० ॥

इदानीमभिहितान्वयपक्षसमाश्रयणेन संघातपक्षस्य प्रदर्शनायाह ॥

केवलेन पदेनार्थो यावानेवाभिधीयते ।
वाक्यस्थं तावतो ऽर्थस्य तदाहुरभिधायकम् ॥ ४१ ॥
संबन्धे सति यत्त्वन्यदाधिक्यमुपजायते ।
वाक्यार्थमेव तं प्राहुरनेकपदसंश्रयम् ॥ ४२ ॥

केवलं पदं यस्यैवार्थस्य वाचकम् । वाक्यस्थमपि तमेवाभिदधाति

(१) विशेषेति पुस्तकान्तरे नास्ति ।

ततः समुदये पदानां परस्परान्वये पदार्थवशाद्यदाधिक्यं संसर्गः स वाक्यार्थः । उक्तं च । यदत्राधिक्यं वाक्यार्थः स इति । अनेकपदसंश्रयमित्यनेन संघातो वाक्यमिति दर्शितम् ॥ ४२ ॥

वाक्यार्थस्य जातिवत्प्रत्येकपरिसमाप्तिः केषां चिन्मते संख्यावत्समुदायपरिसमाप्तिरिति पक्षद्वयं दर्शयितुमाह ॥

स त्वनेकपदस्थोपि प्रतिभेदं समाप्यते ।
जातिवत्समुदायेपि संख्यावत् कल्पते परैः ॥ ४३ ॥

अथात्र संघातपक्षएव प्रकारान्तरेणान्विताभिधानप्रदर्शनात्पदार्थ एव वाक्यार्थ इति प्रक्रमितुमाह ॥

सर्वभेदानुगुण्यं तु सामान्यमपरे विदुः ।
तदर्थान्तरसंसर्गाद्भजते भेदरूपताम् ॥ ४४ ॥

सर्वेषां भेदानामानुगुण्यं यस्मिन् तत्तथाविधं सामान्यं संसर्गलक्षणमाकाङ्क्षायोग्यतासन्निधानवशेन पदान्तरसंसर्गान्नियतस्वरूपं वाक्यार्थः ॥ ४४ ॥

तत्र चाकाङ्क्षावसरे येयमस्फुटरूपता वाक्यार्थस्य तामितरपदार्थसंनिधिर्निवारयतीत्याह ॥

भेदानाकाङ्क्षतस्तस्य या परिप्लवमानता ।
अवच्छिनत्ति संबन्धस्तां विशेषे निवेशयन् ॥ ४५ ॥

पूर्वत्र पदानां वाक्ये तावानेवार्थो यावानेव केवलानां संसर्गस्तु संघातवाच्यः । इह तु तथाभूत एव सामान्यरूपः पदस्यार्थः यस्तत्तद्विशेषसन्निधौ तत्तद्विशेषविश्रान्त इति ॥ ४६ ॥

संघातपक्षे संसर्गो वाक्यार्थ इत्युक्तं स च पूर्वत्र जातिवत् संख्यावद्वा पदार्थव्यतिरेकेण वाक्यार्थत्वेन कल्पित इदानीं पदार्थव्यतिरेकेणासन्नेवैकान्तानुमेयो न समुदायवाच्यः किं तर्हि सर्वभे-

दानुगुणसामान्यरूपो विशेषान्तरसन्निधानाद्विशेषविश्रान्तः पदार्थ एव वाक्यार्थ इति दर्शयितुमाह ॥

कार्यानुमेयः संबन्धो रूपं तस्य न दृश्यते ।
असत्त्वभूतमत्यन्तमतस्तं प्रतिजानते ॥ ४७ ॥

कार्येण पदार्थानां विशेषविश्रान्तिलक्षणेनानुमीयतइति कार्यानुमेयः । इदं तदिति तु रूपं तस्य न दृश्यते । अत एवासत्त्वभूतं पदार्थव्यतिरेकेण सत्त्वं नास्ति यस्य तमेवंभूतमाचार्याः प्रतिजानते ॥४७॥

एतदेव व्यक्तीकर्तुमाह ॥

नियतं साधने साध्यं क्रिया नियतसाधना ।
स सन्निधानमात्रेण नियमः सन् प्रकाशते ॥ ४८ ॥

साध्यं साधनं च परस्परं नियतमेव केवलमाकाङ्क्षावशादितरपदार्थसंनिधाने सति नियमः सन्नेव प्रकाशतइत्याक्षिप्तपदान्तराणि पदान्येव वाक्यं, पदार्थाश्च वाक्यार्थ इत्यव्यतिरिक्तः संघातपक्षोयम् ॥ ४८ ॥

अथात्र परस्परापेक्षायां समानायां विशेषमभिधातुमाह ॥

गुणभावेन साकाङ्क्षं तत्र नाम प्रवर्त्तते ।
साध्यत्वेन निमित्तानि क्रियापदमपेक्षते ॥ ४९ ॥

नाम कारकपदं क्रियायां गुणभूतं सत् पदान्तरमाकाङ्क्षति । क्रियापदं तु प्रधानभावेनावस्थितं कारकपदान्यपेक्षते इति ॥ ४९ ॥

क्रमो वाक्यमित्युद्दिष्टम् । क्रमपक्षं व्याख्यातुमाह ॥

सन्त एव विशेषा ये पदार्थेषु व्यवस्थिताः ।
ते क्रमादनुगम्यन्ते न वाक्यमभिधायकम् ॥ ५० ॥

पदार्थेषु देवदत्तादिपदवाच्येषु गोकर्मिकायामभ्याजक्रियायां देव-

दत्तपदार्थस्य कर्तृत्वं गोपदार्थस्य देवदत्तकर्तृकायां कर्मत्वमित्यादयो विशेषाः सन्त एव पदेभ्यः क्रमेण प्रतीतेभ्योवगम्यन्तइति क्रम एव वाक्यं न वाक्यमभिधायकमित्यनेन क्रमव्यतिरेकेण शब्दात्मकं न वाक्यमभिधायकमस्तीत्युच्यते ॥ ५० ॥

एतदेव स्फुटीकुर्वन्नाह ॥

शब्दानां क्रममात्रे च

नान्यः शब्दोस्ति वाचकः ॥ ५०ऽऽ ॥

अनपेक्षितविशिष्टानुपूर्वीकः क्रमः क्रममात्रम्। तस्मिन्सत्यर्थप्रतीतेर्नान्यस्तद्व्यतिरिक्तः कश्चित्स्फोटादिः शब्दो वाचकोभ्युपगन्तुं युक्तः। अपि तु क्रम एवोपलभ्यमानो वाचकः ॥ ५०ऽऽ ॥

अथ क्रम इति किमुच्यतइत्याह ॥

क्रमो हि धर्मः कालस्य तेन वाक्यं न विद्यते ॥ ५१ ॥

क्रमवत्पदपदार्थोपाधिवशेनापि कालस्य स धर्म उच्यते ॥ ५१ ॥

युक्तं चैतत्। यत्क्रम एव वाक्यमित्याह ॥

ये च संभविनो भेदाः पदार्थेष्वविभाविताः ।

ते संनिधाने व्यज्यन्ते न तु वर्णेष्वयं क्रमः ॥ ५२ ॥

पदार्थेषु ये भेदाः पूर्वोक्ताः सन्ति ते केवलेष्वविभाविताः सन्तः क्रमवत्पदार्थान्तरसंनिधानेभिव्यज्यन्तइति दर्शनात्क्रम एव वाक्यमिति पदक्रमो वाक्यमुक्तम् । वर्णक्रमस्तु न तथेत्युक्तं न तु वर्णेष्वयंक्रम इति ॥ ५२ ॥

एतदेवोपसंहारेण स्फुटयितुमाह ॥

वर्णानां च पदानां च

क्रममात्रनिवेशिनी ।

पदाख्या वाक्यसंज्ञा च ॥ ५२ऽऽऽ ॥

वर्णक्रमः पदमुच्यतां नाम । वाक्यसंज्ञा पदक्रमएव युक्ता तथार्थ-प्रतीतिदर्शनात् ॥ ५२ऽऽऽ ॥

क्रम एव शब्दो न वर्णपदे इत्युक्तमुपसंहर्तुमाह ॥

शब्दत्वं नेष्यते तयोः ॥ ५३ ॥

तयोर्वर्णपदयोः शब्दत्वं श्रोत्रेन्द्रियग्राह्यत्वेपि वाचकत्वलक्षणं ने-ष्यते अपि तु क्रमस्यैव ॥ ५३ ॥

पदक्रमस्य शब्दत्वं वाक्यार्थेनार्थवत्तायाम् । वाक्यार्थभागैस्तु पदा-नामर्थवत्त्वम् । एवं वर्णक्रमस्यापि शब्दत्वं पदार्थेनार्थवतः तदर्थवतां वर्णानां किं नाङ्गीक्रियतइत्याह ॥

समानेपि तु शब्दत्वे दृष्टः संप्रत्ययः पदात् ।
प्रतिवर्णं त्वसौ नास्ति पदस्यार्थमतो विदुः ॥ ५४ ॥

वर्णपदलक्षणस्योभयरूपस्यास्य शब्दत्वे समाने पदानां क्रमाद्वा-क्यार्थस्यावगमो दृश्यते न वर्णादित्यतः पदान्येवार्थवन्ति । तत्क्रम-स्यैव वाक्यं संसर्गो वाक्यार्थ इति ॥ ५४ ॥

इदानीं संघातः क्रमस्तथैकोनवयवश्च शब्दः स्फोटात्मेति व्या-ख्यातानि त्रीणि वाक्यलक्षणानि श्लोकत्रयेणोपसंहरति । तत्र संघा-तपक्षमुपसंहर्तुं तावदाह ॥

यथा सावयवा वर्णा विना वाच्येन केन चित् ।
अर्थवन्तः समुदिता वाक्यमप्येवमिष्यते ॥ ५५ ॥

वर्णानां समुदायार्थवत्त्वे केवलानामनर्थकत्वं यथा तथा पदानां केवलानामर्थासंभवात्तत्समुदाय एव वाक्यमिति ॥ ५५ ॥

व्याख्यातं क्रमपक्षमप्युपसंहर्तुमाह ॥

अनर्थकान्युपायत्वात्पदार्थेनार्थवन्ति वा ।

क्रमेणोच्चरितान्याहुर्वाक्यार्थं भिन्नलक्षणम् ॥ ५६ ॥

पदानि केवलान्यनर्थकानि केषां चिन्मते स्वार्थेनार्थवन्ति क्रमेणोच्चारितानि वाक्यम् । तथाविधाद्वाक्याद्वाक्यार्थं भिन्नलक्षणं व्यतिरिक्तस्वरूपं संसर्गात्मकं विशिष्टमेव वा संसर्गवशान्निराकाङ्क्षविशेषावस्थितपदार्थस्वरूपमेव व्यतिरिक्तमवगम्यत इति ॥ ५६ ॥

स्फोटपक्षमप्युपसंहर्तुमाह ॥

नित्यत्वे समुदायानां
जातेर्वा परिकल्पने ।
एकस्यैवार्थतामाहु-
र्वाक्यस्याव्यभिचारिणीम् (१) ॥ ५७ ॥

इह देवदत्त गामभ्याज शुक्लां दण्डेनेत्यादिकानि भिन्नवदुदीरितानि पदसमुदायात्मकानि शब्दरूपाद्भिन्नान्येव । अयमर्थः । तत्र-तत्र वक्तरि भिन्ना अपि ध्वनय एकमेव स्फोटं व्यक्तिस्फोटात्मकं नित्यमभिव्यञ्जन्ति । देवदत्त गामभ्याजेत्यादिकेषु भिन्नवक्तृदीरितेषु वा स्फोटजातिर्नित्या देवदत्तपदसमुदायाभिव्यङ्ग्या वाक्यार्थस्यैकस्य प्रतिभात्मकस्य प्रतिपादिकेति मतभेदाज्जातिव्यक्तिस्फोटोपसंहारः ॥ ५७ ॥

तदेवं संघातादीनि त्रीणि वाक्यलक्षणानि व्याख्यातानि आख्यातं वाक्यमिति व्याख्यास्यति । एषां च मध्यादिति (२) सूत्रकाराभिप्रायमनुसृत्याखण्डपक्ष एव वाक्यवाक्यार्थयो (३) रभ्युपगम्यत इति प्रदर्शितम् । इदानीं भाष्यकाराभिप्रायेणापि स एवाभ्युपगन्तव्य

---

(१) एकस्यैकार्थतामाहुर्वाच्यस्याव्यभिचारिणीमिति पा० २ ।
(२) पूर्वोक्तमिदम् ।
(३) उभयोरिति पुस्तकान्तरेऽधिकम् ।

इत्युपक्रम्यते । तथा च भाष्यं 'न लक्षणेन पदकारा अनुवर्त्याः पदकारैर्नाम लक्षणमनुवर्त्त्यम्' । तथा । 'यथालक्षणमप्रयुक्त'इति । अत्र यदि पदानां सत्यता स्यात् तदा तेषां स्वत एव सिद्धत्वात् पदानि कुर्वन्तीति पदाकारा इत्येतदसङ्गतं स्यात् । लक्षणेन च तदननुवर्त्तनं वस्तुसत्त्वात्तेषां पदकारैर्नाम लक्षणमनुवर्त्यमित्यप्यसंगतम् । तथा ऽप्रयुक्तपदविषये पदानां सत्यत्वात् तत्प्रविभागो ऽयं न सिद्ध इति । यथालक्षणं लक्षणानुसारेण पदकरणमप्रयुक्तमित्येतदनुपपन्नमेव । आह चैवं भाष्यकारः । तस्मान्मन्यामहे पदान्यसत्यानि एकमभिन्नस्वभावकं वाक्यम् । तदबुधबोधनाय पदविभागः कल्पित इति । तदेवाभिधातुमाह ॥

अभेदपूर्वका भेदाः
कल्पिता वाक्यवादिभिः ॥ ५७ऽऽ ॥

यत एवं सूत्रकारस्य भाष्यकारस्य चाखण्डपक्षो ऽभिरुचितः । तस्माद्वाक्यवादिभिः स्फोटवादिभिरभेदकल्पनमाश्रितम् । काल्पनिकः पदवादो ऽभ्युपगत इत्यर्थः ॥ ५७ऽऽ ॥

पदवादिमतमपि प्रसङ्गादुपदर्शयति ॥

भेदपूर्वानभेदांस्तु मन्यन्ते पददर्शिनः ॥ ५८ ॥

भेदप्रतिभासपूर्वकानभेदान् स्वाभिमतान् पददर्शिनः पदमेव सत्यं ये मन्यन्ते तेऽप्येकमखण्डं वाक्यं नाम काल्पनिकमाहुः ॥ ५८ ॥

अथ यदि नैवं स्थितिः तत्कथं पदप्रकृतिः संहितेति प्रातिशाख्यम् । अत्र हि पदानि प्रकृतिर्यस्याः संहिताया इत्यर्थो व्याख्यायते । पदानां चासत्यत्वात् तत्कारणिका संहिता ऽप्ययुक्ता स्यादित्यालोच्याखण्डपक्षेणाप्येतत्संवादयितुमाह ॥

पदप्रकृतिभावश्च वृत्तिभेदेन वर्ण्यते ॥ ५८ऽऽ ॥

वृत्तिभेदमेव प्रदर्शयितुमाह ॥

पदानां संहिता योनिः संहिता वा पदाश्रया ॥ ५९ ॥

अखण्डपक्षे पदप्रकृतिः संहितेति षष्ठीसमासेन व्याख्यायतइत्यर्थः ॥ ५९ ॥

इदानीं येनाभिप्रायेण भाष्ये न लक्षणेनेत्यादिकमुक्तं तमभिव्यक्तुमाह ॥

पदाम्नायश्च यद्यन्यः संहिताया निदर्शकः ।
नित्यस्तत्र कथं कार्यं पदं लक्षणदर्शनात् ॥ ६० ॥

यदि हि पदाम्नायः संहिताप्रदर्शको नित्यः सत्यभूतोभ्युपगतस्तदा कथं लक्षणदर्शनात् पदं कार्यमिति न लक्षणेन पदकारा इत्यादिना भाष्यकारो दर्शयेत् । यतश्च पदान्यसत्यानि तस्य प्रतिभासन्ते तत एवमभिहितमिति भाष्यकारस्याप्यखण्डपक्षोभिप्रेत इति दर्शितम् ॥ ६० ॥

इदानीं पदवादिनं प्रति दूषणमाह ॥

प्रतिवर्णमसंवेद्यः पदार्थप्रत्ययो यथा ।
पदेष्वेवमसंवेद्यं वाक्यार्थस्य निरूपणम् ॥ ६१ ॥

देवदत्तादौ पदे यथा न दकारादि वर्णंवर्णं प्रति देवदत्तप्रत्ययो जायते । तथैव देवदत्त गामभ्याजेत्यादिवाक्यार्थस्य देवदत्तादि पदंपदं प्रति नास्ति प्रत्ययो ऽत उच्यते एतान्यनर्थकान्येव वाक्यादेवार्थप्रतीतिदर्शनात् वाक्यमेवार्थवदिति ॥ ६१ ॥

एतावत् प्रतिविधातुं पदवाद्याह ॥

वाक्यार्थः संनिविशते पदेषु सहवृत्तिषु ।
यथा तथैव वर्णेषु पदार्थः सहवृत्तिषु ॥ ६२ ॥

इह पदे वर्णा अर्थवन्तो वाक्ये पदान्यपीति द्रष्टव्यम् । केवलं य-

था समुदितेषु पदेषु सत्सु वाक्यार्थः संनिविशते स्वरूपं प्रतिलभते । तथैव वर्णेष्वपि बुद्धौ सहवृत्तिष्वेव पदार्थ उपजायतइति । नैतावता वर्णदृष्टान्तेन पदानामनर्थकत्वम् ॥ ६२ ॥

एतदेव दृष्टान्तेन दर्शयितुमाह ॥

सूक्ष्मं ग्राह्यं यथा ऽन्येन संसृष्टं सह गृह्यते ।
वर्णो ऽप्यन्येन वर्णेन संबद्धो वाचकस्तथा ॥ ६३ ॥

ग्राह्यमपि सूक्ष्मं वस्तु रजःप्रभृति यथा ऽन्येन केन चित्सजातीयेन विलक्षणेन वा संसृष्टं सद् गृह्यते एवमर्थवानपि वर्ण एकैकं न संप्रत्यायको ऽन्येन संसृष्टस्तु वाचक एव । एतदुक्तं भवति । अर्थवन्त एव वर्णाः प्रतिपत्ता तु पाटवविरहादेकैकं न तथा गृह्यन्तइति नात्र तेषामपराधः ॥ ६३ ॥

न चानर्थकमेव पदमिति वक्तुं युक्तं प्रत्यक्षविरोधादित्याह ॥

पदस्योच्चारणादर्थो यथा कश्चिन्निरूप्यते ॥ ६३ऽऽ ॥

नहि किं चित् पदं केन चिदर्थेनानिरूपितमिति युज्यते वक्तुमनुभवविरोधात् ॥ ६३ऽऽ ॥

यथा चैवं पदोच्चारणकाले ऽस्ति का चिदर्थप्रतीतिरेवं तेनैवार्थेन संहता अप्यर्थवन्त इति प्रतिपादयितुमाह ॥

वर्णानामपि सान्निध्यात्तथा सो ऽर्थः प्रतीयते ॥ ६४ ॥

केवलं सान्निध्यात्सहोच्चारणादसावर्थस्तेषां प्रतीयते । तस्माद्यथा समुदिताः परस्परशक्त्यावेशाद्वर्णा वाचका एवं पदान्यपि तथैवेति वर्णपदव्यतिरेकेण वाक्यं नाम नास्तीति । तदुक्तम् । "यावन्तो यादृशा ये च यदर्थप्रतिपादने । वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधका" इति ॥ ६४ ॥

यदि च पदार्थनिबन्धनो वाक्यार्थावभासो नाङ्गीक्रियते तदा प्र-

तिनिधिकल्पनं पिकादिनियतपदप्रश्नः श्रुतिवाक्ययोर्विरोधे श्रुतिर्बलीयसीत्यवान्तरवाक्यानामर्थवत्त्वं च न स्याल्लक्षणानुपपत्तिश्चेति पञ्च चोद्यान्यापतन्ति । तानि क्रमेण प्रदर्शयितुमाह ॥

प्राप्तस्य यस्य सामर्थ्यान्नियमार्था यतः(१) श्रुतिः ।
तेनात्यन्तं विशेषेण सामान्यं यदि बाध्यते ॥ ६५ ॥

इह यजेतेत्याख्यातपदप्रतिपाद्यो यजनविधिरुपदिश्यते । तत्र क्रियाप्रधानमाख्यातमित्यत्र यजतिक्रिया साधननिर्वर्त्येत्यसौ कारकमात्रस्याक्षेपिका । कदा चिद्विशिष्टस्यैवेति द्वयी गतिः । तत्र यस्य व्रीहित्वस्य यजतिक्रियासामर्थ्यात्प्राप्तस्य व्रीहिभिर्यजेतेति पुनर्व्रीहिश्रुतिरुच्चरन्ती नियममवगमयति व्रीहिभिरेव न यवैरिति । ततश्च तेन द्रव्यविशेषेणात्यन्तं द्रव्यसामान्यमात्रं यदि बाध्यते ॥ ६६ ॥

अतः किमित्याह ॥

यजेतेति यदा (२) द्रव्यं प्राप्तं सामर्थ्यलक्षणम् ।
व्रीहिश्रुत्या निवर्त्तेत न स्यात्प्रतिनिधिस्तदा ॥ ६७ ॥

यजेतेत्येतया क्रियया निःसाधना क्रिया न भवतीति सामर्थ्याद्यदाक्षिप्तं द्रव्यमात्रं तद्व्रीहिभिर्यजेतेति पुनर्व्रीहिश्रुत्या बाधितं सन्निवर्तेत तदभावे प्रतिनिधिर्न स्यात् । क्रियया द्रव्यमात्राक्षेपे व्रीहिलक्षणस्य द्रव्यस्याभावे तत्सदृशं द्रव्यान्तरमेव नीवारादिकं समानीय तन्निर्वर्त्तनं क्रियते । विशिष्टद्रव्याक्षेपे तु तया क्षते तदुपादानं नियमाय पर्यवस्यतीति कथं व्रीहिकरणकं यजनमन्यो निर्वर्त्तयेदिति प्रतिनिध्यभावः । तस्माद् द्रव्यमात्राक्षेपे प्रतिनिध्युपपत्तिः ॥ ६७ ॥

तदेतदेव दर्शयितुमाह ॥

---

(१) पुनरिति पा० २ ।
(२) तत इति पा० २ ।

तस्माद् व्रीहित्वमधिकं व्रीहिशब्दः प्रकल्पयन् (१) ।
द्रव्यत्वमविरुद्धत्वात्प्राप्त्यर्थः सन्न बाधते ॥ ६८ ॥

तस्माद्द्रव्यमात्राक्षेपे व्रीहिशब्दो ऽत्र प्राप्त्यर्थो व्रीहित्वमात्रप्रापणप्रयोजनो व्रीहित्वमेवाधिकं कृत्वा ऽभ्युपकल्पयन् प्रकटीकुर्वन् द्रव्यत्वं न बाधते अविरुद्धत्वात् । सामान्यस्य विशेषेण सहाविरोधात् ॥ ६८ ॥

अतश्च किमित्याह ॥

तेन चापि व्यवच्छिन्ने द्रव्यत्वे सहचारिणि ।
असंभवाद्विशेषाणां तत्रान्येषामदर्शनम् ॥ ६९ ॥

तेन च व्रीहिशब्देन व्यवच्छिन्ने कृताभ्युच्चये दत्तोपचये द्रव्यत्वे सति । कीदृशि सहचारिणि अविरुद्धैकार्थसमवेते । द्रव्यविशेषाणां तत्रान्येषां समस्तानामसंभवाददर्शनमनाक्षेप एव ॥ ६९ ॥

एतदेवोन्मीलयितुमाह ॥

न च सामान्यवत्सर्वे क्रियाशब्देन लक्षिताः ।
विशेषा नहि सर्वेषां सतां शब्दो ऽभिधायकः ॥ ७० ॥

यजतिना हि क्रियाशब्देनात्र द्रव्यत्वसामान्यवत्सर्वे विशेषास्तदन्तर्गता न लक्षिता आक्षिप्ता अपि तु द्रव्यत्व(२)मेव । तदेव चाभ्युच्चयीकृतं व्रीहिशब्देन । सामान्यमात्राक्षेपः किमिति नाङ्गीक्रियतइत्याशङ्क्याह । नहीत्यादि । नहि सकलसंनिहितविशेषाभिधायकः शब्दः परिदृष्टः तथा ऽप्रतीतेः ॥ ७० ॥

एतदेव दृष्टान्तेन स्फुटीकर्तुमाह ॥

शुक्लादयो गुणाः सन्तो यथा तत्राविवक्षिताः ।
तथा ऽविवक्षा भेदानां द्रव्यत्वसहचारिणाम् ॥ ७१ ॥

---

(१) प्रकल्पयेदिति पा० २ ।

(२) द्रव्यत्वमात्रमिति पा० २ ।

व्रीहिभिरित्यत्र यथा शुक्लकृष्णादिगुणयोगो न विवक्षितः तथात्र व्रीहिभिर्यजेतेति भेदानां द्रव्यविशेषाणां सामान्याविरोधिनामविवक्षैवेति । ततश्च स्थितमेतत् । यदत्र यजतिक्रियाक्षिप्तद्रव्यमात्राभ्युच्चयाभिधायको व्रीहिशब्दो न द्रव्यविशेषवचन इति । ततश्च न क्रिया प्रतिनिधीयते द्रव्यं तु प्रतिनिधीयतइति मुख्याभावे तत्सदृशनीवारादिद्रव्यान्तरोपादानेन यागनिर्वृत्तिरिति प्रतिनिधिसमाश्रयणेन विध्यर्थानुष्ठानं सिध्यतीति न तदवसादः ॥ ७१ ॥

तदेतदेव प्रतिनिधिप्रयोजनमाह ॥

असंनिधौ प्रतिनिधिर्मा भून्नित्यस्य कर्मणः ।

काम्यस्य वा प्रवृत्तस्य लोप इत्युपदिश्यते (१) ॥ ७२ ॥

मुख्यस्यासन्निधाने ऽभावे मा भून्नित्यस्य कर्मणो लोप इति प्रतिनिधिरुपपद्यते । काम्यस्य वा प्रवृत्तस्य तथैव लोपो मा भूदिति । प्रवृत्तस्य काम्यस्येत्यनेनैतदाह । यन्मुख्याभावे काम्ये ऽप्रवृत्तिरेव न ज्यायसी । प्रवृत्तौ वा केन चिद्वैगुण्येनासंपत्तौ समुदायस्य(२) प्रतीतिः तत्रापि प्रतिनिध्युपादानेन तन्निर्वर्त्तनं विधेयम् । अन्यथा शिष्टविगर्हणलक्षणः प्रत्यवायः ॥ ७२ ॥

एवं द्रव्यमात्राक्षेपपक्षे प्रतिनिधिमुपपाद्येदानीं पदपदार्थानामनङ्गीकरणे ऽखण्डवादिनो दूषणमाह ॥

विशिष्टैव क्रिया येन वाक्यार्थः परिकल्प्यते ।

द्रव्याभावे प्रतिनिधौ तस्य तस्याक्रियान्तरम् ॥ ७३ ॥

येनाखण्डवाक्यवादिना व्रीहिकरणिका यजतिक्रिया निरस्तावयवार्था व्रीहिभिर्यजेतेत्यत्र वाक्यार्थ इत्युच्यते । तेन द्रव्यस्य व्रीहि-

---

(१) उपपद्यते इति पा० २ ।

(२) कर्तव्यतयेति शेषोऽत्र बोध्यः ।

BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PAṆḌITS OF THE BENARES SANSKṚIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH M. A.,

DIRECTOR OF PUBLIC INSTRUCTION, N. W. P. & OUDH,

& G. THIBAUT PH. DR.,

PRINCIPAL, BENARES COLLEGE.

No. 19.

श्रीविश्वनाथो विजयते ।

वाक्यपदीयं

साङ्गवैयाकरणसिद्धान्तनिरूपणं श्रीभर्तृहरिमहावैयाकरणविरचितं

श्रीपुण्यराजकृतप्रकाशाख्यटीकायुतम् ।

VÁKYAPADÍYA

A TREATISE ON THE PHILOSOPHY OF SANSKṚIT GRAMMAR BY BHARTṚIHARI,

WITH A COMMENTARY BY PUṆYARÁJA.

EDITED BY PAṆḌIT GAṄGÁDHARA ŚÁSTRÍ MÁNAVALLÍ,

PROFESSOR OF LITERATURE, SANSKRIT COLLEGE, BENARES.

Fasciculus II.

BENARES:

PUBLISHED BY MESSRS. BRAJ B. DAS & CO.

PRINTED AT THE BENARES PRINTING PRESS.

1886.

लक्षणस्याभावे यदा प्रतिनिधिसमाश्रयणेन तन्निर्वर्त्तनं कार्यं तदा व्रीहिभिर्यजेतेति व्रीहिकरणकयागलक्षणस्य वाक्यार्थस्य त्यागात् प्रतिनिधिना तन्निर्वर्त्तने नीवारकरणिका यजतिक्रिया ऽन्यैवानुष्ठिता भवतीति न क्रिया प्रतिनिधीयते द्रव्यं तु प्रतिनिधीयतइति न्यायस्योपेक्षणात् चोदितस्याकरणमेव स्यात् । अथ त्वया प्रतिनिधिर्नाश्रीयतइत्युच्यते, तन्न । मा भून्नित्यस्येत्यादिना तदाश्रयणस्य सप्रयोजनत्वादवश्याश्रयणीयः प्रतिनिधिरिति पदपदार्थानामभावे वाक्यस्याखण्डरूपस्याभ्युपगमे प्रतिनिध्यभाव इति चोद्यम् ॥ ७३ ॥

पिकादिनियतपदप्रश्नो नोपपद्यतइत्यप्यभिधातुमाह ॥

विज्ञातार्थं पदं यच्च तदर्थे प्रतिपादिते ।
पिकादि यदविज्ञातं (१) तत्किमित्यनुयुज्यते ॥७४॥

वनात् पिक आनीयतामित्युक्ते वनादानीयतामिति पदद्वयं विज्ञातार्थं तदर्थे चावगते कः पिक इति कस्य चिन्नागरिकस्य प्रश्नो नोपपद्यते किल । वनादित्याद्यखण्डमेव निरस्तपदप्रविभागं वाक्यमनंशमेव वाचकं वैयाकरणस्य मतम् । अतः किं पिकपदार्थः पृथगविज्ञातः कश्चिदस्ति । तदविज्ञातपिकपदार्थानुयोगो नोपपद्येत । अस्ति च तदर्थे कस्य चित्संदेह इति पृथगेवार्थवन्ति पदानि विज्ञातानि वाक्यमित्येव वक्तुं युक्तमिति ॥ ७४ ॥

इदानीं श्रुतिवाक्ययोर्विरोधे श्रुतिरेव बलीयसीति न्यायो न स्यादिति प्रदर्शयितुमाह ॥

सामर्थ्यप्रापितं यच्च व्यक्त्यर्थमनुषज्यते ।
श्रुतिरेवानुषङ्गे सा बाधिका लिङ्गवाक्ययोः ॥ ७५ ॥

इह श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यालक्षणाः संदिग्धवाक्या-

---

(१) पिकादिपदविज्ञानमिति पा० २ ।

र्थविचारे वाक्यविदां प्रसिद्धाः । तेषां च परस्परविरोधे पूर्वः पूर्वो बलीयानिति व्यवस्थाप्यते । तत्र श्वेतं छागमालभेतेत्यत्रालम्भनक्रियया यो द्रव्यस्य सम्बन्धः स द्वितीयया (१) श्रुत्या साक्षात्प्रतिपादितः । गुणस्य तु तत्सामानाधिकरण्याद्वाक्यीयः । निर्गुणस्य हि द्रव्यस्याभावाद्गुणस्य च निरधिकरणस्यासम्भवाद्वाक्यीय आश्रयाश्रयिणोः सम्बन्धः । 'तदुच्यते । आश्रयाश्रयिणोर्वाक्यान्नियमस्त्ववतिष्ठत' इति । यदा तु द्रव्यगुणयोर्द्वयोरप्यालम्भनक्रियया साक्षात्सम्बन्धः । यद्वक्ष्यति । 'क्रियया यो ऽभिसम्बन्धः स श्रुतिप्रापितस्तयो'रिति । ततश्च श्वेताभावे ऽन्यगुणस्य छागस्यालम्भनमनुष्ठीयते । छागाभावे च श्वेतगुणयुक्तस्य मेषस्याप्यालम्भनमिति प्रतिनिधिसमाश्रयणेन श्रुतिबाधः । वक्ष्यति च । "तत्र द्रव्यगुणाभावे प्रत्येकं स्याद्विकल्पनम् । श्रुतिप्राप्तो हि सम्बन्धो बलवान्वाक्यलक्षणा"दिति । यदि च वाक्यीयः सम्बन्धो बलवान्स्या(२)त्तदा ऽन्यतराभावे नालम्भनमनुष्ठीयेतेति । विध्यर्थः श्रुतिः । अतः श्रौतस्यैव सम्बन्धस्य वाक्याद्बलीयस्त्वादन्यतराभावे ऽपि श्रुतिप्रापितमालम्भनमनुष्ठितमिति न कश्चिच्छ्रुतिबाधः । तदेतत्प्रतिपादयितुमुक्तम् । सामर्थ्यप्रापितमित्यादि । निर्गुणस्य द्रव्यस्याभावाच्छ्वेतगुणयुक्तस्यालम्भनं क्रियासामर्थ्यप्रापितं श्रौतमेव व्यक्तार्थस्फुटीकरणाय श्वेतमालभेतेति श्वेतादि तत् संबध्यते । ततः किमित्याह । श्रुतिरित्यादि । ततश्च साक्षाद् द्रव्यगुणयोः श्रुतावनुषङ्गी ऽभिसम्बन्धः श्रुतिरेव तत्र लिङ्गवाक्ययोर्बाधिकेति न वाक्यीयसम्बधस्तत्र भवति ॥ ७५ ॥

श्रौतवाक्यीययोर्भेदमुपदर्शयितुमाह ॥

अप्राप्तो यस्तु शुक्लादिः सन्निधानेन गम्यते ।

---

(१) द्वितीयाश्रुत्येति पा० ३ ।

(२) बलवान्न स्यादिति पा० ३ ।

स यत्नप्रापितो वाक्ये श्रुतिधर्म्मविलक्षणः ॥ ७६ ॥

छागमालभेतेत्यत्र द्रव्यस्यैव साक्षात्सम्बन्धः शुक्लादिगुणस्य तु सन्निधानवशाद्वाक्यीयो यत्नप्रतिपाद्यः स वाक्ये यत्नादवगतः श्रुतिधर्म्मविलक्षणः साक्षात्सम्बन्धविलक्षण इति व्यक्तम् ॥ ७६ ॥

इदानीं प्रकृते योजयितुमाह ॥

अभिन्नमेव वाक्यं तु यद्यभिन्नार्थमिष्यते ।
तत्सर्वं श्रुतिभूतत्वान्न श्रुत्यैव विरोत्स्यते ॥ ७७ ॥

यदि पुनरभिन्नमखण्डमेव निरस्तपदविभागं वाक्यमभिन्नार्थं श्वेतगुणविशिष्टच्छागालम्भनरूपकएव नाना अर्थो यस्य तत्तथाभूतमभ्युपगम्यते । तदा कुत्रायं प्रविभागो ऽयं श्रौतो ऽयं वाक्यीय इति । ततश्च सर्वस्य (१) श्रौतत्वात्केन कस्य बाध इति न श्वेतगुणाभावे छागालम्भनं छागाभावे च श्वेतगुणयुक्तस्यान्यस्य स्यादिति श्वेतं छागमालभेतेत्यत्रान्यतराभावे आलम्भनानुपपत्तेर्विध्यर्थस्य संकोच इति ॥ ७७ ॥

अवान्तरवाक्यार्थानुपपत्तिमप्यत्रोपदर्शयितुमाह ॥

वाक्यानां समुदायश्च य एकार्थप्रसिद्धये ।
साकाङ्क्षावयवस्तत्र वाक्यार्थो ऽपि न विद्यते ॥ ७८ ॥

एकस्य मुख्यार्थस्य प्रसिद्धये यः प्रतीतये ऽयमवान्तरवाक्यानां समुदायः साकाङ्क्षावयवः साकाङ्क्षा अवयवा यस्मिन्समुदाये स तथाभूतो ऽभिजानासि देवदत्त कश्मीरेषु वत्स्याम इत्याद्यात्मको ऽत्रावयवार्थो ऽवान्तरवाक्यार्थात्मको न विद्यते कश्चित् । ततश्च युगपत्सकलशास्त्रस्य ग्रहणं प्रतिपादनं वा न संभवतीति (२) सकलव्यवहा-

(१) सर्वत्रेति पा० २ ।
(२) वाऽसंभवीति पा० ३ ।

रोच्छेदः ॥ ७८ ॥

किं चामी पदार्थोपनिबन्धना वाक्येषु न्यायाः सकलशास्त्रीयलौकिकव्यवहारनिबन्धनभूताः पदपदार्थानङ्गीकरणे न प्रकल्पन्ते इत्याह ॥

प्रासङ्गिकमिदं कार्यमिदं तन्त्रेण लभ्यते ।
इदमावृत्तिभेदाभ्यामत्र बाधासमुच्चयौ ॥ ७९ ॥
ऊहो ऽस्मिन्विषये न्याय्यः सम्बन्धो ऽस्य न बाध्यते ।
सामान्यस्यातिदेशो ऽयं विशेषो ऽत्रातिदिश्यते ॥ ८० ॥
अर्थित्वमत्र सामर्थ्य-
मस्मिन्नर्थो न भिद्यते ।
शास्त्रात् प्राप्ताधिकारो ऽयं
व्युदासो ऽस्य क्रियान्तरे ॥ ८१ ॥
इयं श्रुत्या क्रमप्राप्तिरियमुच्चारणादिभिः ।
क्रमोयमत्र बलवानस्मिंस्तु न विवक्षितः ॥ ८२ ॥
इदं पराङ्गैः सम्बन्ध(१)मङ्गानामप्रयोजकम् ।
प्रयोजकमिदं तेषामत्रेदं नान्तरीयकम् ॥ ८३ ॥
इदं प्रधानं शेषो ऽयं विनियोग(२)क्रमस्त्वयम् ।
साक्षादस्योपकारीदमिदमाराद्विशेषकम् ॥ ८४ ॥
शक्तिव्यापारभेदो ऽस्मिन्फलमत्र तु भिद्यते ।
संबन्धाज्जातभेदो ऽयं भेदस्तत्रा(३)विवक्षितः ॥ ८५ ॥

(१) संबद्धमिति पा० २ ।
(२) यमिति योगेति पा० ३ ।
(३) स्त्वत्रेति पा० ३ ।

एतैश्च निर्णीतैर्वाक्यगोचरो ऽर्थात्मा यथावल्लक्ष्यते निश्चीयतइत्येतानि मीमांसकैर्लक्षणानीत्युच्यन्ते। तत्र षड् द्वादश चतुर्विंशतिर्वैतानि लक्षणानि तावदिह प्रदर्श्यन्ते। एतेषां च वितत्य सोपपत्तिकं सनिदर्शनं स्वरूपं पदकाण्डे लक्षणसमुद्देशे विनिर्दिष्टमिति ग्रन्थकृतैव स्ववृत्तौ प्रतिपादितम्। आगमभ्रंशशालेखकप्रमादादिना वा लक्षणसमुद्देशश्च पदकाण्डमध्ये न प्रसिद्धः। तत्र तावद् द्वादशलक्षणानि द्वादशस्वध्यायेषु सप्रपञ्चं प्रासङ्गिकविचारसहितानि निर्णीतानि। तथा च तत्रा 'ऽथातो धर्मजिज्ञासे' त्युपक्रमात् को धर्मः किंलक्षणश्चेत्याद्याशङ्का(१)निरासार्थं [चोदनालक्षण इत्युक्ता प्रथमेनाध्यायेन] (२) चोदनालक्षणे निर्णीते चोदनैव प्रमाणमित्युक्तम्। मतभेदेनापि विधिनियोगेत्यादिका अप्यत्रास्याः संज्ञा उपवर्णिताः। तत्रैव च स्वतः प्रामाण्यं व्यवस्थापितम्। तदनुरोधेन च प्रत्यक्षादीनामपि स्वत एव प्रामाण्यमुपपादितम्। चोदना च शब्दादिवैचित्र्याद्भिन्नरूपेति भेदप्रतिपादनायास्या एव द्वितीयो ऽध्यायः। भिन्नस्य च शेषशेषिभावेन विनियोगप्रतिपादनाय तृतीयो ऽध्यायः। विनियुक्तस्य प्रयोजकाप्रयोजकभावप्रतिपादनाय चतुर्थः। श्रुत्युच्चारणादिभिः क्रमेण विनियोग इति तदर्थं पञ्चमः। एतत्समग्रं यदर्थमसावर्थी समर्थः शास्त्रेणापर्युदस्तो ऽधिकारीति तत्प्रतिपादनाय षष्ठ इति। एवं विधिभेदशेषशेषिभावप्रयुक्तिक्रमाधिकारिणां प्रतिपादनायाध्यायाः षडिति षड्लक्षणानि। तत्र प्रकृतिषट्कमुपदेशषट्कमिति चोच्यते। तदनन्तरमनुक्तेतिकर्त्तव्यताकमपि कर्मान्यतो विध्यन्तमाप्नोति सामान्यातिदेशादिति प्रतिपादनाय सप्तमः। क्वचित्सामर्थ्याद्विशेषा एवातिदिश्यन्तइति निरूपणायाष्टमः। अति-

(१) शङ्केति पा० २।
(२) [ ] एतन्मध्यस्थं २ पुस्तके नास्ति।

देशप्राप्ते मन्त्रे प्रकृतिदेवता विकृतियागदेवतात्वेन विपरिणमयित-व्येत्यादिसमर्थनाय नवमः । सामान्यस्य विशेषेण बाधाभिधानाय दशमः । येन सकृदनुष्ठानादुभयसिद्धिस्तत्तन्त्रं तदर्थमेकादशः । यद-न्यदर्थमारब्धमन्यदप्येकेनैव प्रयत्नेन संभवलाघवाभ्यां निष्पादयति तत्प्रासङ्गिकम् । तदुक्तये द्वादशो ऽध्याय इत्यनेनातिदेशषट्केन सह द्वादशलक्षणानि । एतत्प्रतिपक्षभूतान्यन्यानि द्वादश यथायोगमेते-ष्वेवाध्यायेषु दर्शितानि । तत्र प्रमाणस्य प्रतिपक्षासंभवः । न ह्यप्र-माणं प्रमाणस्थाने नियुज्याभिमतसंपत्तिर्भवति । भेदस्य तु शास्त्रा-दिभेदभिन्नस्य तदभेदादभेदः प्रतिपक्षः । तत्र भेदस्य स्वरूपं निर्दिष्टं "शक्तिव्यापारभेदो ऽस्मिन् फलमत्र तु भिद्यते । संबधाज्जातभेदो ऽय"मिति । भेदस्तत्राविवक्षित इति तत्प्रतिपक्षः । तथा शेषशेषि-भावस्य गुणप्रधानभावाविवक्षा प्रतिपक्षः । सा प्रतीयमानत्वादत्र नोक्ता । तत्र शेषशेषिभावस्येदं प्रधानं शेषो ऽयमिति स्वरूपकथनं "विनियोगक्रमस्त्वयम् । साक्षादस्योपकारीदमिदमाराद्विशेषक" मित्यस्यैवेतिकर्त्तव्यतायाः प्रभेदस्य च निर्देशः । प्रयुक्तेरप्रयोजकः प्र-तिपक्षः । तत्रेदं पराङ्गैः संबद्धमङ्गानामप्रयोजकमित्यनेनैकफलतया प्रयोजकाप्रयोजकप्रदर्शनं कृतम् । "प्रयोजकमिदं तेषामत्रेदं नान्त-रीयक"मित्यनेन फलभेदेन प्रयोजकाप्रयोजकोपन्यासः । तदेवं प्रयु-क्तेर्द्विभेदायाः सापवादायाः स्वरूपं (१) निर्दिष्टमनेन श्लोकेनेति वि-ज्ञेयम् । क्रमस्याविवक्षा प्रतिपक्षः । अस्येयं श्रुत्या क्रमप्राप्तिरियमुच्चा-रणादिभिरिति स्वरूपम् । क्रमो(२)यमत्र बलवानिति [तस्यैव ब-लाबलचिन्ता] (३) अस्मिंस्तु न विवक्षित इति प्रतिपक्षः । अधिकारि-

---

(१) स्वरूपमिति पा० २ ।

(२) स्वरूपक्रमार्थमिति पा० २ ।

(३) [ ] एतन्मध्यस्थं २ पुस्तके नास्ति ।

ण: स्वरूपापवादो "शास्त्राप्राप्ताधिकारो ऽयं व्युदासोस्य क्रियान्तरे" इति कृतौ । सामान्यातिदेशविशेषातिदेशयोस्त्वपवादविरहितं स्वरूपं निर्दिष्टं "सामान्यस्यातिदेशोयं विशेषोत्रातिदिश्यते" इति । ऊहस्य संबन्धाबाधो ऽपवादः । अस्य "ऊहोस्मिन्विषये न्याय्य" इति स्वरूपम् । संबन्धोस्य न बाध्यतइत्यपवादः । तुल्यबलानामविरोधात्समुच्चयो बाधस्यापवादः । तुल्यबलानामचरितार्थानां विरोधाद्विकल्पोपि बाधस्यापवादत्वेन दर्शितः । अत्र बाध(१)समुच्चयाविति बाधस्य स्वरूपमपवादश्चोक्तः । तन्त्रस्याप्यावृत्तिः प्रतिपक्षः ॥

तस्य इदं तन्त्रेण लभ्यतइतिस्वरूपम् । "इदमावृत्तिभेदाभ्या" मित्यनेन तन्त्रस्यावृत्तिः प्रतिपक्ष उक्तः । एकप्रयत्ननिर्वर्त्यमपीच्छावशाद्भेदेनेच्छतीति प्रासङ्गिकस्यापवादो भेदः । तत्र "प्रासङ्गिकमिदं कार्य"मिति प्रासङ्गिकस्वरूपनिर्देशः ॥

आवृत्तिभेदाभ्यामित्यस्माद्भेदः प्रासङ्गिकस्यापवादो योजनीयः ॥

यद्यपि परेषां चोदनैव प्रमाणं प्रसिद्धं तथापीह टीकाकारो न्यायमात्रस्य प्रमाणत्वमङ्गीकरोति । अतः प्रकृतशास्त्रव्याख्योपयोगि तत्तत्स्थाने न्यायजातं प्रसज्य प्रतिषेधोयमित्यादिना प्रदर्शयति । अत एव चोदनायामेव प्रमाणत्वस्याभावात्प्रथममेव लक्षणनिदर्शनं न कृतम् । सामान्येन वाक्यधर्म्माणां प्रासङ्गिकादीनां सापवादानामत्र निर्देशः कृत इत्यभिप्रायः ॥

एतदुक्तं भवति । पदपदार्थव्यवस्थापनाप्रस्तावे यो यः कश्चित्तद्व्यवस्थापने न्यायः प्रभवति स संकीर्त्तनीयः । तदत्र चोदनायाः कीदृशं प्राथम्यं प्राधान्यं वा तन्त्रप्रसङ्गौ तु सूत्रे कृताविति तत्पुरःसरत्वेनैव पदपदार्थावधानमिति । समुच्चयो विकल्प आवृत्तिश्चेत्येवमादिभिः सह द्वाविंशतिर्लक्षणानि भवन्ति । द्वे लक्षणे समुद्देशादूह्ये । अ-

(१) बाधा इति पा० २ ।

थ वा सामान्यातिदेशस्य तदभाव एवापवादः । विशेषातिदेशस्य सामान्यातिदेश एव विशेषान्तरातिदेशो वेत्यनयोः सप्रतिपक्षत्वमाश्रित्य चतुर्विंशतिः संपद्यन्तइत्येवमनेन क्रमेणैतानि लक्षणानि । एतदेव मनसिकृत्य षड् द्वादश चतुर्विंशतिर्वा लक्षणानीत्युक्तम्। अथैषां निदर्शनार्थं लेशतः स्वरूपसहितान्युदाहरणानि टीकाकारेण प्रदर्शितानि । तत्र द्वयोरर्थिनोः कार्येण संभविना प्रयोजकत्वेन निर्ज्ञातसामर्थ्ययोर्यत्रान्यतरप्रयुक्तेनार्थेनापरो ऽभिसंबध्यमानः कृतार्थत्वात्पृथक्प्रयोजकत्वं नोपैति स प्रसङ्गः । तत्प्रयोजनकं प्रासङ्गिकम् । तद्यथा संघाताध्ययनम् । तत्र हि कं चिदेव शिष्यमुद्दिश्य प्रवृत्ते ऽध्यापने ऽभेदेनाध्यायनान्तरस्य प्रयोजने समर्थतरा अध्येतारः सत्यप्यर्थित्वे पृथगध्यापनं संभवाल्लाघवाच्च न प्रवर्त्तयन्ति (१) ॥

अत्राग्नीषोमीयपश्वर्थः प्रयाजानुयाजविध्यन्तः प्रसङ्गादग्नीषोमीयं पशुपुरोडाशमप्युपकरोति । शब्दानुशासनेपि यथा ॥

सर्वादीनि सर्वनामानीत्यत्र णत्वाभावं प्रासङ्गिकमुदाहरन्ति । तत्र हि संज्ञासंज्ञिसंबन्धविधानपरे वाक्ये रूपविशेषमात्रादकृतणत्वादुभयसाधनत्वं विज्ञायते । शक्यो ह्यस्य स्वरूपनिर्देशात्पृथग् णत्वप्रतिषेधो वक्तुमित्येकेनैव प्रयत्नेनोभयमत्र वर्त्ततइति । अथ तन्त्रम् । यत्रार्थिनः सर्वे प्रयोजकाभेदेनावृत्त्या वा योर्थः प्रतिपत्तव्यस्तमर्थमेकमेव सम्भवाल्लाघवाच्च प्रयोजयन्ति तत्तन्त्रम् । तद्यथा । शालायामेकं प्रदीपं (२) व्याकरणाध्यायिनः प्रयोजयन्ति । वेदे यथा । प्रधानभूता ये षड् यागा आग्नेयादयस्तदर्थं ये प्रयाजादयः ते (३) पूर्वं प-

---

(१) अपि त्वेकेनैव यत्नेन तदनुतिष्ठन्ति । वेदेपि यथा ऽग्नीषोमीयस्य वपया प्रचर्या ऽग्नीषोमीयं पशुपुरोडाशमेकादशकपालं निर्वपन्ति । इत्यधिकं पु० २ ।

(२) एकप्रदीपमिति पा० ३ ।

(३) तदिति पा० ३ ।

ख्यादा कृताः सर्वेषां तन्त्रेण साधारण्येनोपकारका भवन्तीत्युच्यते । शास्त्रे यथा भिन्नार्थयोस्तपरशब्दयोस्तपरस्तत्कालस्येति तन्त्रिणोः सूत्रउपादानं क्रियतइति । एवं च तत्र तत्र लक्षणेष्वपि (१) तन्त्र-लक्षणं प्रभवत्येवेति विज्ञेयम् । तद्यथा । संख्यासंज्ञायां रूपविशेषा-नुरोधात्तत्प्रदेशेषु तन्त्रेणैव युगपदुभयप्रतिपत्तिरिति । अथावृत्तिभेद-योस्तन्त्रप्रसङ्गप्रतियोगिनोर्निदर्शनमुच्यते । आवृत्तौ तावत्तन्त्र(२) प्रतिपक्षभूतायां निदर्शनम् । यथा एकं वस्त्रमाभरणं वा रणभूमिषु भटानामुपयोगाय कल्पतइति । वेदे यथा सप्तदश सामिधेन्यो भव-न्तीति । अत्रैकशब्ददर्शने सामिधेनीषु सप्तदशत्वमावृत्तिसंख्यानात्प्र-कल्प्यते । यदुच्यते । त्रिः प्रथमामन्वाह त्रिरुत्तमामन्वाहेति । व्या-करणे यथा । संप्रसारणसंज्ञायां ज्ञापकपक्षानाश्रयणेन वर्णवाक्यवि-षयया आवृत्त्या कृत्स्नस्य भिन्नप्रतीयमानोपस्कारा प्रवृत्तिराख्याय-ते । यथा चैकशब्ददर्शने एकाजनेकाज्ग्रहणेषु चावृत्तिसंख्यानादि-ति परिहार उच्यते । भेदस्य तन्त्रप्रतियोगिनोर्निदर्शनम् । यथा । भिन्नानि पात्राण्यसहभुजां भुजिक्रियायां भेदेनाधिकरणभावं प्रति-पद्यन्ते । वैदिकेपि विषये यथा । ग्रहं संमार्ष्टीत्यत्र यः संमार्गो ग्रह-विषये चोदितः स भेदेनैव व्यवतिष्ठतइति । शास्त्रे यथा । न वेति विभाषेत्येतस्मिन् योगे प्रत्याख्यातउभयत्रविभाषाणां क्व चिद्विधिमु-खेन क्व चित् प्रतिषेधमुखेन विभक्तानां विभक्तावृत्तिराश्रीयतइति । अथ बाधानिदर्शनं क्रियते । अर्थित्वात्सामान्योपदेशाद्वा सति प्रवृ-त्तिसंभवे दृष्टादृष्टार्थमप्राप्त्यनुमानमात्रं (३) यत्र सा बाधा । यथा-र्थित्वात्प्रवृत्ते सामान्येन भक्षणे अभक्ष्यो ग्राम्यकुक्कुट इति ग्राम्यकुक्कु-

---

(१) तन्त्रलक्षणेष्वपीति पा० ३ ।

(२) प्रसङ्गेति पा० ३ ।

(३) प्राप्त्यनुमानमिति पा० २ ।

टभचणं चुप्रतिघातार्थमर्थित्वात्प्राप्तमनेन बाध्यतइति वैदिकमुदाहरणम् । लौकिकं यथा । ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेत्यत्र दधिदानमौत्सर्गिकं तक्रदानेन विशिष्टे विषये बाध्यतइति । शास्त्रे यथा । कर्मण्यणित्यस्याऽऽतो ऽनुपसर्गे क इति कप्रत्ययेन बाधेति । एषा च टीकाकृता स्ववृत्तौ सा च तुल्यबलेष्वसंभवादित्यादिना बहुप्रकारा दर्शिता । न चेयत्ता प्रकाराणास्यास्तेनापि (१) तत्र दर्शिता । यस्मादुक्तम् । सेयमपरिमाणविकल्पा बाधा विस्तरेण बाधासमुद्देशे समर्थयिष्यते इति । अथ समुच्चयः । तुल्यबलानामविरोधिनां समुच्चयः । तद्यथा । देवदत्तं भोजय लवणेन सर्पिषा शाकेन चेति । वेदेपि । ब्राह्मणेभ्यः पाद्यमाचमनं च दीयतामिति । शास्त्रे ऽप्यविरोधात्फलभेदाच्च । प्रत्ययकृत्कृत्यसंज्ञाः । प्रत्ययतद्धिततद्राजसंज्ञाश्चैकत्र समुच्चीयन्तइति । विकल्पोपि बाधाप्रतियोगी । स च तुल्यप्रमाणविशिष्टानां विरुद्धानां भवति । वेदे यथा । व्रीहिभिर्यजेत यवैर्यजेतेति । लोके दधितक्रे कौण्डिन्याय दीयेतामित्येकफलदधितक्रदानचोदने । शास्त्रे ऽपि । खलृटचावित्यादि । विधिप्रतिषेधयोरपि तुल्यबलत्वे विरोधाद्विकल्पो भवत्येव । यथा । वेदे षोडशिनं गृह्णाति न गृह्णातीति । लौकिके ऽपि किं चिदस्य दीयतां न दीयतामिति । शास्त्रे ऽपि वाग्रहणानर्थक्यं विधिनिषेधसामर्थ्यादुभयोः सिद्धत्वादिति । यथाप्रदर्शितं स्ववृत्तौ टीकाकारेण । विधिप्रतिषेधयोः खल्वपि तुल्यबलत्वे विरोधाद्विप्रतिषेधमाह । नासिकादिभ्यो विभाषया सहनञ्विद्यमानपूर्वेभ्यः प्रतिषेधो विप्रतिषेधेन । अयं विधिः स प्रतिषेधः विधिप्रतिषेधयोस्त्वयुक्तो विप्रतिषेधः । अयमपि विधिर्न मृदूनामिव कार्पासानां कृतः प्रतिषेधविष-

(१) उपलब्धपुस्तकद्वयएवमेव पाठः । परं तु प्रकाराणामस्त्यतस्तेनापि सा नेति युक्ता पाठकल्पना ।

यएवारभ्यते । स यथैव बह्वज्लक्षणं संयोगोपधलक्षणं च बाधते एवं विद्यमानपूर्वलक्षणमपि । तत्र पुरस्तान्मध्ये ऽपवादा इति बाधकत्वे प्रतिषिद्धे विप्रतिषेधाद्बाधा व्यवस्थाप्यतइति ॥ ७६ ॥

ऊहः खल्वपि प्रकृतौ समर्थानां विकारे सामर्थ्याभावात्प्रकृतिरूपलिङ्गवचनान्तरोपादानेन क्रियते । तद्यथा । प्रकृतावग्नय इत्यग्निशब्दः समर्थो ऽङ्गारार्थो (१) दृष्टः । तत्र विकारे सूर्यायेत्यूहः । इत्येवमादिना निमित्तभेदेन बहुभेदो भवत्यूह इति वैदिकमुदाहरणम् । लोके ऽपि यथा देवदत्तस्योच्चानि गृहाणि । आढ्यो वैधवेय इत्यत्र षष्ठ्यन्तमपोह्य निमित्तवशात्प्रथमान्त (२) ऊह्यते । व्याकरणे ऽपि ऊहविषयत्वमापन्नाः सर्वे विभक्तिविपरिणामाः । तेषु हि योगान्तरे यया विभक्त्या सम्बद्धो यः शब्द उपलब्धस्तत्संबन्धत्यागेनैव विभक्त्यन्तरयोगं स प्रतिपद्यते । तद्यथा । उपदेशे ऽजनुनासिक इत् । इतो लोपः । भूवादयो धातवः । धातोरनुदात्तेतो ङित आत्मनेपदमिति । अथोहप्रतिपक्षभूतं सम्बन्धाबाधनमपि निदर्श्यते । यथा देवदत्तस्योच्चानि गृहाणि युक्तं तान्यभिजातस्येति । अत्र यद्विभक्त्यन्तस्यैव श्रुतिः तथा वाक्यान्तरे ऽप्यभिसम्बन्ध इति । तथा बदरीसूक्ष्मकण्टका मधुरा वृक्षः । पञ्चाला जनपद इत्येवमादिषु सम्बन्धाबाधनं भवतीत्याहुः । वेदेपि यथा यजमानं दण्डेन दीक्षयति, अजिनेन दीक्षयति, मेखलया दीक्षयती,त्यत्र यजमानमित्यबाधितमेव सम्बध्यते । शास्त्रेपि बहुगणवतुडतिसंख्येति योगे विधीयमानसम्बन्धस्य स्वरूपपदार्थकस्य संख्याशब्दस्य श्रुतस्य योगान्तरे संज्ञिविशेषणत्वं विज्ञायते । ष्णान्ता संख्या षट्संज्ञा भवतीति । अथातिदेशनिर्देशः क्रियते । अन्यत्रान्यधर्मपरिप्रापणमतिदेशः । तस्य च द्वौ प्रकारौ

(१) गीतार्थ इति पा० ३ ।

(२) प्रथमान्तमिति पा० २ ।

सामान्यातिदेशो विशेषातिदेशश्चेति । सामान्यातिदेशो यथा । अन्यत्र रूढसम्बन्धा धर्मा निर्ज्ञातभेदेष्वर्थेषु प्रसिद्धेरनुमेयभेदसम्भवैः सम्बन्धिभिर्व्यपदिश्यन्ते । तद्यथा । ब्राह्मणवदस्मिन् क्षत्रिये वर्त्तितव्यमित्यत्र यावानर्थो ब्राह्मणशब्दं न (१) व्यभिचरति तावत्यर्थे यानि सम्बद्धानि कार्याणि तान्यत्यन्तमलब्धब्राह्मणव्यपदेशे क्षत्रिये ऽतिदिश्यन्ते । तथा गुरुवद्गुरुपुत्रे वर्त्तितव्यमिति । वेदे यथा । दर्शपूर्णमासवदन्येष्वपि यागेषु प्रचरितव्यमिति । शास्त्रे ऽपि । स्थानिवदादेशो ऽनल्विधाविति । अथ विशेषातिदेशः । निर्ज्ञातसामान्यकार्येषु ब्राह्मणादिषु पुनरतिदेशसामर्थ्याद्विशिष्टप्रकृतिगतकार्यातिदेशः । यथा (२) ब्राह्मणवदस्मिन् ब्राह्मणे वर्त्तितव्यमिति । अत्र ये ब्राह्मणे ब्राह्मणवदेव वर्त्तन्ते तान् प्रत्ययमेवंभूतो ऽतिदेशो विज्ञायते । येषां तु बुद्ध्यसंभेदात्प्रसङ्गाद्वा व्यतिकरः तेषु नियम एव क्रियते । उक्तं च "सामान्यमात्रं शब्दार्थो विशेषा व्यभिचारिणः । सामर्थ्यमन्तरेणातो विशेषो नातिदिश्यत" इति । तत्र वेदे यथा । आग्नेयवत्सौर्य इत्यत्रैकदेवताकस्यैकदेवताकसंबन्ध्येव विध्यन्त इति । विध्यन्तमितिकर्त्तव्यतोच्यते । शास्त्रे रूपातिदेशादिभिः षड्भिः प्रकारैर्विशेषातिदेशः परिदृश्यते । तत्र रूपातिदेशो यथा । द्विर्वचने ऽचीत्यत्र हि धातुरूपमेवादेशस्यातिदिश्यते । ततश्च या क्त इत्यादीनामेव द्विर्वचनं भवति । यथा । ययतुश्चक्रतुरिति । निमित्तातिदेशो यथा । पूर्ववत्सन इति । अत्र पूर्वस्य यन्निमित्तमात्मनेपदे ङकारादि तदेव सनन्तस्यातिदिश्यतइति । तादात्म्यातिदेशो यथा । सुबामन्त्रिते पराङ्गवत् स्वरइति । सुबन्तमामन्त्रितस्य मृत्पांसूदकवत् तादात्म्यमापद्य तत्स्वरं लभतइति । शास्त्रातिदेशः कार्यातिदेशो वा

---

(१) शब्देनेति पा० २ ।
(२) यथेति २ पु० नास्ति ।

यथा । कर्मवत्कर्मणा तुल्यक्रिय इति । अत्र हि शास्त्रातिदेशे यकः शपा बाधनं स्यादिति यग्विधौ कर्मकर्त्तर्युपसंख्यानमारभ्यते । विप्रतिषेधाद्धि शपो बलीयस्त्वमिति । कार्यातिदेशे तु कर्मवत्कर्मणेत्यनेनैव यग्विधीयतइति यक एव परत्वान्नास्त्यस्य शपा बाधेति नोपसंख्यानारम्भः । व्यपदेशातिदेशस्तु व्याकरणे नैव सम्भवति । संज्ञापचाद्‌विशेषाद्वत्करणवैफल्यप्रसङ्गाच्चेति ॥ ८० ॥

अथाधिकारस्य निदर्शनम् । अर्थित्वं सामर्थ्यं शास्त्रापर्युदासयोगित्वमधिकारः स विद्यते यस्यासावधिकारी । अर्थित्वमधिकारकारणम् । परं हि पुरुषार्थमत्रापवर्गमाचचते । अस्माद्‌प्यर्थी प्रमाद्यति कश्चिदिति सत्येवार्थित्वे सामर्थ्यमधिकारकारणम् । उत्पन्नायामपि ह्यभिनयन(१)दिदृचायामन्धो दर्शने नाधिक्रियते । अर्थिनः खल्वपि सामर्थ्याभावः केषु चित्कर्मसु शास्त्रेण पर्युदासात् । यथा शूद्रास्त्रय्यां नाधिक्रियन्ते । अदृष्टार्थविशेषे हि सामर्थ्यासामर्थ्ये शास्त्रादेव समधिगम्येते । तस्मात् प्रधानमधिकारकारणं शास्त्रोपदेशमाचचते । तत्र लोके यथा । अद्यप्रभृति त्वमत्र ग्रामे नगरे वा ऽधिकृत इति राजा नियुङ्क्ते । वेदे यथा 'ऽग्निहोत्रं जुहुयात्स्वर्गकामो [ब्राह्मण' इत्यत्र] (२) ब्राह्मणस्यार्थित्वादिभिरधिकार इति । शास्त्रस्य तु शब्दार्थपुरुषधर्मेष्वधिकारः । तत्र षोढा शब्दः । साधुरसाधुश्च । साधुरपि शास्त्रीयः प्रायोगिकश्च । शास्त्रीयो ऽपि त्रेधा प्रतिपाद्यः प्रतिपादक उभयरूपश्च । तत्र प्रतिपाद्यो यथा । दाधर्त्यादिर्निपात्यमानः । प्रति पादको यथा । प्रकृतिप्रत्ययादिः । तेन हि कुम्भकारादिः प्रयोगस्थः प्रतिपाद्यते । उभयरूपो यथा । इतव्यशब्दः । स हि तव्यशब्देन प्रतिपाद्यते । प्रयोगस्थं च स इतव्यशब्दं प्रतिपादयति । प्रायोगिकश्च

(१) अभिनये इति पा० २ ।
(२) [ ] एतन्मध्यस्थं २ पुस्तके नास्ति ।

लौकिकवैदिकभेदेन द्विधेत्येवमसाधुना सह षोढा शब्दः । तेषु मध्ये प्रतिपाद्येषु व्याकरणशास्त्रस्याधिकारः । न प्रकृत्यादिषु । न हि ते व्याकरणेन व्युत्पाद्यन्तइति । अर्थो ऽष्टादशधा । तत्र वस्तुमात्रमभिधेयश्च । अभिधेयो ऽपि द्विधा । शास्त्रीयो लौकिकश्च, पुनरपि विशिष्टावग्रहसंप्रत्ययहेतुस्तद्विपरीतश्च, मुख्यः परिकल्पितरूपविपर्यासश्च, व्यपदेश्यो ऽव्यपदेश्यश्च, सत्त्वभावमापन्नो ऽसत्त्वभूतश्च, स्थिरलक्षणो विवक्षाप्रापितसंनिधानश्च, अभिधीयमानः प्रतिपाद्यमानश्च, अभिसंहितो नान्तरीयकश्चेति । तत्र वस्तुमात्रं बाह्यार्थो यो वक्तु प्रतिपादयितुं न समीहितः । यस्तु समीहितो ऽसावभिधेयः । तत्रैव च शब्दस्याधिकारः । स च द्विधा शास्त्रीयलौकिकभेदेन । तत्र शास्त्रीय आवापोद्धारिकः । लौकिकस्त्वखण्डः । लौकिके चार्थे शब्दस्याधिकारो न शास्त्रीये । शास्त्रीयो हि पौरुषेयः परिकल्पितः । एवमतथाभूतोपि शब्दसाधुत्वस्य निमित्तभावेन प्रतिपादको विज्ञायते । अतश्च तस्य व्यभिचारे ऽप्यव्यभिचार एव स्मर्तॄणाम् । स चा, नियतावधि बहुधा प्रविभज्यते व्याख्यातृभिः । विशिष्टावग्रहसंप्रत्ययहेतुर्यथा । कंसं घातयति । बलिं बन्धयतीति । अत्र ह्यर्थो न तथाभूतो ऽपि तु विशिष्टाकारेणैव सम्प्रत्ययेन गोचरीकृतो व्यवहारविषयतामनुपतति । तद्विपरीतो यो बहिरेव तथा व्यवस्थितः । यथा गौः शुक्ल इत्यादि । मुख्यो (१) यथा सास्नादिमान् गौरिति । परिकल्पितो निमित्तवशेन रूपविपर्यासो यस्यासौ परिकल्पितनिमित्तरूपविपर्यासो गौणो ऽर्थ उच्यते । यथा गौर्वाहीक इति । व्यपदेश्य आवापोद्धारिक एव जातिर्वा द्रव्यं वेत्येवमुक्त इति । अव्यपदेश्यस्त्वखण्ड एव वाक्यार्थलक्षण इति । सत्त्वभावमापन्नो व्यपदेश्य एवावापोद्धारिकसंज्ञकः । असत्त्वभूतो वाक्यार्थलक्षण एव । उक्तिभेदादे-

(१) मुख्ये इति पा० २ ।

वात्र प्रायशो भेदकथनम् । स्थिरलक्षणो यथा । राजपुरुष इत्यत्र राजसम्बन्धित्वं पुरुषस्य तद्धि न व्यभिचरति । विवक्षाप्रापितसन्निधानो यथा । राज्ञः पुरुषस्येति । अत्र हि सम्बन्धित्वं व्यभिचरति । विशेषणविशेष्ययोर्यथेष्टत्वात् । अभिधीयमानो यथा । राजसख इत्यत्र राज्ञः सखा ऽयमित्यर्थोऽभिधीयते । तस्मिंस्त्वभिधीयमाने राजा सखा ऽस्येत्ययमर्थः प्रतीयमान एव । अभिसंहितो यथा । गोशब्दे जातिर्द्रव्यं वेति । नान्तरीयको यथा तत्रैव वर्णसंस्थानादिः । इत्येवमभिधेयभेदा उपदर्शनीयाः । पुरुषधर्मा वक्तृत्वप्रतिपत्तृत्वप्रभृतयः । तत्र वक्तृधर्मा आबाधः । असूयासंमतिकोपकुत्सनभर्त्सनादयश्चेति । प्रतिपत्तृधर्मास्तु कुत्स्यमानत्वप्रभृतय एव । तत्र (१) शास्त्रस्य प्लुतद्विर्वचनादिविधायकत्वेनाधिकार इति । अत्र च य एव धर्माः शब्दानां शास्त्रस्य वा ऽनधिकारविषयत्वेनोक्तास्तानेवापेक्ष्योच्यते । व्युदासो ऽस्य क्रियान्तरइति ॥ ८१ ॥

अथ क्रमस्य निदर्शनम् । "इयं श्रुत्या क्रमप्राप्तिरियमुच्चारणादिभि" रिति । श्रुत्यादिभेदेनायं क्रमो नैकप्रकारः । तथा च । श्रुतिक्रमो ऽर्थक्रमः पाठक्रमः काण्डक्रमः प्रवृत्तिक्रमः प्रतिपत्तिक्रमः प्रयोगक्रमो बुद्धिक्रमश्चेति । तत्र श्रुतिक्रमो यथा । स्नात्वा व्रजतीति । अत्र त्वाप्रत्ययेनैव श्रुत्या क्रम उक्तः । वेदे यथा । हृदयस्याग्रे ऽवद्यत्यथ जिह्वाया इत्यत्र श्रुत्यैवाग्रेऽथशब्दाभ्यां क्रम उक्तः । शास्त्रे ऽपि च परस्मैपदानां णलतुसित्यादौ यथासंख्यमनुदेशः समानामिति श्रुत्यैव क्रमः । अर्थः सामर्थ्यं तन्निमित्तः क्रमो ऽर्थक्रमो यथा । भुक्त्वा स्नात्वा व्रजतीत्यत्र स्नानादीनामन्यथाशब्दोपात्तानामप्यर्थस्वरूपपर्यालोचनया स्नानादिक्रमो लक्ष्यते । वेदे यथा । अग्निहोत्रं जुहोति यवागूं श्रपयतीत्यत्र श्रपणं पश्चाद्विनिर्दिष्टमपि पूर्वमनु-

---

(१) तत्रेति २ पुस्तके नास्ति ।

छीयते ततोऽग्निहोत्रमित्यर्थक्रमः। शास्त्रेऽपि गुणकर्मणि लादिविधिरित्युक्तम्। तथा हि गां दोग्धि पय इत्यत्र गवा कर्मणा पूर्वं दुहेर्योगस्ततः पयसः। न ह्यनुपादाय गां कश्चित्पय आदातुमर्हति। तस्मादत्र गोपयसोर्दुहिना क्रमेण सम्बन्धः सोऽर्थसामर्थ्यादुपजायते। तस्मात्सत्यपि प्रधाने पयसि दुहेर्गवैव पूर्वं सम्बन्ध इति तत्रैव लादयोऽन्तरङ्गत्वादुत्पद्यन्ते गौर्दुग्धा सुदोहा गौरिति। उच्चारणक्रम एव पाठक्रमो यथा। "इन्दुस्वर्णमातङ्गपुंस्कोकिलकलापिनः। वक्त्रकान्तीक्षणगतिस्वरकेशैस्त्वया जिता" इत्यत्र यथापठितानां यथापठितैरेव सम्बन्ध इति। वेदे यथा। समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजती, त्येवमात्मकेषु प्रयाजेषु यथापाठमेव क्रमेणानुष्ठानम्। शास्त्रे यथा। विप्रतिषेधे परं कार्यं पूर्वत्रासिद्धमिति च। अत्र हि शास्त्रपाठमेवापेक्ष्येदं पूर्वमिदं परमिति व्यवस्थाप्यते। काण्डक्रमो यथा। येनैव क्रमेण ब्राह्मणक्षत्रियविशां वर्णसमाचारप्रतिपादकानि प्रकरणान्युद्दिष्टानि तेनैवाभिधीयन्तइति। वेदे तु कुत्र चिज्ज्ञाते कर्मणि येनैव कण्डिकाक्रमेण कर्माणि चोद्यन्ते तेनैव क्रमेण प्रवर्त्तन्ते। यथा याज्यानुवाक्यानामाग्नेयादीनां च। अत्र येनैव क्रमेण याज्यानुवाक्यानां सन्निवेशः तेनैव क्रमेणाग्नेयादीनां संनिवेशात्काण्डक्रमेण सम्बन्धः। शास्त्रे यथा। द्विर्वचनकाण्डात्सम्प्रसारणकाण्डमिति। तदेव विप्रतिषेधे सति पूर्वं भवतीति। प्रवृत्तिक्रमो यथा। येन (१) क्रमेण ब्राह्मणाः समानाः प्रविशन्ति तेनैव क्रमेण यथास्वं चोदितं कार्यं प्रतिलभन्तइति। वेदे यथा। सप्तदश प्राजापत्यान् पशूना(२)लभेतेत्यत्र सप्तदशानामजानां प्रोक्षणविशसनपर्यग्निकरणानि क्रमेण चोदि-

---

(१) येनैवेति पा० ३।

(२) तूपरानिति पा० २।

तानि । अनुष्ठातुः पुनरिच्छावशात्तेषु प्रवर्त्तमानस्य यत एवारभ्य प-शोस्तेनानुष्ठात्रा तेषामाद्यस्यानुष्ठानमारब्धं तेनैव प्रवृत्तिक्रमेण पु-नरपरयोरप्यनुष्ठानं विधत्तइति सो ऽयं प्रतिपत्तुरिच्छावशात् प्रवृत्तः क्रमः प्रवृत्तिक्रम इत्युच्यते । शास्त्रे यथा । भाष्यउक्तं ययैवानुपूर्व्या ऽर्थानां प्रादुर्भावः । तयैव (१) शब्दानामपि । यथा पट्व्या मृद्व्येत्य-त्र प्रथमं लिङ्गसंबन्धात् प्रत्यय उत्पद्यते तदनु कर्मसंख्यादिसम्बन्धा-देकवचनमुत्पद्यते । तथैव च यणादेशादि कार्यं तेनैव क्रमेण प्रवर्त्त-तइति । प्रतिपत्तिक्रमो यथा । लुङ्लङ्लृङ्क्ष्वडुदात्त इत्यत्र यद्यपि प्रयोगे पूर्वमडागम उच्चार्यते तथापि वयं विधिवाक्यार्थं प्रतिपद्य-माना लुङादीन् प्रतिपद्यामहे पश्चादडागममिति शास्त्रीयमुदाहर-णम् । लोके यथा । पुरुषो राज्ञ इत्युक्ते ऽप्युच्चारणक्रममतिक्रम्य रा-जार्थव्यवच्छेदेनैव पुरुषस्य प्रतिपत्तिः । वेदे यथा । प्रधानयागाः पू-र्वमुक्ता अप्यवान्तरयागनिर्वर्त्तनानुसारेणैव प्रतिपत्तिमुपारोहन्ति । यथा दीक्षणीयादीनां सोमस्य च । अत्र हि सोमयागस्य प्रधानस्य पूर्वं बुद्ध्युपारोहे ऽपि दीक्षणीयादियागनिर्वर्त्तनपूर्वकमेव सोम-प्रतिपत्तिः । प्रयोगक्रमस्तु यथा । डुकृञित्यादौ यया ऽऽनुपूर्व्या अनु-बन्धाः प्रयुक्तास्तयैवेत्संज्ञां लभन्तइति शास्त्रीयमुदाहरणम् । वेदे य-था । दर्शपूमासाभ्यामिष्ट्वा ऽन्येन यजेतेत्यत्र दर्शपूर्णमासयागपूर्वक-मन्यानुष्ठानं विज्ञेयम् । बुद्धिक्रमो यथा । शास्त्रे वर्णानामिको यण-चीत्यादौ बुद्ध्या पौर्वापर्यं कल्प्यते । तथा च पौर्वापर्यमकालव्यपेतं संहिता चेत् पूर्वपराभावादसंहितम् । एकवर्णवर्त्तित्वाद्वाच उच्चरि-तप्रध्वंसित्वाच्च वर्णानामित्याशङ्क्योक्तं भाष्यकारेण । बुद्धौ कृत्वा सर्वा-श्चेष्टाः वक्ता धीरस्तन्वन्नीतिः । शब्दानर्थान्वाच्यान् दृष्ट्वा बुद्धौ कुर्यात्पौ-र्वापर्यम् इति । शास्त्रे बुद्धिक्रमः । लोके ऽपि विद्युतः क्रमेण प्रवृत्ताः

(१) तयैवेति पा० २ ।

बुद्धौ संकलयति। वेदे प्रयाजादीनामुत्पन्नप्रध्वंसिनां बुद्ध्यैव संकलनमिति बौद्धः क्रमः। सर्वं एव वा बौद्धः क्रमो न वस्तुसमुत्थ इति। यदाहुः। प्रतिपत्तिक्रमो न वस्तुसमुत्थ इति। अथ एषां क्रमाणां बलाबलचिन्तां करोति। "क्रमो ऽयमत्र बलवानि"ति। यथा वेदे। प्रथमं भोजयितव्यस्ततोभ्यञ्जनमिति। अथ क्रमप्रतियोगिनं दर्शयितुमाह। "अस्मिंस्तु न विवक्षित" इति। क्रम इति प्रकृतम्। अविवक्षाक्रमस्य प्रतिपक्षः। तद्यथा वेदे ऽनुष्ठातॄणां क्रमाविवक्षा निमित्तवशाद्दृश्यते। लोके प्रतिपत्तॄणामपि दृश्यते। शास्त्रे यथोक्तं वार्त्तिककृता। अतिप्रसङ्गो गुणवृद्धिप्रतिषेधे क्ङ्तीत्यादि॥ ८२॥

अथ प्रयोजकाप्रयोजके निदर्श्येते। "इदं पराङ्गैः संबद्धमङ्गानामप्रयोजकम्। प्रयोजकमिदं तेषामत्रेदं नान्तरीयक"मिति। तत्र राजा छत्रच्छायायाः प्रयोजकः हस्त्यादयस्तदाधारा अप्रयोजका अपि छत्रच्छायया संबध्यमानाः प्रयोजका उच्यन्तइत्येकफलतया प्रयोजकभावः फलभेदेप्यूह्यमुदाहरणमिति लोके वेदशास्त्रयोरप्यूह्यम्॥ ८३॥

अथ शेषिशेषौ दर्शयितुमाह। "इदं प्रधानं शेषोयमि"ति। वेदे यथा व्रीहीनवहन्तीति व्रीहयः शेषि, अवघातः शेषस्तदर्थत्वात्। लोकशास्त्रयोरूह्यमुदाहरणम्॥

अस्यैव शेषिशेषभावस्येतिकर्त्तव्यतां प्रदर्शयितुमाह। "विनियोगक्रमस्त्वयमि"ति। तदेवं गुणप्रधानभावस्य परिकरबन्धसहितस्योपदर्शनं कृत्वा तत्रैवावान्तरभेदमाह। "साक्षादस्योपकारीदमिदमाराद्विशेषकमि"ति। तत्र लोके साक्षादुपकारकं यथा स्वात्मन्यलंकारादि। आराच्च(१)तदेव पुत्रदारादिषु। शास्त्रेपि साक्षादुपकारकं प्रत्ययस्य प्रकृत्यादि। यत्तु प्रकृत्यादेर्विशेषणं तदारादुपकारकम्।

(१) आरात्तदेवेति पा० २।

यथा एरजित्यादाविवर्णान्तत्वादि धातोर्विशेषणम्। कर्त्तृविशेषणं च पश्वादीति। वेदेप्यवघातादि दर्शपूर्णमासयोः साक्षादङ्गं प्रयाजादिकं त्वारा(१)दुपकारकम्॥ ८४॥

इत्येवं सप्रभेदं सपरिकरबन्धं शेषशेषिभावमुपदर्श्येदानीं भेदं प्रदर्शयितुमाह। "शक्तिव्यापारभेदोस्मिन्नि"ति। शक्तिव्यापारभेदाश्रयणेन बहुविधो भेदो लक्ष्यते। तत्र लोके बलाहकाद्विद्योतते बलाहके विद्योतते बलाहको विद्योततइत्यत्र बलाहकस्यापादानाधिकरणकर्तृशक्तीनां भेदः। शास्त्रे चात्रैव विवक्षावशात् व्यापारभेदश्चेत्येवं शक्तिव्यापारभेदः। शक्तिभेदमात्रं न तु व्यापारभेदः यथा। धनुषा विध्यतीति। अत्र हि गर्भीकृतापादानशक्तिः करणशक्तिर्विध्यत्यर्थाभेदेन व्याप्रियते। न ह्यन्यथानाश्रितापादानशक्तिधनुषः(२) करणत्वं संभवति। अत एवात्र सञ्ज्ञयोर्विप्रतिषेधो वर्ण्यते। व्यपारभेदस्तु शुद्धो न संभवति। शक्तिभेदमन्तरेण व्यापारभेदस्यासंभवात्॥

अथ फलभेदेन भेदमाह। "फलमत्र तु भिद्यत"इति। यथैकस्य दानस्यायुरारोग्यैश्वर्याणि भिन्नानि फलानि। अन्ये त्वायुष्यप्रभृतिषु सत्सु प्रीतिविशेषमेवैकं फलमाहुः। तथा बह्वीनां क्रियाणामेकं फलं यथा व्यवहारदर्शने प्रजानामेको निर्णयः। यथा वक्ष्यति "भिन्नव्यापाररूपाणां व्यवहारादिदर्शने। कर्तॄणां दर्शनं भिन्नं संभूयार्थस्य साधक"मिति॥

प्रकारान्तरेणापि भेदं दर्शयितुमाह। "संबन्धाज्जातभेदोयमि"ति। यथा ऽऽख्यातेषु धातूपात्तायाः क्रियायाः प्रत्ययवाच्यकर्तृभेदे सति सम्बन्धात्(३) क्रियाया अपि भेदः प्रतीयते। पचतः पचन्तीति।

---

(१) चारादिति पा० ३।

(२) धनुषेति पा० २।

(३) संबन्धादिति २ पु० नास्ति।

यथोक्तं साधनभेदात्तिङ्न्तु फलाभावात्फलं भवत्येवावबोधस्येत्साधने-भ्यः प्रसिद्धो ऽसाविति ॥

इदानीमस्यैव प्रतिपक्षभूतमभेदं दर्शयितुमाह । "भेदस्त्वत्राविवक्षित" इति । अत्र शक्त्यभेदो यथा । समानकर्त्तृकयोरित्यत्र पक्त्वौदनं भुङ्क्तइति कर्त्तृकर्मणोः क्रियाभेदेन प्राप्तः शक्तिभेदो वक्त्रा न विवक्षितः । तथा च सत्यत्र समानकर्त्तृकत्वमुपपन्नं भवति । व्यापाराभेदः प्रागेव दर्शितो धनुषा विध्यतीत्यत्र फलाभेदोपि पूर्वमुक्त एव । यथा दानस्यैका प्रीतिः फलमिति केचिदिति । संबन्धाज्जातभेदत्वस्य प्रतिपक्षो यत्र न संबन्धभेदाज्जातभेदत्वम् । यथा ऽऽस्यते देवदत्तेनेत्यत्र भावे लकार उत्पन्नः साधनभेदानुपादानात् क्रियाभेदमपि गमयितुं न शक्नोति । देवदत्तेनेत्यस्मात्तत्प्रतीतिरिति चेदेकपदापेक्षयैतदुक्तमस्माभिरित्यदोषः । तदेवं शक्त्यादिभेदेन बहुविधो ऽयं भेद इति लक्ष्यैः स्वयमेवोत्प्रेक्ष्यः । तथा तत्प्रतिपक्षभूतस्तद्वदभेदोपि बहुविध एव विज्ञेयः । अनयोश्च भेदाभेदयोः क्वचिद्वास्तवत्वं क्वचिद्विवक्षामात्रशरणत्वम् । विवक्षापि क्वचिल्लौकिकी । क्वचित्प्रायोक्तीत्येतदप्यत्रानुसर्त्तव्यमिति । वेदेपि भेदव्यवहारो दृश्यते । यजते (१) ददाति जुहोतीत्यादौ यागदानहोमरूपादनुबन्धभेदादपूर्वस्य भेदः । अभेदोपि यथा । षण्णामप्याग्नेयादियागानामेकस्मिन्नेवापूर्वे साध्ये ऐक्यमिष्यतइति । एवं षड् द्वादश चतुर्विंशतिश्च लक्षणानि प्राकृतानि वैकृतानि च सप्रतिपक्षाणि दर्शितानि ॥ ८५ ॥

इदानीं षड्द्वादशचतुर्विंशतिव्यतिरिक्ता अप्यमी बहुप्रकारा न्यायाः पदार्थनिश्चयहेतवः सन्तीति प्रौढवादितया टीकाकारः प्रदर्शयितुमाह ॥

प्रसज्य प्रतिषेधोयं पर्युदासो ऽयमत्र तु ।

---

(१) यजतीति २ पु० पा० ।

इदं गौणमिदं मुख्यं व्यापीदं गुरु लघ्विदम् ॥ ८६ ॥
भेदेनाङ्गाङ्गिभावोस्य बहुभेदं विकल्प्यते ।
इदं नियम्यते ऽस्यात्र योग्यत्वमुपजायते ॥ ८७ ॥
अस्य वाक्यान्तरे दृष्टाल्लिङ्गाद्भेदोनुमीयते ।
अयं शब्दादपोद्धृत्य पदार्थः प्रविभज्यते ॥ ८८ ॥
इति वाक्येषु ये धर्माः पदार्थोपनिबन्धनाः ।
सर्वे ते न प्रकल्पेरन्पदं चेत्स्यादवाचकम् ॥ ८९ ॥

तत्र "प्रसज्य प्रतिषेधोयमि"ति । यत्र क्रियापदेन नञः संबन्धो वाक्यभेदश्च । शास्त्रे यथा । अकर्त्तरि च कारकइति । वेदे यथा । ब्राह्मणो न हन्तव्यः । नानृतं वदेदित्यादि । लोके यथा । असूर्यंपश्या राजदारा इति । "पर्युदासोयमत्र त्वि"ति । पर्युदासः (१) खलु प्रसज्य प्रतिषेधविपरीतस्तत्र ह्याख्यातेनैव नञः संबन्धः एकवाक्यता च । उक्तं च । "नामधात्वर्थयोगेन (२) नैव नञ् प्रतिषेधक" इति । तत्र शास्त्रे यथा । आतो ऽनुपसर्गे क इति । वेदे यथा । अब्राह्मणः सोमविक्रयीत्यत्र जातिमात्रानुगमेन ब्राह्मणसदृशस्य कस्य चिदेव प्रतिपत्तिः । यथा च नोद्यन्तमादित्यमीक्षेतेत्येवमादि स्मार्त्तमुदाहरणमदूरविप्रकर्षादत्र वैदिकमेव । लोके यथा । अब्राह्मणमानयेति । "इदं गौणमि"ति । शास्त्रे यथा । तत्पुरुषः समानाधिकरण इति । अत्रावयवानां समानाधिकरणत्वात्तत्पुरुषस्यापि समानाधिकरणत्वम् । वेदे यथा । आदित्यो यूपः यजमानः प्रस्तर इति । अत्र गुणाद्याकचक्यादेर्यूपादिरादित्यादिरित्युच्यते । लोके च सिंहो माणवकः गङ्गायां घोष इत्यादि । "इदं मुख्यमि"ति । अत्र शास्त्रे यथा । धा-

(१) पर्युदासश्चेति २ पु० पा० ।
(२) योगी तु इति २ पु० पा० ।

तोः प्रातिपदिकादित्यादावभिधेयस्य मुख्यत्वम् । वेदे यथा । यजमानोध्वर्युमन्वालभतइत्यत्राध्वर्युयजमानौ मुख्याविव । लोके यथा शूरो माणवक इति । "व्यापीदमि"ति । शास्त्रे यथा । एकश्रुति दूरात्संबुद्धाविति तत्र हि लौकिक्याः संबुद्धेर्ग्रहणं व्यापित्वात् । तद्ग्रहणे हि शास्त्रीयापि संबुद्धिः परिगृहीता भवति । वक्ष्यति च "विषयं कृत्रिमस्यापि लौकिकः क्व चिदुच्चरन् । व्याप्नोति दूरात्संबुद्धौ तथा च ग्रहणं द्वयोरि"ति । यावत्सु चोभयानुग्रहस्तत्र सर्वमनुगन्तव्यं व्यापित्वेनेति । वेदेपि सर्वे प्रधानयागविषयाः ज्योतिष्टोमेनेत्याद्यधिकारविधयः । लोकेपि यथा । कया चिदितिकर्त्तव्यतया सन्निहत्यामपरसिंधुस्नानम् । यदुच्यते । "उपोष्य रजनीमेकां सन्निहत्यां नरोत्तमः । सौर्ये तमसि गङ्गायां चान्द्रे चापि विमुच्यत"इति । अत्र सकृदेव स्नानात्त्रैलोक्याभ्यन्तरगतसर्वतीर्थस्नानमिति व्याप्युदाहरणं प्रसङ्गादुक्तम् । "गुरु लघ्विदमि"ति । तत्र शास्त्रे यथा । पृषोदरादीनि यथोपदिष्टमिति शिष्टप्रसिद्धसाधुशब्दौघप्रतिपादने लघुरुपायः । स एव तु प्रातिपादिकादनभिहितकर्मादिगतैकत्वादौ स्वादय इत्यादिना गुरुरुपायः । (१) लोकेपि लोहितशालिमानयं ग्राम इत्यादिवचनव्यक्तिषु कर्मधारयमत्वर्थीययोरेकत्र क्रियमाणयोः गुरुक्रम उपजायते लघुत्वं तु प्रक्रमस्य बहुव्रीहि(२)स्त्वेति । वेदे तु गुरुलाघवव्यवहारस्तन्त्रप्रसङ्गाद्वृत्तिषु । तत्रावृत्तौ गुरुः प्रक्रमो (३) यथा । त्रिः प्रथमामन्वाह त्रिरुत्तमामिति । तन्त्रप्रसङ्गयोस्तु लाघवव्यवहारो यथा निदर्शितं प्रागिति । "भेदेनाङ्गाङ्गिभावोस्ये"ति । यथा शास्त्रे । संयुक्तविधानेषु तस्यापत्यं कर्त्तरि कृदित्यादि । वेदे यथा । एकस्यैवा-

---

(१) उपाय इति २ पु० नास्ति ।

(२) बहुव्रीहिरिति २ पु० पा० ।

(३) क्रम इति २ पु० पा० ।

वयवः संबध्यमानो व्यवहितैरपि वाक्यान्तरैः संबन्धमुपयाति । यथा । अच्छिद्रेणेत्यादिष्वित्यत्यादिभिरिति । पूर्वमेकैकस्यैवाङ्गाङ्गिभाव इदानीं बहूनामङ्गिनां यथाप्रदर्शितमेकमङ्गमिति पुनरस्योपादानं लोकेपि ॥

मणिः शाणोल्लीढः शरदि सरितः श्यानपुलिनाः
कलाशेषश्चन्द्रः सुरतमृदिता बालललनाः ।
मदक्षीणो नागः समरविजयी हेतिनिहत-
स्तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नराः ॥

इत्यादिदीपकालंकारेष्वेकस्या एव क्रियाया बहुभिर्वाक्यैः संबन्ध इति । बहुभेदं विकल्प्यतइति । तत्र शास्त्रे । क्व चित्प्राप्तविकल्पः । क्व चिदप्राप्तविकल्पः । क्व चिदुभयविकल्पः । वेदे यथा । यत्किंचित् प्रागग्नीषोमीयात्तत्सर्वमुपांशु कर्त्तव्यमित्यत्रोपांशुस्वरे प्राप्ते दीक्षणीयायां यथेष्टमुच्चैः स्वरविधानमित्यादि । लोके यथा । किं तारुण्यतरोरियमित्यादौ महाकविभिरुत्प्रेक्षिता विकल्पाः । "इदं नियम्यत"-इति । शास्त्रे यथा । पतिः समासएव ते प्राग्धातोरित्यादि । वेदे यथा । नक्षत्रं दृष्ट्वा वाचं विसृजेदिति । अत्र नियतएव काले वाग्विसर्गो नियमितः । लोकेपि यथा । पार्थ एव धनुर्द्धर इत्यत्र धानुष्कत्वं पार्थे नियम्यते । "अस्यात्र योग्यत्वमुपजायत"इति । यथा शास्त्रे । उः स्थाने ऽणः प्रसज्यमानस्यैव रपरत्वं प्रति योग्यत्वमुपजायतइति । यथा वा पदएकस्मिन्नुदात्ते स्वरिते वा क्रियमाणे वर्ज्यमानशेषस्य निघाते योग्यत्वमुपजायते । वेदे यथा । ज्योतिष्टोमेन यजेतेत्यत्र त्रैवर्णिकस्यैव योग्यत्वम् । लोके यथोच्यते धुरि धुर्यो नियुज्यतइति । यो यः कश्चिदर्थी समर्थः शास्त्रेणापर्युदस्तः स योग्य इत्युच्यते ॥ ८७ ॥

"अस्य वाक्यान्तरे दृष्टाल्लिङ्गाद्भेदः प्रतीयत"इति । शास्त्रे यथा । ओः पुयण्ज्यपर इति वचनाणो कृतं स्थानिवद्भवतीति । वेदे यथा ।

अक्ताः शर्करा उपदधाति इत्यत्र केनाक्ता इत्यकाङ्क्षायां तेजो वै घृतमिति घृतस्तुतेर्वाक्यान्तराल्लिङ्गात् घृतेनाक्ता इति विशेषः प्रतीयते। लोके यथा। रामो ऽसौ भुवनेष्वित्यादौ दाशरथिः परशुरामो वेति संशये वाक्यान्तरगादेकबाणाहतश्रेणीभूतविशालतालविवरोद्गीर्णैः स्वरैः सप्तभिरिति लिङ्गाद्दाशरथिप्रतिपत्तिरेवेति। "अयं शब्दादपोद्धृत्य पदार्थः प्रविभज्यत" इति । शास्त्रे यथा। धृषशसी वैयात्यइत्यस्माद्वैयात्यशब्दादपोद्धृत्य वियातभावो वैयात्यमिति विभज्यते। वेदे यथा। वायव्यं श्वेतमालभेतेत्यस्माद्वाक्याद्वायव्यपदार्थादपोद्धृत्य वायुर्वै क्षेपिष्टा देवतेति प्रविभज्यते। लोकेपि राजपुरुष इत्युक्ते कस्य राज्ञः शूद्रकस्येति प्रश्नोत्तरयो राजपदार्थप्रविभागः ॥ ८८ ॥

इदानीं प्रकृते चोद्यमुपसंहर्तुमाह। "इति वाक्येषु ये धर्माः पदार्थोपनिबन्धनाः। सर्वे ते न प्रकल्पेरन्पदं चेत्स्यादवाचकम्"। अनंशे वाक्ये ऽभ्युपगम्यमाने वाक्येषु पदसमुदायरूपेषु सत्यपदार्थोपनिबन्धनेषु ये धर्मा वाक्यार्थानुग्राहिणः शब्दार्थविशेषसंप्रत्ययप्रतिबद्धास्ते सर्वेत्रा ऽविद्यमानोद्देशप्रविभागे न प्रतिष्ठां लभेरन् यदि सत्यं पदं वाचकं न स्यादिति पदवादी प्रत्यवतिष्ठते ॥ ८९ ॥

एवं पदवादिना ऽखण्डवाक्यवादिनी दूषणजाते (१) समापिते इदानीमेतत्समाधातुमखण्डवाक्यवाद्याह ॥

अविभक्ते ऽपि वाक्यार्थे शक्तिभेदादपोद्धृते ।
वाक्यान्तरविभागेन यथोक्तं न विरुध्यते ॥ ९० ॥

एतत्सर्वं यथोक्तमस्मत्पक्षे न विरुध्यते । तथा चास्मत्पक्षे अविभक्ते निर्विभागे वाक्यार्थे एकस्मिन्पानकरसादिवत्समाश्रीयमाणे शक्तिभेदसमाश्रयणेन चापोद्धते कृतापोद्धारे सत्यवान्तरवाक्यार्थोपजननात्सर्वमेतत्सिध्यतीति तात्पर्यम्। यथा शाक्यदर्शने निर्विभागमेव स-

(१) जाते इति २ पु० पा० ।

कलत्रैलोक्यविलक्षणं सत्त्वं स्वलक्षणमभ्युपगम्यते। तत्तदितरपदार्थव्यावृत्तिसमाश्रयणेन च जात्यादिव्यवहारः कश्चिन्निर्वाह्यते तथैवाखण्डवाक्यवादिना शक्तिभेदाद्वाक्यार्थप्रविभागे कृते सर्वं युज्यतइति न कश्चिद्दोषः। 'वाक्यान्तरविभागेना''विभक्तेपि वाक्यार्थे'इति च वाक्यवाक्यार्थयोरेकयोगक्षेमत्वादुक्तम्। पदार्थासंभवपूर्वके चोद्ये 'वाक्यान्तरविभागेने'त्युत्तरमसमीचीनमिव लक्ष्यतइति चेत्। बाध्यबाधकभावादिन्यायो वाक्येष्वपि दृश्यते। ततो महावाक्यापेक्षयावान्तरवाक्योपप्लवनेन(१) तदपि न विरुध्यतइत्युपदर्शितं तदुपदर्शनेन परिमितपरिमाणेपि वाक्ये पदार्थापोद्धारनिबन्धना अप्येते न्यायाः सम्भवन्तीत्युपदर्शितमेव भवति ॥ ६० ॥

एतदेव प्रसिद्धदृष्टान्तोपदर्शनेन द्रढयितुमाह ॥

यथैवैकस्य गन्धस्य भेदेन परिकल्पना।
पुष्पादिषु तथा वाक्येष्वर्थभेदोऽभिधीयते ॥ ६१ ॥

स्रक्चन्दनादावेक उपसंनिविष्ट एव गन्धस्तस्य त्वपोद्धारसमाश्रयेण भेदः कल्प्यतेऽयं पुष्पगन्धोऽयञ्चन्दनगन्ध इत्यादि। [तथा वाक्यएवार्थापोद्धारसमाश्रयणेन पदार्थभेद उपपद्यते अयं देवदत्तपदार्थोऽयङ्गोपदार्थ इत्यादि] (२) ॥ ६१ ॥

दृष्टान्तान्तरमाह ॥

गवये नरसिंहे वाप्येकज्ञानावृते यथा।
भागं जात्यन्तरस्यैव सदृशं प्रतिपद्यते ॥ ६२ ॥

एकज्ञानेनाभिन्नेनैवावृते विषयीकृते परिच्छिन्ने गवयादौ सति तदेकदेशं प्रसिद्धं जात्यन्तरस्यैव प्रतिपद्यते। एवमपोद्धारसमाश्रयणेन

---

(१) प्लावनेति २ पु० पा०।
(२) [ ] एतन्मध्यस्थं २ पुस्तके नास्ति।

सर्वन्यायसमर्थने कृते तत्समानयोगक्षेमतया प्रतिनिधिः स्तुतिवाक्यविरोधश्च समर्थित एव । अग्रे त्ववान्तरवाक्यानामर्थवत्त्वं समर्थयिष्यते ॥ ८२ ॥

अधुना तमेवापोद्धारमाश्रित्य पिकादिसंदेहे चोद्य(१)मुद्धर्त्तुं प्रस्तावनां करोति ॥

अप्रसिद्धं तु यद्भागमदृष्टमनुपश्यति ।
तावत्त्वसंविदं मूढः सर्वत्र प्रतिपद्यते ॥ ८३ ॥

तत्र च गवयादौ भागमप्रसिद्धमदृष्टमनिश्चितमनुपश्यति मूढः । परमार्थतस्तु संवित्तस्य सर्वत्र निर्विभागे तस्मिन् कुतश्चित्कारणान्नोत्पन्ना । सर्वत्रायमसंविदं तावत्पुनः प्रतिपद्यतइति ॥ ८३ ॥

प्रकृते योजयितुमाह ॥

तथा पिकादियोगेन वाक्ये ऽत्यन्तविलक्षणे ।
सदृशस्येव संज्ञानमसतो ऽर्थस्य मन्यते ॥ ८४ ॥

वनात्पिक आनीयतामित्येतद्वनाद्वृच्च आनीयतामित्येतस्माद्वाक्यान्तरादत्यन्तविलक्षणमेव । वनादानीयतामिति चात्रासन्नेवार्थो वनाद्वृच्च आनीयतामित्यस्य क्रमवशात्सदृश इति मन्यते । परमार्थतस्तु पिकादियोगात्सकलमेवात्यन्तविलक्षणम् । एकपदार्थसंदेहे सकलमेवाज्ञातं वाक्यमित्युच्यते ॥ ८४ ॥

दृष्टान्तमाह ॥

एकस्य भागे सादृश्यं भागे भेदश्च लक्ष्यते ।
निर्भागस्य प्रकाशस्य निर्भागेनैव चेतसा ॥ ८५ ॥

यथैकमेव नीलपीतादिज्ञानं प्रकाशस्वभावात्(२) निरंशमेवोपजातं

(१) संदेहचोद्यमिति २ पु० पाठः ।
(२) स्वभावे इति २ पु० पाठः ।

तस्य ज्ञानत्वेन सादृश्यं मन्यते। नीलपीतादिना च भेदः । वस्तुतः पुनर्भिन्नमेव नीलज्ञानं पीतज्ञानादिति न तत्रानुगमः कश्चित्। अथ वा चित्रज्ञानयोरेव भागे सादृश्यं भागे भेदं प्रतिपद्यते । किंचिद्धि चित्रज्ञानं(१) नीलहरितोल्लेखि। किंचिद्धि नीलपीतोल्लेखीति नीलादिना तत्र सादृश्यं हरितादिना भेदं प्रतिपद्यतइति ॥ ९५ ॥

दार्ष्टान्तिके योजयितुमाह ॥

तथैव भागे सादृश्यं भागे भेदोऽवसीयते ।
भागाभावेपि वाक्यानामत्यन्तं भिन्नधर्मणाम् ॥ ९६॥

प्रतीतार्थः श्लोकः ॥ ९६ ॥

इदानीमखण्डवादी पदवादिनं दूषयितुमाह ॥

रूपनाशे पदानां स्यात्कथं चावधिकल्पना ।
अगृहीतावधौ शब्दे कथमर्थो विविच्यते ॥ ९७ ॥

यदि पदान्येव सत्यानि तदा दध्यानयेत्यादिसंहितायां रूपविनाशात्पदस्य नियतत्वाभावे कमवधिं गृहीत्वा तदर्थो विविच्यते अतः प्रविभागशून्यं वाक्यमेवैकं सत्यमभ्युपगन्तव्यम् ॥ ९७ ॥

अथाखण्डपक्षे श्वेतो धावतीत्येतत्प्रश्नद्वयाऽपाकरणाय कथमेकं वाक्यं अत्र हि श्वा इत्येतद्रूपं संहितावशाद्विनष्टमित्येतत्पदार्थासंभवात्कथं तदवगतिः तत्राह ॥

संसर्ग इव रूपाणां शब्देऽन्यत्र व्यवस्थितः ।
नानारूपेषु तद्रूपं तत्त्वेणापरमिष्यते ॥ ९८ ॥

श्वेत इत्यादौ शब्दे अन्यत्राखण्डपक्षे रूपाणां संसर्ग इव व्यवस्थितः अतश्च तद्रूपमपरं तत्त्वेणावस्थितं तेषु नानारूपेषु प्रत्यायकमिष्यतइत्यदोषः ॥ ९८ ॥

(१) किंचिद्धिचित्रेति २ पु० पाठः ।

तदेव व्याचिख्यासुराह ॥

तस्मिन्नभेदे भेदानां संसर्ग इव वर्त्तते ।
रूपं रूपान्तरात्तस्मादनन्यत्प्रविभज्यते ॥ ६६ ॥

तस्मिन्नभेदे एकस्मिन्नेव श्वेत इत्येव रूपे भेदानां श्वा इतः श्वेतश्च इत्येतेषां संसर्ग इव स्थितः । तस्मात्तद्रूपं रूपान्तरादनन्यदपि तन्त्र-न्यायसमाश्रयणेनोभयार्थप्रत्यायकतया प्रविभज्यतइत्यस्मिन् पक्षे श्वेत इत्येतदखण्डमेव प्रत्यायकम् ॥ ६६ ॥

अथात्रैव प्रसङ्गात्प्रत्याय्यप्रत्यायकयोर्विषयभेदेन भेदाभेदौ स्मृता-वित्याह ॥

शास्त्रे प्रत्यायकस्यापि क्वचिदेकत्वमाश्रितम् ।
प्रत्याय्ये तु क्वचिद्भेदो ग्राह्यग्रहणयोः स्मृतः ॥१००॥

तत्राभेदं प्रत्याय्यप्रत्यायकयोः प्रदर्शयति ॥

ऊइत्यभेदमाश्रित्य यथासंख्यं प्रकल्पितम् ॥१००ऽऽ॥

ऊकालो ऽज्झ्रस्वदीर्घप्लुत इत्यत्रोक्तम् । ह्रस्वादिषु समसंख्या ऽप्रसि-द्धे(१)रुद्देशनिर्देशवैषम्यात् । सिद्धं तु समसंख्यत्वात्त्रयाणां हि विकार-निर्देशः । ततश्च ऊकाल इत्यत्र मात्रिकद्विमात्रत्रिमात्राणां संसृज्य नि-र्देशात्प्रत्याय्यप्रत्यायकयोरभेदे समसंख्यत्वान्निर्देशसाम्ये संख्यातानुदे-शे सिद्धे ह्रस्वदीर्घप्लुतसंज्ञाः पृथगवतिष्ठन्तइति न कश्चिद्दोषः ॥१००ऽऽ॥

प्रत्याय्यप्रत्यायकयोर्भेदं निदर्शयितुमाह ॥

लृङ्लृटोर्ग्रहणे भेदो ग्राह्याभ्यां परिकल्पितः ॥१०१॥

स्यतासी लृलुटोरित्यत्र लृशब्देन लृङ्लृटौ प्रत्याय्येते इति नि-मित्तनिमित्तिनोर्वैषम्यात्संख्यातानुदेशाभावः प्राप्नोति । यथासं-ख्यमनुदेशः समानामित्यत्रोक्तम् । "संख्यासाम्यं शब्दतश्चेत् णलादयः

(१) अप्रसिद्धिरिति २ पु० पाठः ।

परस्मैपदानाम् । डारौरसः प्रथमस्य एचोयवायाव इत्यनिर्देशः । अर्थ-तश्चेत् ल्लुटोर्नन्यरीहणसिंधुतत्तशिलादिषु" इति चोद्यमेवं पत्तद्वय-उपस्थितं तत्रोच्यते ल्लुटोरित्यत्र लरूपमुत्सृष्टानुवन्धसामान्यमात्रं प्र-त्यायकमभिन्नमेव न पुनः प्रत्याय्यभेदाद्भिन्नमत्राभ्युपगम्यते । ततश्च निमित्तिनिमित्तिनोः साम्यात्संख्यातानुदेशः सङ्गच्छतइति न कि-ञ्चिदनिष्टम् ॥ १०१ ॥

अथ प्रत्याय्यप्रत्यायकयोरन्यत्राप्यभेदं दर्शयितुमाह ॥

यस्येत्येतद्वर्णो रूपं संज्ञिनामभिधायकम् ।
न हि प्रतीयमानेन ग्रहणस्यास्ति सम्भवः ॥ १०२ ॥

इश्च अश्च तद्यं तस्य यस्य यदेतत्संसृष्टेकाराकारयोरूपमर्णोः प्र-त्यायकम् तत्संज्ञिनामिवर्णावर्णानामभेदात्प्रत्यायकं भवति तेन ई-काराकारयोरपि सौपर्णेयो वैनतेय इत्यत्र लोपः प्रवर्त्तते । यदि चात्र प्रत्याय्यप्रत्यायकयोरभेदो नाश्रीयते तदा प्रतीयमानेन प्रत्याय्यमाने-नान्येषां ग्रहणस्य प्रत्यायनस्य संभव इति नात्रेष्टं सिध्येत् । तस्मात्त-न्त्रेणोच्चारितमेकमेवोभयोः प्रत्यायकं संसृष्टरूपत्वादित्यस्येव श्वेतो धावतीत्येतस्मादुभयार्थप्रतीतिः ॥ १०२ ॥

अवान्तरवाक्योपप्लावनेनैतद्वोभयार्थप्रत्यायकं भविष्यतीति दृष्टा-न्तेन प्रदर्शयितुमाह ॥

ऊइत्येतदभिन्नं च भिन्नवाक्यनिबन्धनम् ।
भेदेन ग्रहणं चास्य पररूपमिव द्वयोः ॥ १०३ ॥

ऊकाल इत्येतदुपात्तम् । तद्धस्वदीर्घप्लुतानां त्रयाणां सामान्येना-भिन्नं रूपं बोद्धव्यम् । ततश्चैतदेकं ग्रहणकवाक्यस्थानीयं, अवान्तरवा-क्यनिबन्धनं भवतीत्याह । 'भिन्नवाक्यनिबन्धनमि'ति । उकालोऽज्झ्र-स्वसंज्ञः । ऊकालो दीर्घसंज्ञः । ऊ३कालः प्लुतसंज्ञो बोद्धव्य इति ।

अतश्च यदा संसृष्टत्वादस्याभेदेनैव ग्रहणं प्रत्यायके स्थितं तदा जड्-त्येतद्रूपं भिन्नवाक्यनिबन्धनमेव भवति । यथा पररूपं संसृष्टत्वादेक-मपि द्वयोः प्रत्यायकं दृश्यते । तथैतद्बोद्धव्यम् । ततश्च श्वेतो धावतीत्या-दाववान्तरवाक्योपप्लावनेनोभयार्थता भविष्यतीति योजनीयम् ॥ १०३॥

शब्दानां भेदपक्ष एव वार्तिककारस्याभिरुचित इति दर्शयितुमाह ॥

प्लुतस्याङ्गविवृद्धिं च समाहारमचोस्तथा ।
व्युदस्यता पुनर्भेदः शब्देष्वत्यन्तमाश्रितः ॥ १०४ ॥

प्लुतावैच इदुतावित्यत्रोक्तम् । "अङ्गविवृद्धिर्नोपपद्यते । न ह्यैचोवयवो ऽकार इकार उकारौ वे"त्येवमङ्गविवृद्धिं व्युदस्यता तावेव शब्दावेकत्र संमिलिताविति उपदर्शितः प्रागभेदः स पराकृतः । तथा ऽचोः समा-हारं व्युदस्यता भेद एवेष्यतइति । यदाह "समाहारो ऽचोश्चेन्नाभा-वादि"ति । तस्मात् श्वेतो धावतीत्यादौ सदृशयोर्मेलनमनुपदमवान्त-रवाक्योपप्लावनेन तन्त्रन्यायसमाश्रयणेन वा समर्थनं तज्ज्याय इति ॥ १०४ ॥

अथ तन्त्रमुपसंहर्तुमुपक्रमते ॥

अर्द्धर्चादिषु शब्देषु रूपभेदः क्रमाद्यथा ।
तन्त्रात्तथैकशब्दत्वे भिन्नानां श्रुतिरन्यथा ॥ १०५ ॥

यथा क्रमवशेन अर्चो ऽर्द्धं अर्द्धर्च इति एकस्यैव शब्दस्य रूपभेदस्तथा तन्त्रन्यायाश्रयणेनैकशब्दत्वे भिन्नानां रूपाणामन्यथा श्रुतिरभिन्ना श्रुतिर्बोद्धव्येति तन्त्रमुपसंहृतम् ॥ १०५ ॥

एतदेव स्फुटीकर्तुमाह ॥

संहिताविषये वर्णाः स्वरूपेणाविकारिणः ॥
शब्दान्तरत्वं यान्तीव शक्त्यन्तरपरिग्रहात् ॥ १०६ ॥

स एव शब्दो ऽनेकशक्तिवर्शतया संहिताविषये प्रतिभासतद्रत्वे-

कस्यैव श्वेतशब्दस्य संहितयोच्चारणाच्छक्त्यन्तरपरिग्रहेणोभयार्थप्रत्यायकत्वं मन्यते ॥ १०६ ॥

एकस्यापि निमित्तभेदाद्भेद उपजायतइति दृष्टान्तप्रदर्शनेनाह ॥

इन्द्रियादिविकारेण दृष्टं ग्राह्येषु वस्तुषु ।
आत्मत्यागादृते भिन्नं ग्रहणं स क्रमः श्रुतौ ॥ १०७ ॥

यथा काचाद्युपहतचक्षुषामेकाकारमपि वस्तु नानारूपतयावभासते । तथा संहितावशादेकोपि शब्दो रूपान्तरेणावभासते ॥ १०७ ॥

एतदेवोपसंहर्त्तुमाह ॥

अभिधानक्रियाभेदाच्छब्देष्वविकृतेष्वपि ।
रूपमत्यन्तभेदेन तदेवैकं (१) प्रकाशते ॥ १०८ ॥

अभिधानक्रिया संहितयोच्चारणमेव तया योगात्तत्सम्बन्धादविकृतेष्वपि शब्देष्वेकमेव शक्त्यन्तरपरिग्रहादत्यन्तभेदेन प्रकाशते ॥ १०८ ॥

अथैतदेवागमविषये दृश्यते तेन संवादयितुमाह ॥

ऋचो वा गीतिमात्रं वा साम द्रव्यान्तरं न तु ।
गीतिभेदाद्विशृह्यन्ते ता एव विकृता ऋचः ॥ १०९ ।

ऋच एव तथोदीरिताः सामाख्यां यथा प्रतिलभन्ते । विशेषेणोदीरणमात्रं वा साम । यथोच्यते "गीतिषु सामाख्ये"ति । ऋचो वासामेत्येतत् ज्ञापयितुमाह । 'गीतिभेदादि'त्यादि । तदेवं भेदाभेदविवक्षाभिन्नेन प्रत्याय्यप्रत्यायकभावेन अत्यन्तभेदरूपेण वा 'संहिताविषये वर्णा' इत्यत्रोक्तं प्रकारेण(२)तत्प्रतिपत्त्येण वा ऽवान्तरवाक्योपप्लावनरूपेण श्वेतो धावतीत्यत्रैकत्वेपि वाक्यस्यार्थभेदो भविष्यतीति ना-

---

(१) तदेवैकमिति २ पु॰ पाठः ।
(२) उक्तप्रकारेणेति २ पु॰ पाठः ।

स्मत्पचे पदानामनभ्युपगमेपि का चित् चतिः ॥ १०९ ॥

अथ पुनरपि तन्त्रन्यायेनैतत् समर्थयितुमाह ॥

उपायाच्छ्रुतिसंहारे भिन्नानामेकशेषिणाम् ।
तन्त्रेणोच्चारणे तेषां शास्त्रे साधुत्वमिष्यते ॥ ११० ॥

उपायात्तन्त्रलचणाद्भिन्नानामपि शब्दानामेकस्यां श्रुतौ संहारः संश्लेषो गौसर्त्वं । कीदृशानां भिन्नानामित्याह । एकशेषिणामिति । एकशेषसाधर्म्यात्तन्त्रेणोच्चारिता अप्येकशेषिण उच्यन्ते । यथोक्तं वार्त्तिककृता । "हलन्त्यमेकशेषनिर्देशादि"ति तेनैकशेषिणां तन्त्रन्यायवतामिति यावत् । उपायादित्यादेः पूर्वस्य श्लोकस्य स्फुटीकरणायोक्तं तन्त्रेणोच्चारणइत्यादि ॥ ११० ॥

तस्मादेवंविधे विषये भिन्नानामपि शब्दानां किंचित्सादृश्यमुपादाय तन्त्रेणैव प्रतिपादनं कार्यमित्याह ॥

परिलभ्य श्रुतिं चैकं रूपं भेदवतामपि ।
तन्त्रेणोच्चारणं कार्यमन्यथा ते न साधवः ॥ १११ ॥

यद्यपि च सरूपाणां वाक्यानां शास्त्रेण साचात्तन्त्रेण प्रतिपादनं न कृतम् । नाप्येकशेषस्य प्रतिपादनम् । तथापि समानन्यायत्वात्सर्वमपि शब्दानुशासनोपयोगीति प्रतिपादितमुक्तमेवेत्यूह्यतइति प्रतिपादयितुमाह ॥

सरूपाणां च वाक्यानां शास्त्रेण प्रतिपादितम् ।
तन्त्रेणोच्चारणादेकं रूपं साधूपलभ्यते ॥ ११२ ॥

एतदेव दृष्टान्तप्रदर्शनपूर्वकमुपसंहर्त्तुमाह ॥

एकस्यानेकरूपत्वं नालिकादिपरिग्रहात् ।
यथा तथैव तत्र स्यात् बहूनामेकरूपता ॥ ११३ ॥

यथैकोपि ध्वनिर्नालिकादिपरिग्रहोपधानवशान्नानाविधषड्ज-ऋषभादिरूपभेदवानुपजायते । तथा तन्त्रसमाश्रयणेन श्वा इतः श्वेत इत्येवमात्मकानां भिन्नानामपि शब्दानामेकरूपता श्वेत इत्येवंरूपतेति न कश्चित्तत्र दोषः ॥ ११३ ॥

इदानीं यदुक्तमवान्तरवाक्यानामर्थवत्त्वं न स्यादिति तत्प्रतिविधातुमाह ॥

तथा पदस्वरूपाणां वाक्यानां सम्भवः पृथक् ।
तथा वाक्यान्तराभावे स्यादेषां पृथगर्थता ॥ ११४ ॥

यथा ऽखण्डपक्षे वाक्यानां पदस्वरूपाणामवान्तरवाक्यानामपोद्धारबुद्ध्या सम्भवमुपकल्प्यार्थस्तेषां महावाक्योपयोगी व्यवस्थाप्यते । यदि तथा न प्रकल्पेत (१) न तदा महावाक्यार्थसम्प्रत्ययः स्यात् । तथा वाक्यान्तराभावएषां पृथगर्थता स्यात् । यावता ऽपोद्धारसमाश्रयणेन वाक्यान्तराण्युपकल्प्य पृथगर्थत्वमसत्यमप्येषामभ्युपगम्यतइति नास्त्यवान्तरवाक्यानुपपत्तिचोद्यम् ॥ ११४ ॥

इदानीं प्रयोजनं वाक्यार्थ इति पक्षे दूषयितुमाह ॥

अभिधेयः पदस्यार्थो वाक्यस्यार्थः प्रयोजनम् ।
यस्य तस्य न सम्बन्धो वाक्यानामुपपद्यते ॥ ११५ ॥

वाक्यस्यार्थो वाक्यप्रयोजनमुच्यते । न त्वभिधेयः । कस्यायमर्थः स्यादित्याह 'अभिधेयः पदस्यार्थ' इति । पदानामर्थो ऽभिधेय उच्यते । एतन्निराकरोति । 'यस्य तस्ये'त्यादि । एवंवादिनः परस्परं वाक्यानां सम्बन्धो न स्यात् । कीलायःशलाकाकल्पानां वाक्यानां किंकृतः सम्बन्धो भवति । अभिधेयद्वारकः परस्परं सम्बन्धः स्यात् । अभिधेयं च वाक्यानां नास्तीत्यसम्बन्धानि वाक्यानि प्राप्नुवन्तीति यत्किं

(१) प्रकल्प्येतेति २ पु० पाठः ।

चित् ॥ ११५ ॥

अथान्विताभिधानसमाश्रयणेनैतत्समर्थयितुमाह ॥

तत्र क्रियापदान्येव व्यपेक्षन्ते परस्परम् ।
क्रियापदानुषक्तस्य सम्बन्धोऽतः प्रतीयते ॥ ११६ ॥

क्रियापदमाक्षिप्तसमस्तसाधनव्रातं निराकाङ्क्षं संपद्यते क्रियापदानुषक्तः परस्परसम्बन्धो निराकाङ्क्षस्तस्मादुपपन्न इति न काचित् क्षतिः ॥ ११६ ॥

ननु चान्विताभिधानं न युक्तमिव प्रतिभाति । तथा हि । यदि प्रथममेव सकलविशेषयुक्तो वाक्यार्थोऽवगतः स्यात् । तदुत्तरकालभाविनां गवादीनामभिधाने न किं चित्प्रयोजनमुत्पश्यामः । अवगतार्थानां हि पदानां पुनर्वचने वैयर्थ्यमापद्यतइत्याशङ्क्य समर्थयितुमाह ॥

आवृत्तिरनुवादो वा पदार्थव्यक्तिकल्पने ।
प्रत्येकं तु समाप्तोऽर्थः सहभूतेषु वर्त्तते ॥ ११७ ॥

अवगतार्थानामप्यावृत्तिर्नियमाय भविष्यति । उक्तस्य वार्थस्य स्फुटीकरणायानुवादस्तेषामसाविति नास्त्यानर्थक्यम् । एवमपि पूर्वस्य तिरोहितत्वात्सहत्वासम्भवादन्वयस्यासम्भवादर्थानवगम एव । एकस्मादेव च पदात्समस्तविशेषान्वितस्य वाक्यार्थस्याप्रतीतेरुत्तरेषां चानवगतार्थानां नियमानुवादपरिकल्पनायोगादसमञ्जस एवान्विताभिधानपक्षः । यदा पुनः सहभूतेष्विवासौ प्रत्येकं समाप्तोऽर्थ इत्युच्यते । यथोक्तम् "व्यक्तोपव्यञ्जना (१) सिद्धिरर्थस्य प्रतिपत्तृषु" इति । तदा नास्त्येव सहभूतानामुपादाने वैफल्यमिति न कश्चिद्दोषः ॥ ११७ ॥

तदेवं सङ्घातादीन्युद्दिष्टानि वाक्यलक्षणानि प्रासङ्गिकविचारस-

(१) व्यक्तोपरञ्जनाद् इति २ पु० पाठः ।

हितानि व्याख्यातानि । आख्यातं वाक्यमिति दर्शयिष्यते । वाक्यव्याख्याप्रसङ्गेन च वाक्यार्था अपि संसर्गसंसृष्टिनिराकाङ्क्षपदार्थप्रयोजनलक्षणाश्चत्वार उपदर्शिताः । प्रतिभां क्रियां च दर्शयिष्यति । नन्वेकस्यैव वाक्यार्थस्य कथं विकल्पप्रपञ्च इत्याशङ्क्य निरूपयितुमाह ॥

अविकल्पे ऽपि वाक्यार्थे
विकल्पा भावनाश्रयाः ॥ ११७ऽऽ ॥

वाक्यार्थो ऽविकल्प एव निर्विभाग एवाभ्युपगन्तुं युक्तः तस्मिंश्च तथाभूतेपि येमी विकल्पास्ते पुरुषाणामनेकशास्त्रभावनासमाश्रया बोद्धव्याः । न वस्त्वनुपातिन इति तद्वाक्यार्थ एक एव युक्तः । एतदेव प्रतिपादयितुमाह ॥

अत्राधिकरणे वादाः पूर्वेषां बहुधा गताः ॥ ११८ ॥

अस्मिन्नधिकरणे विचारस्थाने पूर्वेषामाचार्याणां प्रवादा बहुधा गताः शास्त्रसंस्कारवासितचेतसां तेषामिति कस्य पर्यनुयोगः क्रियते ॥ ११८ ॥

परमार्थतस्तु वाक्यार्थ एक एव सर्वो ऽपि शब्दः प्रतिभाया एव हेतुरिति तत्स्वरूपमिदानीं प्रस्तावयितुमाह ॥

अभ्यासात्प्रतिभाहेतुः शब्दः सर्वो ऽपरैः स्मृतः ।
बालानां च तिरश्चां च यथार्थप्रतिपादने ॥ ११९ ॥

अपरैराचार्यैः । सर्वः यः कश्चिच्छब्दः स प्रतिभाहेतुः । जडानामपि प्रतिभाहेतुरित्याह । बालानामित्यादि । आस्तां विदितसमयस्य किं न भविष्यत्यसौ प्रतिभाहेतुः । येप्यविदितसंकेता अमी बाला जडप्राया वा तिर्यञ्चः तेषामप्यनादिवासनावशात्तदर्थः प्रतीयमानो दृश्यते शब्दः । तथा च जडानामपि प्राणिनां नियतपदः

शब्दः सम्बोधनायोदीर्यते । तेन प्रतिनियतजात्यनुसारेणैव नियतैव का चित्प्रतिभा प्रबोध्यतइति तन्मूल एव सर्वः कश्चित्तेषां व्यवहारः । अनेनैतदुच्यते । यदियं प्रतिभा सर्वप्राणिसंवेद्या शब्दनिमित्ता सकलव्यवहारमूलभूता ऽनपह्नवनीया तदपन्हवे स्वात्मैव विप्रलभ्यते । तत्प्रतिभाभ्युपगमोवश्याश्रयणीयः ॥ ११९ ॥

अभ्यासात्प्रतिभाहेतुरित्युक्तं तत्राभ्यासः किमिदानींतनः उत जन्मान्तरभावी तस्य च किं स्वरूपं इत्याशङ्क्य स चाभ्यासो ऽनागम इदानींतनो न भवति । नहि बालस्य तदेवोपदिष्टं केन चिदिति जन्मान्तरभाव्येव । स च समय इष्यते । संकेतस्वरूपोसाविष्यतइति स्वरूपमेवास्य स्फुटयितुमाह ॥

अनागमश्च सो ऽभ्यासः समयः कैश्चिदिष्यते ।
अनन्तरमिदं कार्यमस्मादित्युपदर्शनम् ॥ १२० ॥

स चानन्तरमिदं कार्यमित्युपदर्शनस्वभावः । यथा कशाभिघातमात्रसमनन्तरमेव वाजिनो ऽभियान्ति अशाभिघङ्कातेन च गजा एवमन्येपि यथास्वं प्राणिनो ऽनादिवासनाभ्यासवशेन प्रतिभातः समुचितव्यवहारं कुर्वन्तो लोकयात्रां निर्वाहयन्तीति स्थितम् । एवमखण्डमेव वाक्यं प्रतिभा च वाक्यार्थ इति समाश्रयणीयं पदपदार्थापोद्धारमाश्रित्य प्रतिनिध्यादिकल्पनं प्रासङ्गिकादिन्यायनिर्वाहश्च भविष्यतीति व्यवस्थापितम् ॥ १२० ॥

अथ पदार्थप्रविभागश्चेत्समाश्रितस्तदुच्यतां पदस्यार्थ इति प्रविभागप्रसङ्गात्पदार्थविवेचनं मतभेदेन कर्तुमाह ॥

अस्त्यर्थः सर्वशब्दानामिति प्रत्याय्यलक्षणम् ।
अपूर्वदेवतास्वर्गैः सममाहुर्गवादिषु ॥ १२१ ॥

सर्वशब्दानामपरामृष्टाकारविशेषमर्थमात्रं वाच्यमिति केचिदा-

हुः । एतत्सर्वशब्दानां प्रत्याय्यलक्षणं प्रत्याय्यस्य वाच्यस्य लक्षणं बोद्धव्यम् । केन तुल्यमेतत्स्यादित्याह । अपूर्वदेवतेत्यादि । अपूर्वदेवतादि । अपूर्वदेवतादिषु हि नाकारप्रथनम् । यत्तु गवादिपदेषु आकारप्रथनं तन्नान्तरीयकतया बोद्धव्यम् । अन्यथा ऽपूर्वशब्दाद्देवताशब्दात् स्वर्गशब्दाद्स्वगवादिशब्दवदाकारादिप्रथनं स्यात् । यतश्च तेभ्यो नास्त्याकारादिप्रथनं अतोर्थमात्रमेव तैः प्रत्याय्यतइति युक्तम् ॥ १२१ ॥

अथ गवादिशब्देभ्य आकारादिप्रथनं दृष्टं ततश्च तद्वक्तुं शक्यं यद्विशिष्टपदार्थप्रत्ययो युक्त इत्याशङ्क्याह ॥

प्रयोगदर्शनाभ्यासादाकारावग्रहस्तु यः ।
न स शब्दस्य विषयः स हि यत्नान्तराश्रयः ॥ १२२ ॥

सास्नादिमत्स्वेव यदा गोशब्दप्रयोगं पश्यति तद्दर्शनाभ्यासाच्च यत्राकारपरिग्रहो यः स शब्दस्य प्रत्ययो न भवति । कस्मादित्याह । 'स ही'त्यादि । तस्मात्प्रयोगाभ्यासेन यत्नान्तरेण शब्दावगम्यातिरिक्तेन स प्रथते ततश्च शब्दाव्यापारो ऽसौ न भवतीति शब्दस्यार्थमात्रमेवापरामृष्टाकारविशेषं वाच्यं युक्तमित्येकः पक्षः ॥ १२२ ॥

इदानीं कश्चिच्छब्दवाच्यः कश्चित्तत्राकारोनुनिष्पादीति पक्षान्तरमाह ॥

केचिद्भेदाः प्रकाश्यन्ते
शब्दैस्तदभिधायिभिः ।
अनुनिष्पादिनः कांश्चि-
च्छब्दार्थ इति मन्यते ॥ १२३ ॥

केचिद्भेदा जात्यादयः शब्दवाच्याः केचित्तत्रार्थप्रयोजकाः अनुनिष्पादिन एव तथा तांश्च शब्दार्थ इत्यपरे मन्यन्ते ॥ १२३ ॥

एतदेव प्रत्याख्यातुमाह ॥

जातिप्रत्यायके शब्दे
या व्यक्तिरनुषङ्गिणी ।
न तान् व्यक्तिगतान् भेदान्
जातिशब्दो ऽवलम्बते ॥ १२४ ॥

जातिशब्दा जातिमात्रं प्रत्याययन्ति । व्यक्तिस्तु तत्रानुषङ्गिणी । निरधिकरणाया जातेरसम्भवादिति कृत्वा तद्व्यक्तिगतानाकारविशेषान् जातिपदार्थपक्षे जातिशब्दो नावलम्बते ॥ १२४ ॥

एतदेव व्यक्तीकर्त्तुमाह ॥

घटादीनां न चाकारान् प्रत्याययति वाचकः ।
वस्तुमात्रनिवेशित्वात्तद्गतिर्नान्तरीयकी ॥ १२५ ॥

घटादीनां प्रसिद्धानामाकारान्वाचकः शब्दो घटादिर्न प्रत्याययति । पृथुबुध्नोदराकारमात्रनिवेशित्वात् । न हि सकलविशेषसहितमर्थं शब्दः प्रत्याययितुमलमिति तत्राकारविशेषावगतिर्नान्तरीयक्येवानुनिष्पादिन्येव बोद्धव्या ॥ १२५ ॥

नान्तरीयकत्वमेव प्रदर्शयितुमाह ॥

क्रिया विना प्रयोगेण न दृष्टा शब्दचोदिता ।
प्रयोगस्त्वनुनिष्पादी शब्दार्थ इति मन्यते ॥ १२६ ॥

यजेतेति शब्दचोदिता क्रिया कर्तृकर्मसाधनसामग्रीं विना न दृश्यते । ततश्चासौ साधनयोगो यथा तत्रानुनिष्पादी तथा शब्दार्थो ऽवगन्तव्य इत्युपसंहृतम् ॥ १२६ ॥

अथ सर्वएवाकारा गुणप्रधाने भावेन (१) पदस्यार्थ इति तृतीयं पक्षं दर्शयितुमाह ॥

---

(१) गुणप्रधानभावेनेति २ पु० पाठः ।

नियतास्तु प्रयोगा ये नियतं यच्च साधनम् ।
तेषां शब्दाभिधेयत्वमपरैरनुगम्यते ॥ १२७ ॥

येन केन चिद्विना शब्दस्याभिधेयं न निर्वहति तत्सर्वं साध्यसाधनात्मकं शब्दाभिधेयं वक्तुं युक्तम् । किं चित्प्रत्याय्यते अन्यत्तत्र नान्तरीयकतयावगम्यतइत्यपि न शोभनं किं तु सर्वाकारमेवाभिधेयं गुणप्रधानभावेन यस्मात्प्रतीतमित्ययं पक्षः शोभनः ॥ १२७ ॥

समुदाय एव तुल्यकक्ष्यतया शब्दस्यार्थ इति चतुर्थं पक्षं दर्शयितुमाह ॥

समुदायोऽभिधेयः स्या-
दविकल्पसमुच्चयः ॥ १२७ऽऽ ॥

ननु यद्याकारसमुदायं समुच्चितमेव प्रत्याययति तर्हि बहुवचनमेव तत्र स्यात् । अथ विकल्पितं प्रत्याययति तदा वचनविकल्पः स्यादित्याशङ्क्याह । 'अविकल्पसमुच्चय' इति । अविद्यमानौ विकल्पसमुच्चयौ यस्यासौ तथाभुतस्तस्मात्प्रतीयतइति सम्भाव्यते । एतच्चोपमासमुद्देशेप्यर्थविचारणावसरे सविस्तरं प्रदर्शयिष्यति ॥ १२७ऽऽ ॥

अथ जातिगुणक्रियात्मकस्यार्थस्यासत्यभूतः संसर्ग एव शब्दार्थ इति पञ्चमं पक्षं दर्शयितुमाह ॥

असत्यो वाऽपि संसर्गः
शब्दार्थः कैश्चिदिष्यते ॥ १२८ ॥

घटादिभिः शब्दैर्घटादीनां जात्यादिसंसर्ग उच्यते । स चात्र तद्व्यतिरेकेणानुपलम्भादसत्यभूत एवोच्यते । तस्मात्संसृष्टः पदार्थ एव सत्यभूत इति ॥ १२८ ॥

अथ सत्यमेवासत्योपाधिविच्छिन्नं शब्दवाच्यमिति षष्ठं पक्षमाह ॥

असत्योपाधि यत्सत्यं
तद्वा शब्दनिबन्धनम् ॥ १२८ऽऽ ॥

शब्दस्य वा स्वरूपमेवाभिधेयमिति सप्तमं पक्षं दर्शयितुमाह ॥

शब्दो वाप्यभिजल्पत्व-
मागतो याति वाच्यताम् ॥ १२९ ॥

अभिजल्पत्वमध्यासरूपत्वमागतः शब्द एव स्वरूपलक्षणः शब्दस्य वाच्यः ॥ १२९ ॥

अभिजल्पस्वरूपमाह ॥

सो ऽयमित्यभिसम्बन्धाद्रूपमेकीकृतं यदा ।
शब्दस्यार्थेन तं शब्दमभिजल्पं प्रचक्षते ॥ १३० ॥

सो ऽयमित्यभिसम्बन्धो ऽध्यासाख्य उच्यते । तेन पदार्थस्वरूपमाच्छादितमेकीकृतमिव प्रत्याय्यते तदा ऽभिजल्पः शब्द उच्यते । अध्यासवशाच्छब्दार्थयोरेकात्मत्वेप्यर्थांशस्यैव प्राधान्यमुपयोगवशात्॥१३०॥

क्व चित्तु विषयभेदेन द्वयोरपि दृश्यतइति प्रसङ्गादभिधातुमाह ॥

तयोरपृथगर्थत्वे रूढेरव्यभिचारिणि ।
किं चिदेव क्व चिद्द्रूप्यं प्राधान्येनावतिष्ठते॥१३१॥

तयोः शब्दार्थयोरध्यासवशाद्रूढेर्नियमादेवाव्यभिचारिण्यपृथगर्थत्वे एकरूपत्वे सति किं चिदेव रूपं योगवशात् क्व चिदेव लोके शास्त्रे वा प्राधान्येनोद्रिक्ततया ऽवतिष्ठते ॥ १३१ ॥

तत्र लोकेर्थांशस्यैव प्राधान्यमित्यपि दर्शयितुमाह ॥

लोकेर्थरूपतां शब्दः प्रतिपन्नः प्रवर्त्तते ॥ १३१ऽऽ ॥

अर्थरूपतां प्रतिपन्नोर्थेन सहैकत्वमिव प्राप्तः शब्दः प्रवर्त्तते । अयं गौरित्यादि । तत्रार्थ एव बाह्यतया प्रधानमवसीयते॥ १३१ऽऽ ॥

शास्त्रे तु शब्दस्योभयरूपतापि विभागेन परिदृश्यतइत्याह ॥

शास्त्रे तूभयरूपत्वं प्रविभक्तं विवक्षया ॥ १३२ ॥

शास्त्रे हि स्वरूपप्रधानो निर्देशः क्व चित् क्व चिच्चार्थप्रधानोपीत्युभयरूपता शब्दस्य दृश्यते ॥ १३२ ॥

इदानीमर्थेषु न शक्तिः पृथगस्ति किं तु शब्दाधीनेति यथा ते शब्दैर्विधीयन्ते तथैवावगम्यन्तइति स्वमाहात्म्योपस्थापित एव शब्दार्थ इत्यष्टमं पक्षं दर्शयितुमाह ॥

अशक्तेः सर्वशक्तेर्वा शब्दैरेव प्रकल्पिता ।

एकस्यार्थस्य नियता क्रियादिपरिकल्पना ॥ १३३ ॥

अथ चासर्वशक्तिरर्थो व्यवस्थितः । तस्य प्रतिनियतशक्त्यभिधानं शब्देनेति नवमं पक्षं दर्शयितुमत्रैवोक्तं 'सर्वशक्तेर्वे'ति । शक्त्यर्थः कदा चित् क्रियारूपतयाभिधीयते । कदा चित्सिद्धरूपतयेति नियता क्रियादिरूपता शब्दार्थतया प्रतिपाद्यते ॥ १३३ ॥

अथ बुद्ध्युपारूढ एव शब्दस्यार्थो न बाह्य इति दशमं पक्षमुपदर्शयितुमाह ॥

यो वार्थो बुद्धिविषयो
बाह्यवस्तुनिबन्धनः ।
स बाह्यवस्त्विति ज्ञातः
शब्दार्थः कैश्चिदिष्यते ॥ १३४ ॥

शब्दस्य बुद्ध्युपारूढस्य वैकल्पिकस्य यो बुद्ध्युपारूढो बाह्यवस्तुनिबन्धनः बाह्यवस्तु विकल्पजननद्वारेण निबन्धनं यस्य स तथाभूतः । स च वैकल्पिको ऽर्थो भ्रमवशात् दृश्यविकल्पैकाकारेणाबहीरूपोपि बहीरूपतया ऽध्यस्तो ऽध्यस्तमेव वस्त्ववगच्छामि शब्दादिति शब्दनिमित्तमिति शब्दार्थ इष्यते ॥ १३४ ॥

इदानीं शब्दानामाकारविशेषवानर्थोऽपूर्वप्रभृतीनां संविन्मात्रमपरामृष्टाकारविशेषमर्थ इत्येकादशं पद्यमाह ॥

आकारवन्तः संवेद्या व्यक्तस्मृतिनिबन्धनाः ।
ये ते प्रत्यवभासन्ते संविन्मात्रं त्वतोन्यथा ॥ १३५ ॥

कैश्चिच्छब्दैः संवेद्याः प्रत्याय्या आकारविशेषवन्तो व्यक्तस्मृतिनिबन्धनाः प्रत्यवभासन्ते । कैश्चिन्निराकाराः संविद्रूपाः प्रत्याय्यन्ते । तेषां तथैवार्थो व्यवस्थाप्यते ॥ १३५ ॥

इदानीं प्रतिनियतवासनावशेनैव प्रतिनियताकारोर्थस्तत्त्वतस्तु कश्चिदपि नियतो नाभिधीयतइति द्वादशं पद्यमाह ॥

यथेन्द्रियं सन्निपतद्वैचित्र्येणोपदर्शकम् ।
तथैव शब्दादर्थस्य प्रतिपत्तिरनेकधा ॥ १३६ ॥

अविपरीतमप्यर्थमिन्द्रियं दोषवशान्नानारूपमवभासयति यथा तथैव नियतवासनावासितचेतसां शब्दार्थप्रतीतिरिति नास्ति कश्चिन्नियत एकः शब्दस्यार्थः ॥ १३६ ॥

एतदेव व्याख्यातुमाह ॥

वक्त्रान्यथैव प्रक्रान्तो भिन्नेषु प्रतिपत्तृषु ।
स्वप्रत्ययानुकारेण शब्दार्थः प्रविभज्यते ॥ १३७ ॥

तथा हि। सांख्यजैनसौगतप्रभृतयः प्रतिपत्त्रनुसारेणान्यथैव शब्दार्थं प्रतिपद्यन्ते वक्त्रा तु वैशेषिकादिना स्वप्रत्ययानुसारेण वक्तुं प्रक्रान्तः तथा च वैशेषिकेणावयविनं प्रतिपादयितुं घटशब्दः प्रयुक्तः सांख्यैर्गुणसमाहारमात्रमभिमन्यते जैनसौगतैः परमाणुसंचयमात्रमिति तथैव तस्मात्तेषामर्थप्रतिपत्तिः ॥ १३७ ॥

एतदेव व्यक्तयितुमाह ॥

एकस्मिन्नपि दृश्ये ऽर्थे दर्शनं भिद्यते पृथक् ।

कालान्तरेण वैकोपि तं पश्यत्यन्यथा पुनः ॥ १३८ ॥

वस्तुत एकस्मिन्नेकरूपे दृश्येर्थे शास्त्रवासनाभेदाद्दर्शनं ज्ञानमस्मिन् भिद्यते एकोपि च पुरुषः सुगतदर्शनसंस्कृतमतिरन्यथाध्यवस्यत्यर्थं, कालान्तरेण वैशेषिकशास्त्रश्रवणादन्यथेति ॥ १३८ ॥

अतः किमित्याह ॥

एकस्यापि च शब्दस्य निमित्तैरव्यवस्थितैः ।
एकेन बहुभिश्चार्थो बहुधा परिकल्प्यते ॥ १३९ ॥

एकस्य घटशब्दस्य निमित्तैः शास्त्रसंस्कारैरव्यवस्थितैरेकेन पुरुषेणानियतशास्त्रवासनावशात् क्रमेण बहुधार्थः प्रकल्प्यते बहुभिश्च नानाशास्त्रसंस्कृतबुद्धिभिर्युगपत् स्वप्रत्ययानुसारेण बहुधापि परिकल्प्यतइति किमत्र कुर्मः ॥ १३९ ॥

अतः किमित्याह ॥

तस्माददृष्टतत्त्वानां सापराधं बहुच्छलम् ।
दर्शनं वचनं चापि नित्यमेवानवस्थितम् ॥ १४० ॥

यत एवं तस्माददृष्टतत्त्वानां पुरुषाणां दर्शनमनवस्थितम् । अदृष्टतत्त्वतया च सापराधं अत एव बहुच्छलं बहुविधबाधकाघ्रातं तथा सति वचनमपि तेषां तथैवेति तत्त्वकथनं सुदूरमवस्थितम् ॥ १४० ॥

ननु सन्त्येव परावरज्ञा मुनयः तदनुसारेण सर्वं व्यवस्थापयिष्याम इति तदर्थमाह ॥

ऋषीणां दर्शनं यच्च तत्त्वे किं चिदवस्थितम् ।
न तेन व्यवहारोस्ति न तच्छब्दनिबन्धनम् ॥ १४१ ॥

परमर्षीणां भगवतां दर्शनं तात्त्विकं भवति किं तु परमार्थेन व्यवहारासंभवः व्यवहारसाधनानां शब्दानां निबन्धनं न भवतीति न तेन व्यवस्था । व्यवहारवेलायां वा ते ऽप्यदृष्टतत्त्वसदृशा इति पुन-

रव्यवस्थैव । यदुच्यते "रूपणव्यपदेशाभ्यां लौकिके वर्त्मनि स्थितौ, ज्ञाने प्रत्यभिलापे च सदृशौ बालपण्डितौ" इति । ननु पुरुषबुद्धयो विचित्रा भवन्तु प्रत्यक्षेण खलु वयं यथावदर्थो दृष्टः तथैव च व्यवहरिष्याम इत्याशङ्क्य प्रत्यक्षस्याव्यवस्थितिमाह ॥

तलवद्दृश्यते व्योम
खद्योतो हव्यवाडिव ।
न चेन्नास्ति तलं व्योम्नि
न खद्योते हुताशनः ॥ १४२ ॥

अतिनिर्मलं गगनतलमित्यविप्लुतदृशामप्युक्तिर्दृश्यते तदत्र किं कुर्मः ॥ १४२ ॥

यत्पुनरुपपत्त्या निश्चीयते तद् दृष्टमित्येव तथैवोपगम्येतेत्युपसंहरन्नाह ॥

तस्मात्प्रत्यक्षमप्यर्थं
विद्वानीक्षेत युक्तितः ।
न दर्शनस्य प्रामाण्यात्
दृश्यमर्थं प्रकल्पयेत् ॥ १४३ ॥

तस्माद्व्यवहारवेलायामसमाख्येयतत्त्वानामर्थानां यथा लौकिकैरन्वाख्यानं क्रियते तथैव तदनुसारेण शब्दार्थमाश्रित्य व्यवहारं निर्वाहयेन्न पिष्टपेषणमाचरणीयमिति ॥ १४३ ॥

यस्य यथैव स्वदर्शनानुसारेण प्रतिभाति तथैव तस्य स शब्दार्थ इत्येवाश्रयणीयमित्यलं निर्वस्तुबहुविकल्पप्रदर्शनेनेत्याह ॥

असमाख्येयतत्त्वाना-
मर्थानां लौकिकैर्यथा ।

व्यवहारे समाख्यानं
तत्प्राज्ञो न विकल्पयेत् ॥ १४४ ॥

एवं मतभेदेन प्रदर्शितस्य द्वादशधा पदार्थस्य पदकाण्डे जात्यादिप्रपञ्चैः प्रविभज्य स्वरूपं निर्णेष्यति एतदत्र वैयाकरणस्याखण्ड एव स्फोटलक्षणो वाक्यार्थो ऽध्यासः सम्बन्धः पदार्थस्त्वसत्य एवेति निर्णयः ॥ १४४ ॥

अथ प्रतिभास्वरूपमेव पूर्वोपक्रान्तमनुबध्नन्नाह ॥

विच्छेदग्रहणे ऽर्थानां प्रतिभा ऽन्यैव जायते ।
वाक्यार्थ इति तामाहुः पदार्थैरुपपादिताम् ॥ १४५ ॥

देवदत्तादिपदेभ्यो विच्छिन्नेभ्यस्तदर्थानां विच्छेदेनैव ग्रहणे प्रत्ययवेलायामेका प्रतिभा पदार्थमतिव्यतिरिक्तैव जायते तां च वाक्यार्थं वैयाकरणा आहुः । कस्तस्या उपाय इत्याह । "पदार्थैरुपपादितामि"ति पदार्थैरसत्यैरेवोपाधिभूतैरुपपादितामभिव्यक्तामिति ॥ १४५ ॥

कीदृशीं तामित्याह ॥

इदं तदिति सान्येषामनाख्येया कथं चन ।
प्रत्यात्मवृत्तिसिद्धा सा कर्त्रापि न निरूप्यते ॥ १४६ ॥

सा चोपजायमाना आख्यातुमन्यस्य न शक्यते केवलं स्वसंवेदनसिद्धैवासौ प्रतिपन्नापि स्वसंवेदनसमये नियतेन रूपेण निरूपयितुमशक्यैव सा ॥ १४६ ॥

किंस्वभावासावित्याह ॥

उपश्लेषमिवार्थानां सा करोत्यविचारिता ।
सार्वरूप्यमिवापन्ना विषयत्वेन वर्त्तते ॥ १४७ ॥

असंसृष्टानां पदार्थानामसावुपश्लेषं मेलनं करोति सर्वरूपे च

वाक्ये पदार्थानां वासौ विषयत्वेन वर्त्तते तन्निष्ठास्ते साफल्यं भजन्त-इति ॥ १४७ ॥

तां च न किं चित्प्राणिमात्रमतिवर्त्तते अतिक्रम्य तिष्ठतीत्याह ॥

साक्षाच्छब्देन जनितां भावनानुगमेन वा ।
इतिकर्त्तव्यतायां तां न कश्चिदतिवर्त्तते ॥ १४८ ॥

सा साक्षाच्छब्देन कदा चिद्व्यवहारकाले जन्यते जन्मान्तरभावनावशेन वा गजवाजिप्रभृतीनां तन्मूल एवेतिकर्त्तव्यतारूपः सर्वस्य व्यवहारः ॥ १४८ ॥

एतदेव स्फुटयति ॥

प्रमाणत्वेन तां लोकः सर्वः समनुपश्यति ।
समारम्भाः प्रतीयन्ते तिरश्चामपि तद्वशात् ॥१४६॥

सर्वः कश्चित्तामिव भगवतीं स्वप्रतिभां प्रमाणत्वेन पश्यति तथा चोच्यते 'सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तय' इति । तिरश्चां च जातमात्राणां तन्मूल एव व्यवहार इति न तदपह्नवेन आत्मा वञ्चनीयः ॥ १४६ ॥

सिद्धैव चेयं सर्वस्य प्रतिभेत्युपपादयितुमाह ॥

यथा द्रव्यविशेषाणां परिपाकैरयत्नजाः ।
मन्दादिशक्तयो दृष्टाः प्रतिभास्तद्वतां तथा ॥१५०॥

यथा द्रव्यविशेषाणां परिपाकव्यतिरिक्तयत्नान्तरनिरपेक्षा मन्दादिशक्तयो दृश्यन्ते तथैवेयं प्रतिनियतसंस्कारजन्या प्रतिभावतां स्फुटमुपलभ्यतएव जन्मान्तराभ्यासहेतुकेयमिति ॥ १५० ॥

सनिदर्शनमुपपादयितुमाह ॥

स्वरवृत्तिं विकुरुते

मधौ पुंस्कोकिलस्य कः ।
जन्त्वादयः कुलायादि-
करणे केन शिक्षिताः ॥ १५१ ॥

पञ्चमस्वरविरावी मधुमासे पुंस्कोकिल इत्ययत्नजमेतत्सिद्धं लूतातन्तूनां कुलायरचना च प्रतिभामाहात्म्यादेव दृश्यते ॥ १५१ ॥

एतदेव स्फुटयितुमाह ॥

आहारप्रीत्यभिद्वेषप्लवनादिक्रियासु कः ।
जात्यन्वयप्रसिद्धासु प्रयोक्ता मृगपक्षिणाम् ॥१५२॥

प्रतिप्राण्याहारादिक्रिया नियता ऽनादिप्रतिभावशादेवेति प्रसिद्धम् ॥ १५२ ॥

प्रतिभायाश्च शब्द एव मूलमित्याह ॥

भावनानुगतादेतदागमादेव जायते ।
आसत्तिविप्रकर्षाभ्यामागमस्तु विशिष्यते ॥१५३॥

स चागमः कदा चिदासन्नोस्मिन्नेव जन्मन्यवगतः कदा चिज्जन्मान्तरइत्यासत्तिविप्रकर्षाभ्यां शब्द एव प्रतिभाहेतुः ॥ १५३ ॥

तस्याश्च निमित्तभेदेन षाड्विध्यं दर्शयितुमाह ॥

स्वभावचरणाभ्यासयोगादृष्टोपपादिता ।
विशिष्टोपहिता चेति प्रतिभां षड्विधां विदुः ॥१५४॥

स्वभावेन यथा कपिः । चरणादिषूदाहरणान्यूह्यानि । एवमखण्डेपि वाक्येभ्युपगते पदपदार्थप्रविभागमन्तरेण व्यवहारो न निर्वहतीति पदार्थः सामान्येन मतभेदप्रदर्शनपूर्वकं निर्णीतः ॥ १५४ ॥

इदानीं मुख्यनान्तरीयकविभागेन पदार्थविचारोपक्रममाह ॥

यथा संयोगिनि द्रव्यैर्लक्षिते ऽर्थे प्रयुज्यते ।

गोशब्दो न त्वसौ तेषां विशेषाणां प्रकाशकः॥१५५॥

इह शब्दस्य सामान्यं वाजप्यायनमतेनार्थः व्यक्तिर्वा व्याडिमतेनार्थः । तत्रेह सामान्यमात्रं वा व्यक्तिमात्रं वा तस्य प्रयोजकमर्थत्वेनावबुध्यते विशेषास्तु नान्तरीयकतया ततोवगम्यन्ते ततः शब्दस्यादृष्टव्यभिचारं सामान्यमात्रमेवार्थः । यथा संयोगिनो द्रव्यविशेषाः सूक्ष्मा मक्षादय उपलक्षणमात्रभावेन गवादीनामर्थानां स्थिताः न गवादिशब्दवाच्या भवन्ति तथान्तरङ्गा अप्याकारावर्त्तसंस्थानादय इति न तेषामसौ प्रकाशक उच्यते ॥ १५५ ॥

एतदेव स्फुटीकर्तुमाह ॥

आकारवर्णावयवैः संसृष्टेषु गवादिषु ।
शब्दः प्रवर्त्तमानोऽपि न तानङ्गीकरोत्यसौ॥१५६॥

आकारादयो व्यभिचारित्वाच्छब्दवाच्या न भवन्तीत्यर्थः ॥ १५६ ॥

नन्वाकारवाचकानां स्थूलकृशकर्बुरशबलादीनां शब्दानां किमाकारादिवाचकत्वं नाङ्गीकार्यमेवेत्याशङ्क्याह ॥

संस्थानवर्णावयवैर्विशिष्टे यः प्रयुज्यते ।
शब्दो न तस्यावयवे प्रवृत्तिरुपलभ्यते ॥ १५७ ॥

स्वशब्दैराकारादय उच्यन्त एवेति न सर्वत्र वयं तदप्रतीतिं ब्रूमः यद्धि प्रयोजकं शब्दस्य तदेव तस्य वाच्यं अन्यन्नान्तरीयकमिति ब्रूमः अत आकारादिवाचकानां नावयवमात्रे एकदेशमात्रे प्रवृत्तिरङ्गीकार्या अतः शब्दैरर्थस्य क्वचिद्विशेष उच्यते क्वचित्सामान्यमात्रम् ॥ १५७ ॥

एवं च न शब्दस्यैवंरूपं प्रत्यक्षमप्यर्थसाक्षात्कारोपनायकमेवमेवार्थस्वरूपपरिच्छेदकं दृष्टमित्याह ॥

दुर्लभं कस्य चिल्लोके सर्वावयवदर्शनम् ।

केश्चित्त्ववयवैर्दृष्टैरर्थः कृत्स्नोऽनुमीयते ॥ १५८ ॥

युगपत्सर्वावयवदर्शनस्यासंभवात्कतिपयावयवदर्शनेन सकलार्थपरिच्छेदस्तत्रानुमानिक एवेति प्रत्यक्षमपि नैव सकलमर्थस्वरूपं परिच्छिनत्ति ॥१५८॥

तथैव शब्दादेकदेशावसायेन नित्यसहचारिधर्मान्तरावगमो जायतइत्याह ॥

यथा जात्युत्पलादीनां गन्धेन सहचारिणाम्।
नित्यसंबन्धिनां दृष्टं गुणानामवधारणम् ॥ १५९ ॥

जातिगन्ध उत्पलगन्ध इति शब्दाद्विशिष्टस्य गन्धमात्रस्यावगतिः तत्सहचारिरूपस्पर्शाद्यवधारणं तत्र नान्तरीयकं न मुख्यमिति बोद्धव्यम् ॥ १५९ ॥

ततश्च शब्दोऽपरामृष्टविशेषे वस्तुमात्रे एव प्रवर्त्ततइत्याह ॥

संख्याप्रमाणसंस्थाननिरपेक्षः प्रवर्तते।
बिन्दौ च समुदाये च वाचकः सलिलादिषु ॥१६०॥

एकापि जलकणिकाऽऽपो बहलमपि सरित्स्रोतस्तथैवोच्यतएकापि शिला शुक्ला हिमवानपि शुक्ल इति ॥ १६० ॥

शब्दः प्रयोजकमात्रमेव जात्यादिकं स्वार्थीकृत्य प्रवर्तते आकारादिविशेषावभासस्तु नान्तरीयक इति स्थितम्। ननु समुदायेषु हि वृत्ताः शब्दा अवयवेष्वपि वर्तन्ते यथा तैलं भुक्तं घृतं भुक्तं शुक्लो नीलः कपिल इत्युक्तं तदेतत्कथम्। उक्तं च ॥

"न जातिगुणशब्देषु मूर्त्तिभेदो विवक्षितः।
ते जातिगुणसंबन्धभेदमात्रनिबन्धनाः" ॥

तथा "नैक्षिता जातिशब्दानां समुदायानुपातिनाम्। जातिमाचक्षते ते हि व्यक्तीर्वा जातिसंगताः" ॥

इति । इह च "संख्याप्रमाणसंस्थाननिरपेक्षः प्रवर्त्तते । बिन्दौ च समुदाये च वाचकः सलिलादिषु" इति तदेतदाशङ्क्याह ॥

संस्कारादिपरिच्छिन्ने तैलादौ यो व्यवस्थितः ।
आहैकदेशं तत्त्वेन तस्यावयववर्त्तिता ॥ १६१ ॥

संस्कारोपघातादिपरिच्छिन्ने तैलादौ तैलघृतादिः शब्दो व्यवस्थितो ऽसावेकदेशं समुदायाध्यारोपेणाह । एतदुक्तं भवति । न ते जातिशब्दाः अपि तु तत्सदृशा एव ते नियतपरिमाणाभिधायिनस्तदध्यारोपेण तदेकदेशवाचिन उच्यन्तइति अतस्तेषामवयववर्त्तिता भाष्यउक्तेति न कश्चिद् दोषः उक्तं च "संस्कारादुपघाताद्वा वृत्तोक्तपरिमाणके । तैलादौ जातिशब्दो ऽत्र समत्वादवगम्यत"इति ॥ १६१ ॥

एतदर्थं परमार्थत इदं बोद्धव्यमित्याह ॥

येनार्थेनाभिसंबद्धमभिधानं प्रयुज्यते ।
तदर्थापगमे तस्य प्रयोगो विनिवर्त्तते ॥ १६२ ॥

येनार्थेन जात्यादिना प्रयोजकेन ॥ १६२ ॥

वक्तुरिच्छया धर्मान्तर्भावेनेन तु प्रयुज्यमानोपि शब्दो न तेषां सर्वेषां (१) नियमेन प्रत्यायनं करोतीत्याह ॥

यांस्तु संभविनो धर्मा-
नन्तर्नीय(२) प्रयुज्यते ।
शब्दस्तेषां न सान्निध्यं
नियमेन व्यपेक्षते ॥ १६३ ॥

एतदेवान्वयव्यतिरेकाभ्यां स्फुटीकुर्वन्नाह ॥

---

(१) सर्वेषामिति २ पु० नास्ति ।
(२) अन्तर्णीयेति २ पु० पाठः स एव च युक्तः ।

यथा रोमशफादीनां व्यभिचारेऽपि दृश्यते ।
गोशब्दो न तथा जातेर्विप्रयोगे प्रवर्त्तते ॥ १६४ ॥

उपसंहर्तुमिदानीमाह ॥

तस्मात्संभविनोऽर्थस्य शब्दात्संप्रत्यये सति ।
अदृष्टविप्रयोगोऽर्थः सम्बन्धित्वेन वर्त्तते ॥ १६५ ॥

नैयत्येनादृष्टविप्रयोगो जात्यादिरेव शब्दस्य सम्बन्धित्वेन वाच्यत्वेन गम्यतइति बोद्धव्यम् ॥ १६५ ॥

एवं नामपदस्यार्थविचारं कृत्वेदानीं तस्यैव भागार्थविचारं प्रस्तौति । तत्र प्रत्ययभागस्यार्थविचारं तावदाह ॥

वाचिका द्योतिका वा स्यु-
र्द्वित्वादीनां विभक्तयः ॥ १६५ऽऽ ॥

तेन प्रत्ययभागस्य संख्याकर्मादयो वाच्यत्वेन द्योत्यत्वेन वार्था इति ज्ञेयम् ॥

इदानीं प्रकृतिभागस्यार्थमभिधातुं प्रकृतिप्रत्ययसमुदाय एव संख्यादिविशिष्टस्यार्थस्याभिधायक इत्याह ॥

स्याद्वा संख्यावतोऽर्थस्य
समुदायोऽभिधायकः ॥ १६६ ॥

अथ वा संख्याद्युपलक्षितमेवार्थं प्रकृतिप्रत्ययसमुदायोऽभिधत्तइत्यभिधातुमाह ॥

विना संख्याभिधानाद्वा संख्याभेदसमन्वितान् ।
अर्थान् स्वरूपभेदेन कांश्चिदाङ्गर्गवादयः ॥ १६७ ॥

स्वरूपभेदेन द्वित्वादिभेदेनेत्यर्थः ॥ १६७ ॥

ननु यदा शब्दा नित्यसम्बन्धा विवेकेन ज्ञातशक्तयः स्वार्थस्य प्र-

तीतौ तदा कथमेतदवगतमयं प्रकृत्यर्थो ऽयं प्रत्ययार्थ इत्याशङ्कापोद्धारस्यान्वयव्यतिरेकौ निमित्तमिति प्रतिपादयितुमाह ॥

ये शब्दा नित्यसम्बन्धा विवेके त्वातशङ्कयः ।
अन्वयव्यतिरेकाभ्यां तेषामर्थो विभज्यते ॥ १६८॥

विवेके सति शब्दार्थविभागे कृते सति च प्रातिपदिके प्रत्यये चासत्येकत्वादिविरहितं वृक्षत्वमात्रमवगम्यतइत्येवमन्वयव्यतिरेकाभ्यां प्रकृतिप्रत्ययार्थप्रविभागो व्यवस्थाप्यते ॥ १६८ ॥

तत्रापि शक्यत्वाशक्यत्वाभ्यामन्वयव्यतिरेकावाश्रित्य तत्प्रतिपादनं कर्त्तव्यमित्याह ॥

यत्र चाव्यभिचारेण
तयोः शक्यं प्रकल्पनम् ।
नियमस्तत्र

यत्रान्वयव्यतिरेकावुपलभ्येते तत्रैव नियतः न त्वशक्ये विषयइत्याह ॥

नत्वेवं
नियमो नुट्शबादिषु ॥ १६९ ॥

भवतामत्तीत्यादावसति नुडादावर्थदर्शनाद्द्व्याणां पचतीत्यादौ तस्य साहाय्यमात्रं स्थापितं न पृथगर्थतेति उक्तं च "भावकर्मकर्त्तारः सार्वधातुकार्था इति चेदेकद्विबहुषु नियमानुपपत्तिरतदर्थत्वात्, शब्विकरणार्था(१) इति चेत् कृताभिहितेषु विकरणाभाव" इति ॥ १६९ ॥

यत्र तु पृथगेव तयोः प्रकृतिप्रत्यययोरर्थवत्त्वं दृश्यते तत्र पृथग-

(१) विकरणार्था इत्येव २ पु० पाठः ।

र्थाभिधानमेवाङ्गीकार्यं न तूपलक्षणार्थत्वं कल्पनीयमित्याह ॥

सम्भवे वाभिधानस्य लक्षणं तु न कल्प्यते(१) ।
आपेक्षिक्यो हि संसर्गे नियताः शब्दशक्तयः ॥१७०॥

प्रकृतिप्रत्यययोः पृथगर्थाभिधानसम्भवे प्रकृत्यर्थ एव पदवाच्यः प्रत्ययार्थस्तूपलक्ष्यमाणः प्रत्ययार्थ एव पदवाच्यः प्रकृत्यर्थस्तूपलक्ष्यमाण इति न युक्ता कल्पना । ननु यदि प्रकृतिप्रत्यययोः पृथक् पृथगर्थमभिधातुं शक्तिरस्ति तत्किमिति परस्परापेक्षितया स्वार्थाभिधानमित्याह । 'आपेक्षिक्य' इत्यादि । यस्मात्संसर्गे प्रकृतिप्रत्ययार्थयोः शब्दशक्तयो ऽन्वयव्यतिरेकापेक्षिता नियता एव प्रातिस्विक्य इव(२) प्रतीयन्तइति ॥ १७६ ॥

यत्र त्वपेक्षायामपि न पृथगर्थतोपलभ्यते तत्रापोद्धारो नाश्रयणीय इत्याह ॥

न कूपसूपयूपानामन्वयो ऽर्थस्य दृश्यते ।
अतो ऽर्थान्तरवाचित्वं संघातस्यैव गम्यते ॥ १७१ ॥

न हि एकापगमे क चिद्या का चिदर्थानां वेदनोपजायते ॥ १७१ ॥

तदेवं शक्याशक्यावन्वयव्यतिरेकावाश्रित्यापोद्धारेणान्वाख्यातं पदभागयोः कार्यमित्युक्तं ततश्च किं सनिमित्तं अथ निर्निमित्तमेवेत्याशङ्क्य सनिमित्तमेव पदभागयोः पदस्य चान्वाख्यानं कार्यमितीदानीमुपपादयितुमाह ॥

अन्वाख्यानानि भिद्यन्ते
शब्दव्युत्पत्तिकर्मसु ।

---

(१) कल्पतइति २ पु० पाठः ।
(२) एवेति २ पु० पाठः ।

बह्वनां सम्भवे ऽर्थानां
निमित्तं किं चिदुच्यते ॥ १७२ ॥

यत्र खलु बह्वनि निमित्तानि सम्भवन्ति तत्र किं चिदेव नैयत्ये-ना(१)श्रित्यान्वाख्यानं क्रियतइत्युच्यते ॥ १७२ ॥

एतदेव दर्शयितुमाह ॥

वैरवासिष्ठगिरिशा-
स्तथैकागारिकादयः ।
कैश्चित्कथं चिदाख्याता
निमित्तावधिसंकरैः ॥ १७३ ॥

वीरस्येदं वैरं वीराया वा, तथा वसिष्ठस्येदं वसिष्ठेन कृतं प्रोक्तं वा वासिष्ठं, गिरौ शेतइति 'गिरौ डश्छन्दसी'ति डप्रत्यये ऽथ वा गिरिं श्यतीति 'आतोनुपसर्गे क' इति के गिरिश, इत्येवं निमित्तावधिसांकर्येणान्वाख्यानं कृतम् ॥ १७३ ॥

ननु नियतमेव निमित्तमत्र किं चिदुच्यतामित्याशङ्क्योपायाना-मनियतत्वादनियतमिति प्रतिपादयितुमाह ॥

यथा पथः समाख्यानं वृक्षवल्मीकपर्वतैः ।
अविरुद्धं गवादीनां भिन्नैश्च सहचारिभिः ॥१७४॥

यथा वृक्षादिभिर्भिन्नैरुपायभूतैरेव कस्य चित्पथः समाख्यानमविरुद्धं तथा गवादीनां शब्दानां भिन्नैरेव सहचारिभिरन्वाख्यानमिति बोद्धव्यम् ॥ १७४ ॥

अर्थस्य चावस्थाभेदा बहवः सन्ति येन च योवस्थाभेदः परिदृष्टस्तेनैवासौ तत्समाख्यातं करोतीत्याह ॥

---

(१) अनैयत्येनेति २ पु० पाठः ।

अन्यथा च समाख्यान-

मवस्थाभेददर्शिभिः ।

क्रियते किंशुकादीना-

मेकदेशे ऽवधारणात्(१) ॥ १७५ ॥

किंशुको नेति किंशुकशब्दं प्रयुञ्जते इति भिन्नमेव निमित्तम् ॥ १७५ ॥

एतदेव व्यक्तीकर्तुमाह ॥

कैश्चिन्निर्वचनं भिन्नं गिरतेर्गर्जतेर्गमेः ।

गुवतेर्गदतेर्वापि गौरित्यत्रानुदर्शितम् ॥ १७६ ॥

गोलक्षणस्यार्थस्य नानाविधा अवस्था दृष्टाः तदनुगमेनैवार्थमाहुराचार्याः ॥ १७६ ॥

एवं शब्दस्य प्रकृतिवाच्यमेव निमित्तं ततश्च बहुविधनिमित्तप्रदर्शनम् । इदानीं स्वरूपमेव शब्दानां प्रवृत्तिनिमित्तमन्वाख्यानायोपादीयतइति पक्षं प्रदर्शयितुमाह ॥

गौरित्येव स्वरूपाद्वा

गोशब्दो गोषु वर्त्तते ।

व्युत्पाद्यते न वा सर्वं ॥ १७६ऽऽऽ ॥

अथ कस्माद्गौरित्युच्यते गौरित्येव हि गौर्गवि वर्त्ततइत्यौश्चियक्याः । अतश्च स्वरूपमात्रप्रयुक्ताः सर्वे शब्दा इत्यव्युत्पत्तिपक्ष एवेत्याह 'व्युत्पाद्यते न वा सर्वमि'ति ॥ १७६ऽऽऽ ॥

कैश्चित्स्वरूपं वाच्यं च निमित्तमुच्यतइत्याह ॥

कैश्चिच्चोभयमिष्यते ॥ १७७ ॥

---

(१) एकदेशावधारणाद् इति पु० पाठः ।

एवं सनिमित्तमन्वाख्यानं निमित्तं च वाच्यं बहुधा कैश्चित्कथं चित् किं चिदुक्तं स्वरूपं वा निमित्तं उभयमेव वेति दर्शितम् ॥ २७७ ॥

इदानीं किं भिन्नमेव रूपं शब्दस्य आहो स्विदभिन्नमिति विचार्यते यदि भिन्नमेव तदा गमनं गरलं गज इत्यादिषु गादीनां भिन्नत्वाद्भेदेनैवोपादानं प्राप्नोति ततश्चानन्त्यादशक्यत्वमन्वाख्यानस्येत्याह ॥

सामान्येनोपदेशश्च शास्त्रे लघ्वर्थमाश्रितः ।

जात्यन्तरवदस्यापि विशेषाः प्रतिपादकाः ॥ १७८ ॥

शब्दभेददर्शने भिन्नानां सामान्यसमाश्रयेण लाघवादुपदेशः शास्त्रे क्रियते विशेषा ये ते ऽस्यैव जात्यन्तरवत्प्रतिपादका उच्यन्ते ॥ १७८ ॥

एतदेवाह ॥

अर्थान्तरे च यद्वृत्तं तत्प्रकृत्यन्तरं विदुः ।

तुल्यरूपं न तद्रूढावन्यस्मिन्ननुषज्यते ॥ १७९ ॥

रूढौ च तुल्यरूपं स्वरूपेणान्यस्मिन्नानुषज्यते तत्त्वतस्तद्भिन्नमेव सादृश्यात्त्वैकत्वं मन्यते परमार्थतस्तु भिन्नाः शब्दा गवादयः ॥१८९॥

स्वतश्च यजिर्भिन्न एवेत्याह ॥

भिन्नाविजियजी धातू
नियतौ विषयान्तरे ।
कैश्चित्कथं चिदुद्दिष्टौ
चित्रं हि प्रतिपादनम् ॥ १८० ॥

अन्यो यजिरन्य इजिरिति नियतौ बोद्धव्यौ । इजिः कित्येव यजिस्तु तदितरस्मिन्निति । आचार्यैः पुनः क्व चिद्भेदाश्रयेण निर्दिष्टौ

क चिदभेदेनेति प्रतिपादयितुमाह । 'कैश्चिदि'त्यादि । कश्चिद्यजेः किति संप्रसारणं शास्ति इष्टः इष्टेति, तृजादौ तस्य तन्नेच्छति यष्टा यष्टुं यष्टव्यमिति, कश्चिदिजिमेवोपदिशति तस्य तृजादौ यादेशं विदधाति, इति प्रतिपादनवैचित्र्यम् ॥ १८० ॥

अवस्थाभेदाश्रयेणापि प्रतिपादनं दृश्यतइत्याह ॥

एवं च बालवायादिजित्वरीवदुपाचरेत् ।
भेदाभेदाभ्युपगमे न विरोधो ऽस्ति कश्चन ॥ १८१ ॥

इह विदूरात्प्रभवति वैदूर्य इति वैदूर्यशब्दं व्युत्पादयन्ति । न च विदूरादसौ प्रभवति । बालवायादुत्पन्नो विदूरे केवलं संस्क्रियते तत्रोक्तं "बालवायो विदूरं च प्रकृत्यन्तरमेव सा । न वै तत्रेति चेद्ब्रूयाज्जित्वरीवदुपाचरे"दिति । बालवायो वृत्तिविषये विदूरमापद्यते ततश्च बालवायात्प्रभवति वैदूर्यो मणिरिति सिद्धम् । अतो बालवायविदूरयोरभेदो ऽभ्युपगतः । अथ वान्यो वृत्तिविषये विदूरशब्द उच्यते । यथा वणिग्भिर्वाराणसी जित्वरीति । आदिशब्दाद्विश्रवणरवणशब्दाविति भेदो ऽवगन्तव्यः । अतो ऽभेदाभ्युपगमे भेदाश्रयणे वा न कश्चिद्दोषः । भेदपक्षाश्रयणे च सामान्यमाश्रित्य लाघवेनोपदेशः क्रियते । अभेदपक्षे त्वभिन्नरूपसमाश्रयणेनैवेति न किं चिदवद्यम् ॥ १८१ ॥

ततो यदि शब्दभेदपक्षः तदा धातूपसर्गयोः यथोक्तकल्पनमित्याह ॥

अडादीनां व्यवस्थार्थं पृथक्त्वेन विकल्पनम् ।
धातूपसर्गयोः शास्त्रे धातुरेव तु तादृशः ॥ १८२ ॥

अड्द्विर्वचनव्यवस्थार्थं केवलं धातवः पृथगुपदिष्टा वस्तुतः पुनर्विशिष्टक्रियावचना एव तद्गति सोपसर्गाणामेव धातुत्वम् ॥ १८२ ॥

एतदेव प्रतिपादयितुमाह ॥

तथा हि सङ्ग्रामयतेः
सोपसर्गाद्विधिः स्मृतः ।
क्रियाविशेषाः संघातैः
प्रक्रम्यन्ते तथाविधाः ॥ १८३ ॥

असङ्ग्रामयत्, सिसङ्ग्रामयिषते, सोपसर्गस्यैवाड्द्विर्वचनदर्शनात्सोपसर्गस्यैवास्य धातुत्वं अत उपक्रमएवाख्याते विशिष्टैव धातुवाच्या क्रिया निर्वर्त्तयितुमुपक्रम्यतइत्याख्यातानां स्वरूपप्रदर्शनार्थमाह 'क्रियाविशेषा' इत्यादि । संघातैर्धातूपसर्गसमुदायैरित्यर्थः । तथाविधा अभिन्ना भिन्ना वा ॥ १८३ ॥

अतः किं भवतीत्याह ॥

कार्याणामन्तरङ्गत्व-
मेव(१)धातूपसर्गयोः ॥ १८३ऽऽ ॥

एवं धातूपसर्गाश्रयाणि यानि कार्याण्यन्तरङ्गाणीत्युच्यन्ते इति पूर्वं तान्येव प्रवर्तन्ते यथा सुडादयः ॥ १८३ऽऽ ॥

तथाभूतैव च सा क्रिया साधनसंबन्धं गच्छतीत्याह ॥

साधनैर्याति संबन्धं तथाभूतैव सा क्रिया ॥ १८४ ॥

तथाभूतैव उपसर्गविशिष्टैव कारकसंबन्धमुपगच्छति । एवं चानुभूयतइति कर्मणि लकारः सिध्यति तथा 'षत्वतुकोरसिद्ध' इत्यारम्भणीयम् । 'अडभ्यासव्यवायेपी'त्यनारम्भणीयमेवेति स्थितम्, उक्तं च "कारकाणां प्रवृत्तिर्विशिष्टक्रियायामन्यथा(२) कृत्वा मांसौदने प्रवर्त्तन्ते अन्यथा च शुष्कौदन इति वृत्तोपसर्गसम्बन्धायाश्च त-

(१) एवमिति २ पु० पाठः ।
(२) क्रियाया अन्यथेति २ पु० पाठः ।

स्या वैशिष्ट्यमिति क्रमाश्रयणेन पूर्वमेवोपसर्गेण सम्बन्धः ॥ १८४ ॥

इदानीं पूर्वं धातुः साधनेन युज्यतइति क्रमसमाश्रयणेनाख्यातस्वरूपं प्रतिपादयितुमाह ॥

प्रयोगार्हेषु सिद्धः स-
न्भेत्तव्यो ऽर्थो विशिष्यते ।
प्राक् च साधनसम्बन्धा-
त्क्रियां नैवोपजायते ॥ १८५ ॥

लब्धात्मनस्तस्या विशेष्यत्वोपपत्तेः प्रयोगार्हेषु धातुषु सिद्धः सन्नर्थो भेत्तव्यो विशेष्यो भवत्युपसर्गादिभिः, न तु (१) पूर्वकालआख्याते विशेषणयोगः। यदि प्राक्साधनसम्बन्धात् क्रियाविशेष इत्युच्यते तदा ऽव्युत्पन्नायास्तस्याः स्वरूपाभावेन कथं चित् (२) शेषसम्बन्धः स्यादित्याह 'प्राक् चे'त्यादि । उक्तं च 'साधनं क्रियां निर्वर्त्तयति तामुपसर्गो विशिनष्टी'ति । पूर्वं साधनसम्बन्धः तत उपसर्गैस्तद्विशेषणमुपपन्नम्। अस्मिंश्च पक्षे 'ऽडभ्यासव्यवायेपी'त्यारम्भणीयं 'षत्वतुकोरसिद्ध' इति तुकि कर्त्तव्ये एकादेशासिद्धत्वं न वक्तव्यं, प्रत्यय इत्यन्तरङ्गत्वात्साधनाभिधायकार्द्धधातुकाश्रयो गुणः प्रवर्त्ततइति सिद्धम् ॥ १८५ ॥

अथ पूर्वं धातुरुपसर्गेण युज्यतइत्यमुं पक्षं समाधातुमाह ॥

धातोः साधनयोगस्य भाविनः प्रक्रमाद्यथा ।
धातुत्वं कर्मभावश्च तथान्यदपि दृश्यताम् ॥ १८६ ॥

क्रियावचनो धातुरित्युक्तं साधनसम्बन्धाच्च प्राक् क्रियानिर्वृत्तेरसम्भवाद्यथा भाविसाधनसम्बन्धसमाश्रयणेनोपक्रमएव धातुत्वं धातु-

(१) नन्विति २ पु० पाठः ।
(२) चिदिति २ पु० नास्ति ।

संज्ञोच्यते, यथा च धातोः कर्मण इत्युच्यते कर्म यो धातुरितीषिकर्मत्वस्य भावित्वादुपक्रमएवेषिकर्मत्वमुक्तं तथान्यदपि दृश्यतां भाविसम्बन्धादुपक्रमएव विशिष्टक्रियावचनत्वं दृश्यतां को दोषः । एवं च भिन्नपचाश्रयणेन तथाविधविशेषनिर्वर्त्तनं शोभतइत्युच्यते । 'क्रियाविशेषाः सङ्घातैः प्रक्रम्यन्ते तथाविधा' इति ॥ १८६ ॥

उपक्रम एव चासौ क्रिया विशिष्टैवाभ्युपगन्तुं युक्तेति दृष्टान्तप्रदर्शनपूर्वकमाह ॥

बीजकालेषु सम्बद्धा यथा लाक्षारसादयः ।
वर्णादिपरिणामेन फलानामुपकुर्वते ॥ १८७ ॥

बीजवापकालएव यथा लाक्षारसादयो बीजसम्बन्धादुत्तरकालं वर्णरसादिपरिणामेन फलोपकारं कुर्वन्ति ॥ १८७ ॥

तथा दार्ष्टान्तिके योजयितुमाह ॥

बुद्धिस्थादभिसम्बन्धात्तथा धातूपसर्गयोः ।
अभ्यन्तरीकृतो भेदः पदकाले प्रकाशते ॥ १८८ ॥

धातूपसर्गयोः सम्बन्धबुद्ध्या समुल्लिखितो यो ऽन्तर्णीतः केवलं तस्मात्सम्बन्धात्तयोर्धातूपसर्गयोः सम्बन्धे(१) पदकाले पदनिष्पत्तौ सत्यामसौ भेदः प्रकाशते न तु स्वत इति वृत्तोपसर्गसम्बन्धाया एव साधनयोग उपपन्नः ॥ १८८ ॥

एवमपोद्धारप्रस्तावे वाक्ये पदस्य पदभागयोः प्रकृतिप्रत्यययोः शक्याशक्यान्वयव्यतिरेकसमाश्रयणेन सनिमित्तमन्वाख्यानं कर्तुमनेकधार्थः क्वचिन्निमित्तं स्वरूपं वेत्याख्यातं, ततश्च पदमेकमनेकं वेति नामपदं लेशतो निर्णीतम्, आख्यातमपि 'क्रियाविशेषाः सङ्घातैः प्रक्रम्यन्ते तथाविधा' इत्यादिना भेदाभेदविचारपूर्वकमपि निदर्शि-

(१) संबन्धः इति २ पु० पाठः ।

तप्रायम्, इदानीं 'नामाख्यातोपसर्गनिपाताश्चेति चत्वारि पदजातानी'ति निरुक्तकारः तत्र नामाख्यातस्वरूपे प्रदर्शिते, उपसर्गाणां प्रदर्शनीयमिति तत्स्वरूपं प्रदर्शयितुमाह ॥

क्व चित्संभविनो भेदाः केवलैरभिदर्शिताः(१) ।
उपसर्गेण सम्बन्धे व्यज्यन्ते प्रपरादिना ॥ १८९ ॥

क्व चित्पचत्यादौ प्रकर्षादीनां सम्भवात् केवलैस्तेषामप्रतीतेरुपसर्गसम्बन्धात्तदवगम इति तेषूपसर्गाणां विशेषद्योतकत्वमुच्यते अत एव चोक्तं 'तमेव विशिनष्ट्यन्य' इति ॥ १८९ ॥

तर्हि द्योतकत्वमेव किं तेषामाहो स्वित्पक्षान्तरमपीत्याह ॥

स वाचको विशेषाणां सम्भवाद्द्योतकोऽपि वा ।
शक्त्याधानाय धातोर्वा सहकारी प्रयुज्यते ॥१९०॥

केवलं न द्योतकाः यावद्वाचका अपि दृश्यन्ते । यथा प्रतिष्ठतइत्यादौ धातोर्गतिनिवृत्तिवाचकत्वं प्रेण तु गतिवाचकत्वं व्यवस्थाप्यते । तथा चोक्तं 'धात्वर्थं बाधते कश्चि'दिति 'सम्भवाद् द्योतकोपि वे'त्येतदादावेव कारिकायां व्याख्यातम् । अथ तृतीयमपि पक्षं दर्शयितुमुक्तं 'शक्त्याधानाये'त्यादि । सम्भूय धातूपसर्गावर्थमाहतुरिति शक्तिमात्रमुपसर्गः कुरुतइत्यर्थाभिधाने सहकारिण उपसर्गाः । अत्राप्युक्तं 'कश्चित्तमनुवर्त्तत'इति ॥ १९० ॥

प्रतिष्ठतइत्यादौ प्रसिद्ध्या धातोर्गतिनिवृत्तिवाचकत्वे उपसर्गस्य गतिवाचकत्वं स्थापितम्, इदानीमनुमानेन द्योतकत्वमेव सर्वत्रास्य व्यवस्थापयितुमाह ॥

स्थादिभिः केवलैर्यच्च गमनादि तु गम्यते ।
तत्रानुमानाद्द्विविधात्तद्धर्मा प्रादिरुच्यते ॥ १९१ ॥

---

(१) अनिदर्शिता इति २ पाठः ।

तिष्ठतिर्गतिनिवृत्तिं प्रसिद्ध्याभिदधाति अतः केवलेन तेन गमनं न प्रतिपाद्यते इत्यनेकार्था धातव इति कृत्वानुमानाद्गतिवाचकत्वमपि तस्य व्यवस्थाप्यते उपसर्गस्तु तद्द्योतक एव । गतिनिवृत्तौ तु प्रसिद्धत्वात्तिष्ठतेः प्रशब्दस्य गतिवाचकत्वमुच्यते, वस्तुस्थित्या त्वनुमानेन प्रादेर्द्योतकत्वमेव सामान्यतो दृष्टेन विशेषतो दृष्टेन चेत्याह 'तत्रे'त्यादि । धातुरनेकार्थः उपसर्गश्च द्योतक इत्यनुमानेन व्यवस्थाप्यते । द्विविधमनुमानं भवति विशेषतो दृष्टं सामान्यतो दृष्टं चेति । तत्राविशेषेणोपसर्गाणां द्योतकत्वं तथा च प्रशब्दो धर्मी आदिकर्मद्योतक इति साध्यो धर्मः प्रशब्दत्वात् पूर्वोदितपचादिदृष्टप्रशब्दवदिति । विशेषतो दृष्टेनानुमानेन तद्धर्मप्रशब्दस्य समानधर्मा सर्वोऽपि प्रादिरुपसर्गो द्योतकत्वधर्मयुक्त उच्यतइति । धातुश्च सामान्यतो दृष्टेनानुमानेनानेकार्थः । यथा तिष्ठतिर्धर्मी अनेकार्थ इति साध्यो धर्मः धातुत्वाद् उभयवादिसम्मतानेकार्थ(१)यजत्यादिधातुवदिति । एवं सामान्यतो दृष्टानुमानात्तद्धर्मान्यो धातुरप्यनेकार्थ उच्यतइति योजना ॥ २८१ ॥

इदानीं संभूयार्थाभिधायकत्वमपि दर्शयितुमाह ॥

अप्रयोगे ऽधिपर्योश्च यावद् दृष्टं क्रियान्तरम् ।
तस्याभिधायको धातुः सह ताभ्यामनर्थकः ॥१८१॥

अध्यागच्छति पर्यागच्छतीत्यत्राधिपरी अनर्थकावागच्छतीत्यस्यादेवोपरिभावविशिष्टस्य वा सर्वतोभावविशिष्टस्य वाप्यागमनस्य प्रकरणादिनावगतत्वात् लौकिकशब्दव्यवहारे लाघवं प्रत्यनादरादिति स्पष्टार्थमेवाधिपर्योः प्रयोगः । समुदाय एव विशिष्टार्थाभिधायक इत्यधिपर्योः केवलयोर्धातोश्चाऽत्रानर्थकत्वमनर्थान्तरवाचकत्व-

(१) अनेकार्थेति २ पु० नास्ति ।

मित्यर्थः । अतो धातूपसर्गौ सम्भूयैवार्थविशेषं ब्रूत इति धातोरर्थाभिधाने सहकारिण उपसर्गाः । उपसर्गाणां रूढितोऽर्थवत्त्वएव तावधिपरी अनर्थकाविति केवलानर्थकतया । न हि तयोरुपसर्गयोः केवलयोस्तत्रार्थोऽस्ति अत एवोक्तं 'कश्चित्तमनुवर्तत' इति ॥ १८२ ॥

प्रसङ्गात्स्वार्थिकप्रत्ययानां स्वरूपमाह ॥

तथैव स्वार्थिकाः केचित्संघातान्तरवृत्तयः ।
अनर्थकेन संसृष्टाः प्रकृत्यर्थानुवादिनः ॥ १८३ ॥

यावक इत्यादौ कनादयः सम्भूयैवार्थबोधका बोद्धव्याः । यावशब्दात्केवलात्पृथगेव कन्प्रकृतिर्यावशब्दोऽध्यवसित इति सङ्घातान्तरवृत्तयस्ते बोद्धव्याः । अत एवाह 'अनर्थकेन संसृष्टा' इति । यावशब्दः कन्प्रकृतिरनर्थक एव समुदायस्तु परस्परशक्त्याहितविशेषस्तत्रार्थवान् नासंभूय स्वार्थमाहेत्याह 'प्रकृत्यर्थानुवादिन' इति । ननु प्रकृतिभागस्येदानीमेवानर्थकत्वमुक्तमतः कथं प्रकृत्यर्थानुवादिन इत्युच्यते, सादृश्यमात्रादित्यभिप्रायः । कन्प्रकृतिः केवला यावशब्देन सदृशमभिमन्यतइति तदभिप्रायेण प्रकृत्यर्थानुवादिन इत्युक्तं वस्तुतस्तु सङ्घातान्तरवृत्तय इत्येव बोद्धव्यम् ॥ १८३ ॥

अथ निपातानामनैयत्येन स्वरूपं प्रदर्शयितुमाह ॥

निपाता द्योतकाः केचि-
त्पृथगर्थाभिधायिनः ।
आगमा इव केऽपि स्युः
संभूयार्थस्य वाचकाः ॥ १८४ ॥

तेषामुपसर्गवद् द्योतकत्वं क्वचित् यथा वृक्षश्च प्लक्षश्चेत्यादौ । चादीनां केवलानां च केषां चित् पृथगर्थाभिधायित्वं वाचकत्वमेव

सिद्धमित्याह 'के चिदि'त्यादि । के चिन्निपाता आगमवत्संभूय वाचकाः यथा येषां पृथगर्थं प्रकल्पतइति पाठः तेषां मते निपातानां द्वैविध्यं के चिदर्थवन्तः के चिदनर्थका इति । तत्र के चिन्निपाताः पृथगर्थप्रकल्पने सत्यर्थाभिधायिनः ततो द्योतका इत्यर्थवतां स्वरूपकथनं ये त्वनर्थकास्तेषां स्वरूपमाह 'आगमा' इत्यादि ॥ १९४ ॥

तथा च लौकिके प्रयोगे ऽनियम इत्याह ॥

उपरिष्टात्पुरस्ताद्वा द्योतकत्वं न भिद्यते ।
तेषु प्रयुज्यमानेषु भिन्नार्थेष्वपि सर्वथा ॥ १९५ ॥

पूर्वं पश्चाद्वा प्रयुक्तास्तदर्थद्योतनं कुर्वन्तीति तेषु विकल्पसमुच्चयाद्यर्थेषु द्योतकत्वमेव प्रयुज्यमानेषु स्थितम् ॥ १९५ ॥

अथ वाचका एव कस्मान्नोच्यन्ते किं द्योतकत्वेनेत्यर्थद्योतकत्वं दृढीकर्तुमाह ॥

चादयो न प्रयुज्यन्ते पदत्वे सति केवलाः ।
प्रत्ययो वाचकत्वे ऽपि केवलो न प्रयुज्यते ॥ १९६ ॥

एते हि चादयः केवला न प्रयुज्यन्ते ततो वाचका न भवन्तीति बोद्धव्यम् । चादयो धर्मी वाचका न भवन्तीति साध्यो धर्मः केवलानामप्रयोगात् । यदि हि वाचकाः स्युस्तदा गवादिवत् केवलानामपि तेषां प्रयोगः स्याद इत्यनुमानम् । नन्वत्र प्रत्यनुमानमस्ति चादयो धर्मी द्योतका न भवन्तीति साध्यो धर्मः केवलानामप्रयोगात् । प्रत्ययवत्तत्राह 'पदत्वे सती'ति । एतदुक्तं भवति । न निर्विशेषणोयं हेतुरपि तु पदत्वे सति केवलानामप्रयोगात् द्योतका एतइति पदत्वे सतीत्यनेन प्रत्ययव्यावृत्तिः । एतदेव दर्शयितुमाह 'प्रत्ययो वाचकत्वेपी'त्यादि । प्रत्ययस्य कस्य चिद्वाचकत्वेपि पदत्वाभावात्केवलस्याप्रयोगः ॥ १९६ ॥

अथ शब्दशक्तिस्वाभाव्याच्चादिपदस्यासत्त्वभूतो यः पृथगर्थः त-द्वाचकत्वाद्वाचकत्वं व्यवस्थाप्यते तदनुपपन्नं, शक्त्यनुग्रहाद्यथा तदर्थ-वाचकानां समुच्चयादीनां प्रयोगे षष्ठी श्रूयते, वृक्षस्य समुच्चयः प्लक्ष-स्य समुच्चय इति तद्वन्निपातप्रयोगे षष्ठी श्रूयेत वृक्षस्य च प्लक्षस्य चे-ति । स्यादेवं यदि समुच्चयाभिधायकाः स्युः, न चैवं, किं तर्हि, स-मुच्चिताभिधायिन एतइत्युच्यते तदभिधाने च व्यतिरेको नास्ती-त्याह ॥

समुच्चिताभिधाने ऽपि
व्यतिरेको न विद्यते ॥ १६६ऽऽ ॥

यद्येवं समुच्चितस्य सत्त्वभूतस्याभिधाने ऽसत्त्वइति प्रतिषेधान्नि-पातसंज्ञाया अभावे तत्पूर्विकाया अव्ययसंज्ञाया अभावाच्चादेरपि विभक्तेः श्रवणं प्राप्नोतीत्याह ॥

असत्त्वभूतो भावश्च

एतदुक्तं भवति । इह शब्दैरर्थाभिधानं स्वाभाविकमिति स्थितम् । अत्र निपाताः शब्दशक्तिस्वभावादेवासत्त्वभूतार्थाभिधायिनः प्रतीय-न्तइति सनिदर्शनमाह ॥

क्रिया ऽन्येनाभिधीयते ॥ १६७ ॥

अत्र यथेत्यनुषङ्गः । यथा पाक एवोभयत्र नामपदस्याख्यातस्य च वाच्यः शब्दशक्तिस्वाभाव्यात्तथा पचतीत्याख्यातेनासत्त्वभूतो ऽसाव-भिधीयते, पाक इत्यत्र नामपदेन परिनिष्ठितस्वभावः सिद्ध इति, तद्वन्निपातैः समुच्चितादेरसत्त्वभूतस्याभिधानमिति न विभक्तेरुत्प-त्तिः । उक्तं च । 'नेदं वाचनिकं लिङ्गसंख्यादि स्वाभाविकमेव । त-द्यथा समानमधीयानानां के चिदर्थैर्युज्यन्ते अपरे ने'ति । एवं वा-चकत्वात्समुच्चिताभिधाने ऽप्याख्यातपदवदसत्त्वभूतार्थाभिधायित्वा-

द्विभक्तेरभावः ॥ १९७ ॥

अस्त्वेवमपि समुच्चिताभिधायित्वाद्यथा स्वतन्त्राणां तदभिधायकानां विशेषणेन योगस्तथा निपातानामपि स्यात्, अथ च गुणवचनानामाश्रयतो लिङ्गवचनानि भवन्तीत्यसत्त्ववाचकत्वाद्विभक्त्यभावात् शोभनं च वृक्ष इति प्राप्नोति । तथा चान्यत्रोक्तम्, प्रतिप्रयोगं(१) जात्यङ्गे सम्बन्धमुपगच्छति । विशेषणं ततो धर्मान् जातिस्था(२)न्प्रतिपद्यते, ततश्च पञ्चाला जनपदो बहुधनो रमणीय इति भवति । अथ लुबन्तस्य विशेषणं न जातेः ततः पञ्चाला रमणीया बहुधना जनपद इति भवति । एतदाशङ्क्य समर्थयितुमाह ॥

समुच्चिताभिधानेऽपि विशिष्टार्थाभिधायिनाम् ।
गुणैः पदानां सम्बन्धः परतन्त्रास्तु चादयः ॥ १९८ ॥

गुणैर्विशेषणैः पदानां विशिष्टार्थाभिधायिनां सम्बन्ध उपपद्यते । निपातानां तु शक्तिस्वाभाव्यादसत्त्ववाचित्वेपि नियतपरतन्त्रत्वाद्विशेषणयोगो नास्तीति न कश्चिद्दोषः । एतदुक्तं भवति । एतदपि शक्तिस्वाभाव्यमेव यत्तेषां नित्यपरतन्त्रत्वं नामेति । अतः समुच्चिताभिधानेपि न केवलः प्रयोगो नापि विशेषणसम्बन्ध इति स्थितम् ॥ १९८ ॥

एवं च नामाख्यातोपसर्गनिपातलक्षणं पदचतुष्टयं व्याख्यातं, अथ कर्मप्रवचनीयाः पञ्चमं पदमभ्युपगतमिति तद्विचारयितुमाह ॥

जनयित्वा क्रियां कां चि-
त्सम्बन्धो वि(३)निवर्त्तते ।

---

(१) प्रतिप्रयोगइति २ पु० पाठः ।
(२) जातिस्तानिति २ पु० पाठः ।
(३) क्रिया का चित्सबन्धित्वे इति २ पु० पाठः ।

श्रूयमाणे क्रियाशब्दे
सम्बन्धो जायते क्व चित् ॥ १६६ ॥

सम्बन्धावच्छेदहेतवः कर्मप्रवचनीया इष्यन्ते । यद्वच्यति 'सम्बन्धस्य भेदका' इति । सम्बन्धश्च सर्वः क्रियाकारकपूर्वको भवति । तत्र क्व चित्सम्बन्धं जनयित्वा क्रिया विनिवर्त्तते यथा राजपुरुष इति । अत्र हि राज्ञः पुरुषो ऽयं यस्मात्स राजा पुरुषं बिभर्त्ति, अतो भरणलक्षणा क्रिया ऽऽश्रयाश्रयिभावलक्षणं सम्बन्धं जनयित्वा निवृत्ता । क्व चित् क्रियापदं श्रूयमाणसम्बन्धमुपजनयति, यथा मातुः स्मरतीति । अत्र हि मातुरिति कर्मपदमतो मातृसम्बन्धिस्मरणमिति निमित्तनिमित्तिभावलक्षणं सम्बन्धं स्मरतिक्रिया श्रूयमाणैव जनयति । एतदेवान्यत्रोक्तं "सम्बन्धः कारकेभ्यो ऽन्यः क्रियाकारकपूर्वकः । श्रुतायामश्रुतायां वा क्रियायां सो ऽभिधीयते" इति ॥ १६६ ॥

सम्बन्धसामान्ये षष्ठीति किमर्थमधीगर्थदयेशां कर्मणीत्यादिप्रकरणारम्भ इति प्रसङ्गाद्विचारयितुमाह ॥

तत्र षष्ठी प्रतिपदं समासस्य निवृत्तये ।
विहिता दर्शनार्थं तु कारकं प्रत्युदाहृतम् ॥ २०० ॥

मातुः स्मरणमित्यादौ कर्मणि शेषत्वेन विवक्षिते सिद्धैव षष्ठीति पुनः प्रातिपद्येनाधीगर्थेत्यादिना या षष्ठी विहिता सा नियमाय भवति । कर्मादौ शेषत्वेन विवक्षिते षष्ठ्येव भवति यदन्यत्प्राप्नोति तन्निषिध्यते । किं चान्यत्प्राप्नोति, लुगादि, तत्र निदानोच्छेदनं विना न लुगादिनिवृत्तिः कर्त्तुं शक्येति समासनिवृत्तिरेव क्रियते ततश्च षष्ठ्येव भवति, यदन्यतः पृष्ठा ऽऽयाति समासलुगादि प्राप्नोति, तन्निवार्यतइत्यतः प्रतिपदं पुनः षष्ठी समासस्य निवृत्तये विहितेति बोद्धव्यम् । अतश्च 'प्रतिपदविधाना च षष्ठी न समस्यत' इति नार-

श्रणीयमेव । यद्येवं 'कर्मणीति किं मातुर्गुणैः स्मरण'मिति कथं प्रत्युदाहृतं, यथा गुणानां स्मर्त्तव्यत्वस्यासम्भवः, तथा शेषत्वस्यापि । यदि शेषत्वस्यापि(१) यदि शेषत्वेनास्य(२) विवक्षिताः स्युस्तदा तेषां षष्ठी स्यात्, तृतीया न भवेत् । ततश्च द्व्यङ्गवैकल्यमेतस्येत्येतदाशङ्क्याह 'दर्शनार्थं त्वि'त्यादि । मातुर्गुणानां स्मरणमित्युक्ते संदिह्येत, गुणाः कर्म करणं वेति । तत्रोक्तं गुणैः स्मरणमिति, गुणैरिति करणं यदा शेषत्वेन विवक्ष्यते तदा प्रतिपदविधाना षष्ठी मा भूदित्येवमर्थं कर्मणीत्युक्तमिति द्व्यङ्गवैकल्याभावः । पुनः षष्ठीविधानं समासादिनिवृत्तयएवेति स्थितम् । उक्तं च । "साधनैर्व्यपदिष्टे च श्रूयमाणक्रिये पुनः । प्राप्ता (३) प्रतिपदं षष्ठी समासस्य निवृत्तय"इति । साधनैर्व्यपदिष्टे शेषसम्बन्धे इत्यर्थः । एवं कर्मण्येव शेषत्वेन विवक्षिते षष्ठी, कारकान्तरे त्वकैवेति वृत्तिकाराः । तेषां मते गुणैः स्मरणं न तु गुणानां स्मरणमिति का चिदपि षष्ठी । टीकाकारमते तु करणस्य शेषत्वविवक्षायां गुणानां स्मरणं गुणस्मरणमित्यपि भवतीति मतभेदः ॥ २०० ॥

एवं क्रियया सम्बन्धो जन्यतइति स्थितं, ततः किमित्याह ॥

स चोपजातः सम्बन्धो विनिवृत्ते क्रियापदे ।
कर्मप्रवचनीयेन तत्र तत्र नियम्यते ॥ २०१ ॥

स च क्रिययोपजनितः सम्बन्धः तस्मिंश्चोपजाते यदा क्रियापदं क चिन्न श्रूयते, तदा क्रियाजनितोऽयं स्यादिति संदेहे कर्मप्रवचनीयेन तत्र तस्यां क्रियायां नियम्यतइति सम्बन्धविशेषः कर्मप्रवचनीयैः प्रत्याय्यते । अत एव कर्म प्रोक्तवन्तः, क्रियाकृतं विशेषसम्बन्धं

(१) यदि शेषत्वस्यापीत्यधिकमिति भाति । परं तु दृष्टपुस्तके सत्त्वान्निवेशितम् ।
(२) अस्य स्मरणस्येत्यर्थः ।
(३) प्रोक्ते इति पाठान्तरम् ।

द्योतयन्तीति कर्मप्रवचनीया उच्यन्ते ॥ २०१ ॥

अथा ऽश्रूयमाणायाः क्रियाया आक्षेपकाः कर्मप्रवचनीयाः कस्मान्नाश्रीयन्तइत्याह ॥

येन क्रियापदाक्षेपः स कारकविभक्तिभिः ।
युज्यते विर्यथा तस्य लिखावनुपसर्गता ॥ २०२ ॥

इह येन शब्देन क्रियापदस्याक्षेपः क्रियते स कारकविभक्त्या युज्यतइति दृश्यते(१)। यथा प्रादेशं विपरिलिखतीति। अत्र विशब्दो मानक्रियाया आक्षेपकः। प्रादेशं विमाय परिलिखतीत्यर्थावगतेः। ततो विमानक्रिययात्र प्रादेशलक्षणं कर्माक्षिप्तमिति तस्य कारकविभक्त्यैव द्वितीयया योगः। यदा च क्रियान्तराक्षेपको विशब्दस्तदास्य लिखत्यसम्बन्धात्तं प्रत्यनुपसर्गत्वमेव। ततश्च गतिर्गताविति निघाताभावः। तद्वत्कर्मप्रवचनीयैर्यदि क्रियापदमाक्षिप्येत, तदा तद्योगे कारकविभक्तिरेव स्यात्, ततश्च 'कर्मप्रवचनीययुक्ते द्वितीये'ति नारम्भणीयमेव स्यात्। किं तु सम्बन्धसामान्ये षष्ठी प्राप्नोति तद्बाधनाय द्वितीया ऽऽरभ्येत तदारम्भः शोभेत ॥ २०२ ॥

क्रियापदाक्षेपकत्वमन्यत्रापि दृष्टमिति तदेव दृढीकुर्वन्नाह ॥

तिष्ठतेरुपयोगश्च दृष्टो ऽप्रत्यजयन्निति ॥ २०२ऽऽ ॥

अप्रत्यजयन्नित्यत्र प्रतिशब्दः स्थितिक्रियाया आक्षेपकः परिदृष्टः। देवा असुरानप्रतितिष्ठतः प्रतिष्ठामलभमानानजयन्निति तिष्ठतेरुपयोगः आक्षेपः(२) परिदृष्टः ॥ २०२ऽऽ ॥

तथा धातुना सम्बन्धेपि सुबन्तीत्यत्राभिशब्दस्य केवलस्य चाभिमुख्ये वृत्तिः परिदृष्टेति प्रसङ्गादाह ॥

---

(१) दृश्यतामिति २ पु० पाठः ।
(२) व्याक्षेपइति २ पु० पाठः ।

सुन्वतीत्याभिमुख्ये ऽभिः
केवलो ऽपि प्रयुज्यते ॥ २०३ ॥

तदेवं कर्मप्रवचनीयानां सम्बन्धनियामकत्वमन्वर्थसंज्ञाश्रयेणैव स्थापितम् ॥ २०३ ॥

अथ ख्यात्यादीनां तद्रूपत्वासम्भवे कथं कर्मप्रवचनीयसंज्ञा स्यादित्याह ॥

कर्मप्रवचनीयत्वं
क्रियायोगे विधीयते ।
षत्वादिविनिवृत्त्यर्थं
स्वत्यादीनां विधर्मणाम् ॥ २०४ ॥

अत्र स्वत्यादीनां कर्मप्रवचनीयत्वं विधीयते संज्ञान्तरव्युदासायैवेत्यतश्चैकसंज्ञाधिकारात्तत्लुपसर्गसंज्ञाभावे तदाश्रयं षत्वादिक "सुपसर्गा" दित्यादिना न भवति ॥ २०४ ॥

अन्यदपि प्रसङ्गादाह ॥

हेतुहेतुमतोर्योग-
परिच्छेदे ऽनुना कृते ।
आरम्भाद्बाध्यते प्राप्ता
तृतीया हेतुलक्षणा ॥ २०५ ॥

लक्षणेत्थंभूतेत्यादिना सिद्धा ऽनोः कर्मप्रवचनीयसंज्ञा। लक्षणं हि ज्ञापकं यथा तथा हेतुरप्युच्यते, ततश्च यथा ज्ञाप्यज्ञापकभावे वृक्षमनुविद्योतते विद्युदित्यत्रानोः कर्मप्रवचनीयसंज्ञा, तथा शाकल्यस्य संहितामनुप्रावर्षदित्यत्रापि। तत्र हेतुहेतुमद्भावलक्षणव्यतिरेकव्यवच्छेदे ऽनुना कृते हेतुतृतीयैव परत्वात्प्राप्नोति तथा च तृतीयाया अ-

वकाशः धनेन कुलमित्यादि, लक्षणेत्थंभूतेत्यस्यावकाशो ऽनुर्ज्ञाप्यज्ञापकभावलक्षणस्य सम्बन्धस्यावच्छेदकः, यथा वृक्षमनुविद्योतते विद्युदिति, इहोभयं प्राप्नोति शाकल्यस्य संहितामनुप्रावर्षदिति, अत्र हेतुहेतुमद्भावसम्भवात् तृतीया प्राप्नोति, परत्वात् 'अनुर्लक्षण'इति पुनर्विधानान्न भवति ॥ २०५ ॥

एवं कर्मप्रवचनीयानां प्रासङ्गिकं विचारं कृत्वा वाचकत्वादिप्रकारत्रितयनिराकरणेन सम्बन्धविशेषकत्वमेव व्यवस्थापयन्नाह ॥

क्रियाया द्योतको नायं सम्बन्धस्य न वाचकः ।
नापि क्रियापदाक्षेपी सम्बन्धस्य तु भेदकः ॥२०६॥

प्रपचतीत्यादावुपसर्गवद् नैवायं(१) क्रियाद्योतकः । षष्ठ्यपवादभूतया च द्वितीययैवोक्तः सम्बन्ध इति न तस्य कर्म्मप्रवचनीयो वाचकः । नापि प्रादेशं विपरिलिखतीत्यादौ विशब्दवत् क्रियापदस्याक्षेपकः । किं तर्हि विशिष्टक्रियाजनितो ऽयं सम्बन्ध इति सम्बन्धस्य भेदको विशेषकः कर्मप्रवचनीयः ॥ २०६ ॥

इत्येवमपोद्धारप्रसङ्गेन पञ्चधा पदविभागः प्रदर्शितः । एवं दर्शितं पदप्रविभागमग्रे ऽनूद्य सप्रपञ्च(२)पदार्थभेदमुपपादयिष्यति । यथा "द्विधा कैश्चित्पदं भिन्नं चतुर्द्धा पञ्चधापि च । अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत् । पदार्थानामपोद्धारे जातिर्वा द्रव्यमेव चे"(३)त्यादि । एवमखण्डवाच्य(४)वादिना ऽपोद्धारसमाश्रयेण प्रासङ्गिकादिकार्यसमर्थने विहिते तत्प्रसङ्गात्पदपदार्थपदभागपदभागार्थवि-

(१) नायमिति २ पु० पाठः ।
(२) सप्रपञ्चमित्यसमस्तम् २ पु० ।
(३) वेति २ पु० पाठः ।
(४) वाक्येति २ पु० पाठः स चाञ्जसः ।

चारः कृतः निरुक्तकारमतानुसारेण(१) च नामाख्यातोपसर्गनिपातलक्षणप्रदर्शनं कृतं, कर्मप्रवचनीयाः पञ्चमपदजातमिति के चित्प्रतिजानतइति तदपि प्रदर्शितं, एवं च दूषितेषु परपक्षेषु स्वपक्षे च दूषणनिराकरणपूर्वकं स्थापिते पुनरप्यखण्डपक्षमेव समर्थयितुकामो वार्त्तिकविरोधमाशङ्क्याह ॥

अनर्थकानां सङ्घातः सार्थको ऽनर्थकस्तथा ।
वर्णानां पदमर्थेन युक्तं नावयवाः पदे ॥ २०७ ॥

किं च ॥

पदानामर्थयुक्तानां सङ्घातो भिद्यते पुनः ।
अर्थान्तरावरोधेन सम्बन्धविगमेन च ॥ २०८ ॥

अर्थान्तरस्य संसर्गलक्षणस्यावरोधेन परिग्रहणेन कश्चिदेव देवदत्त गामभ्याजेत्यादिकः पदसङ्घातोऽर्थवान्, कश्चित्तु दश दाडिमादिः परस्परसम्बन्धविगमेनानर्थक इति सम्बन्धाद्यपेतः ॥ २०८ ॥

तदेव दर्शयितुमाह ॥

सार्थकानर्थकौ भेदे सम्बन्धं नाधिगच्छतः ।
अधिगच्छत इत्येके कुटीरादिनिदर्शनात् ॥ २०९ ॥

भेदे क्रियमाणे सति यौ वर्णसमुदायौ सार्थकानर्थकौ यथा कुटीशब्दो रशब्दश्च तौ सम्बन्धमनर्थकत्वान्नाधिगच्छत इति के चित् । द्योत्येनार्थेनार्थवत्त्वादपरे सम्बन्धमधिगच्छत इत्याहुः ॥ २०९ ॥

सङ्घातार्थवत्त्वादवयवार्थवत्त्वमपि दर्शयितुमाह ॥

अर्थवद्भ्यो विशिष्टार्थः सङ्घात उपजायते ।
नोपजायतइत्येके समासस्वार्थिकादिषु ॥ २१० ॥

---

(१) वचनानुसारेणेति ३ पु० पाठः ।

राजपुरुष इत्यादावर्थवद्भ्यः सङ्घातो ऽर्थवानुपजायते । स्वार्थिकादिषु त्ववयवार्थप्रकृतिकमर्थान्तरं नाविर्भूतमिति नास्त्यवयवार्थवद्भ्यो व्यतिरिक्तः सङ्घातार्थस्य(१) सम्भवः ॥ २१० ॥

द्विविधरूपतया ऽवस्थितास्तद्दत्याह ॥

> केचित्तु युतसिद्धार्था
> भेदे निर्ज्ञातशक्तयः ।
> अन्वयव्यतिरेकाभ्यां
> केचित्कल्पितशक्तयः ॥ २११ ॥

युतः सिद्धो ऽर्थो येषां ते तथाविधाः यथा शमीवृचो दाडिमीवृच इत्यादयः । कस्मादेवमित्याह । भेदइत्यादि । भेदे, वाक्ये सति रूपस्याऽविनष्टत्वात्पृथगेव निर्ज्ञातशक्तयः केचित्संज्ञुप्रज्ञ्वादयोन्वयव्यतिरेकाभ्यां कल्पितशक्तय इति । अत्र हि प्रगते जानुनी यस्य सङ्गते जानुनी यस्य 'प्रसंभ्यां जानुनोर्ज्ञुरि'ति लक्षणानुगमेनार्थः कल्प्यः, न तु पृथगेव, वाक्ये दृष्टस्य जानुशब्दस्य नष्टत्वात् । तस्मात्संघातार्थवत्त्वादिति भागासिद्धमनैकान्तिकं च बोद्धव्यम् ॥ २११ ॥

यदप्युक्तं "अर्थवन्तो वर्णाः धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शना"दिति तत्राह ॥

> शास्त्रार्थ एव वर्णाना-
> मर्थवत्त्वे प्रदर्शितः ।
> धात्वादीनां विशुद्धानां
> लौकिको ऽर्थो न विद्यते ॥ २१२ ॥

कृत्तद्धितानामर्थश्च केवलानामलौकिकः ।

---

(१) अवयवार्थव्यतिरिक्तसंघातार्थेति २ पु० पाठः ।

प्राग्विभक्तेस्तदन्तस्य तथैवार्थो न विद्यते ॥ २१३ ॥
अभिव्यक्ततरो योऽर्थः प्रत्ययान्तेषु लक्ष्यते ।
अर्थवत्ताप्रकरणादाश्रितः स तथाविधः ॥ २१४ ॥

वर्णानामर्थवत्त्वाभ्युपगमे पदवाक्ययोरभिधायकता भज्येतेत्याह ॥

आत्मभेदो न चेत्कश्चि-
द्वर्णेभ्यः पदवाक्ययोः ।
अन्योन्यापेक्षया शक्त्या
वर्णः स्यादभिधायकः ॥ २१५ ॥

सुबोधम् ॥ २१५ ॥

इदानीं मतभेदं प्रदर्शयितुमाह ॥

वर्णेन केन चिन्न्यूनः सङ्घातो योऽभिधायकः ।
न चेच्छब्दान्तरमसावन्यूनस्तेन गम्यते ॥ २१६ ॥

यदि केन चिद्वर्णेन न्यूनः सङ्घात इष्कर्त्तारमित्यादावभिधायक-स्तदा द्वयी गतिः । शब्दान्तरत्वमेकशब्दत्वं वा । यदि न शब्दान्तर-त्वमिष्कर्त्तारमित्यस्य तदा न्यूनवर्णोपि पूर्णवर्णो निष्कर्त्तारमिति शब्द एव गम्यते तस्मात्स्वार्थप्रतीतिरिति बोद्धव्यम् ॥ २१६ ॥

एतदेव प्रतिपादयितुमाह ॥

स तस्मिन् वाचके शब्दे
निमित्तात् स्मृतिमादधत् ।
साक्षादिव व्यवहितं
शब्देनार्थमुपोहते ॥ २१७ ॥

यदि केन चिद्वर्णेन न्यूनः स न्यूनवर्णः परिपूर्णशब्दवाचकरूपे निमित्ताच्छास्त्राभ्यासात् स्मृतिमुपजनयन् साक्षादिव व्यवहितमप्यर्थं

शब्देन स्मृत्युपस्थापितेनोपोहते समर्पयतीति । अथ शब्दान्तरत्वं तदा यथा परिपूर्णवर्णो वाचकस्तथा तत्सम्बन्धाद् न्यूनवर्णोपीति न कश्चिद्विशेषः ॥ २१७ ॥

तस्मादवयवानां तदर्थप्रतिपादनमनुपपन्नमेवेति प्रतिपादयितुमाह ॥

पदवाच्यो यथा नार्थः कश्चिद्गौरखरादिषु ।
सत्यपि प्रत्यये ऽत्यन्तं समुदाये न गम्यते ॥ २१८ ॥
समन्वित इवार्थात्मा पदार्थैर्यः प्रतीयते ।
पदार्थदर्शनं तत्र तथैवानुपकारकम् ॥ २१९ ॥

गौरखरः कृष्णसर्प इत्यादौ यथा नैव पदानां वाच्यः(१) कश्चिदर्थो ऽस्ति, सत्यपि वा तच्छ्रवणकाले तदर्थप्रत्यये गौरखर इत्यस्मिन् समुदाये ऽत्यन्तं सर्वथा नैवायमर्थो गम्यते, जात्यन्तरमेव हि पदार्थसंस्पर्शमात्रविरहितं समुदायात्तत्रावगतं, तथैव देवदत्त गामभ्याजेत्यादिभिः पदार्थैर्यः प्रतिभालक्षणो ऽर्थः समन्वित इव परमार्थतस्तु निर्विभागः पानकरसादिवत्प्रतीयते, तत्र पदार्थदर्शनमवयवार्थप्रतिभासो ऽनुपकारक एव मन्तव्यः ॥ २१९ ॥

यदि चैतन्नाभ्युपगम्यते तदा समुदायावयवयोर्भिन्नार्थत्वे सति वृत्तौ समकालमेव विरुद्धधर्मसंसर्गः प्राप्नोतीति पदवादिमतं दूषयितुमाह ॥

समुदायावयवयोर्भिन्नार्थत्वे च वृत्तिषु ।
युगपद्भेदसंसर्गौ विरुद्धावनुषङ्गिणौ ॥ २२० ॥

वृत्तिषु समासादिकासु । तुल्यकालं समुदायेन पांसूदकवदविभागापन्नस्यार्थस्य प्रतिपादनात्संसर्गः समासार्थः पदेभ्यश्च भिन्नस्या-

---

(१) वाच्य इति २ पु० पाठः ।

र्थस्य प्रतीतेर्भेदसंसर्गौ विरुद्धौ युगपत्प्राप्नुतः । न चैतद् युक्तं प्रतीत्यभावादिति ॥ २२० ॥

पदपदार्थानां च सत्यत्वे ऽध्यादीनां वाक्ये साधनाभिधायित्वं प्राप्नोति । न चैतद् दृष्टं साधनाभिधायकत्वेन स्वतन्त्राणां तेषां प्रयोगादर्शनादित्याह ॥

कश्च साधनमात्रार्थानध्यादीन्परिकल्पयेत् ।
अप्रयुक्तपदस्यार्थौ बहुव्रीहौ कथं भवेत् ॥ २२१ ॥

अधिस्त्रीत्यादौ समुदायस्याधिकरणवृत्तित्वं परिदृष्टं न कदा चिदप्यवयवस्येति । यदा(१) च पदानि सत्यार्थानि विद्यन्ते तदा बहुव्रीह्यर्थो नावकल्पेतेत्याह । अप्रयुक्तेत्यादि । चित्रगुरित्यादाववयवानां सत्यर्थत्वे(२) चित्रशब्दस्य गुणः कश्चिदभिधेयो गोशब्दस्य गोजातयः काश्चिदित्यप्रयुक्तं वाचकं पदं यस्यासावप्रयुक्तपदो देवदत्तार्थः कस्याभिधेयः स्यात् ॥ २२१ ॥

यदि चावयवानामर्थवत्त्वं स्यात्तदा प्रज्ञुः संज्ञुरित्यत्रापि ज्ञुशब्दस्यार्थः पृथगुपलभ्येत न चोपलभ्यतइति प्रतिपादयितुमाह ॥

प्रज्ञुसंज्ञाद्यवयवैर्न चास्त्यर्थावधारणम् ॥ २२१ऽऽ ॥

उपसंहर्त्तुमाह ॥

तस्मात्संघात एवैको विशिष्टार्थनिबन्धनम् ॥ २२२ ॥

तस्मात्समासेषु विरुद्धार्थोपस्थापनादध्यादीनां साधनमात्रार्थवृत्तित्वासम्भवाद्बहुव्रीह्यर्थस्यासङ्गतेः प्रज्ञुसंज्ञित्वत्यादाववयवार्थानुपलम्भादित्युपपत्तिचतुष्टयेन सत्यार्थानां पदानामनुपपत्तेः सङ्घात एवैको ऽखण्डः प्रविभागशून्यः स्फोटात्मा विशिष्टस्यैव प्रतिभात्मकस्यार्थस्य

(१) यदि चेति २ पु० पाठः ।
(२) सत्यार्थत्वइति २ पु० पाठः ।

निबन्धनमभ्युपगन्तुं युक्त इति सिद्धम् । सङ्घातसाधर्म्याच्च स्फोट एवात्र सङ्घातशब्देनोक्तः सङ्घातो ह्यवयवैराच्छुरितो भवति, स्फोटश्चापि ध्वनिभिराच्छुरित इति सङ्घातसाधर्म्यम् ॥ २२२ ॥

इदानीमखण्डवाद्यात्मीयपक्षे परकीयचोद्यसप्तकमाशङ्क्य क्रमेण समर्थयितुमुपक्रमते । तथा च यदि पदार्थो नैव विद्यते तदा देवदत्तविष्णुमित्रा भोज्यन्तामित्यत्र द्वन्द्वेनैक एवाखण्डः समुदायो वाक्यार्थो(१)भिधीयते, ततश्च पदार्थभेदस्यानभ्युपगमादेकत्वे च सति बहुवचनं नोपपद्येतेत्याशङ्क्य समर्थयितुमाह ॥

गर्गा इत्येक एवायं
बह्वष्वर्थेषु वर्त्तते ।
द्वन्द्वसंज्ञो ऽपि सङ्घातो
बहूनामभिधायकः ॥ २२३ ॥

यथा गर्गस्यापत्यानि बहूनि गर्गा इत्यत्रैकशेषे कृते गर्गशब्द एक एव निरस्तावयवविभागो बह्वर्थवृत्तित्वाद्बहुवचनान्त,स्तथैव द्वन्द्वसंज्ञः सङ्घातो निरस्तावयवभेदोपि शब्दशक्तिमाहात्म्याद्बहुत्वमभिधत्तइति सत्यपि बहुवचने नास्ति तावता वाक्यार्थव्यतिरेकेण पदार्थसद्भावः ॥ २२३ ॥

अथ धवखदिरपलाशाः सिच्यन्तामित्यत्र वाक्यार्थव्यतिरेकेण पदार्थासम्भवात्प्रत्येकं वाक्यपरिसमाप्त्ययोगात्समुदायस्य च युगपत्सेचनक्रियाऽसम्भवाद्वाक्यार्थस्यानुपपत्तिरित्यशङ्क्य समर्थनार्थमाह ॥

यथैकदेशे भुज्यादिः प्रत्येकमवतिष्ठते ।
क्रियैवं द्वन्द्ववाच्ये ऽर्थे प्रत्येकं प्रविभज्यते ॥ २२४ ॥

ब्राह्मणा भोज्यन्तामित्यत्र यथा विनापि वाक्यार्थव्यतिरेकेण प-

(१) वाक्यार्थे इति २ पु० पाठः ।

दार्थसद्भावं पदार्थानां भुजिक्रिया प्रत्येकमवतिष्ठते, तथा द्वन्द्ववाक्ये समुदायलक्षणे ऽर्थे प्रत्येकं प्रविभज्यतइति न कश्चिद्दोषः । एतदुक्तं भवति । ब्राह्मणा भोज्यन्तामित्यत्र यथा सत्यामपि समुदायप्रतिपत्तावपोद्धारबुद्ध्या प्रकल्प्यावयवान् प्रत्येकं भुजिक्रिया समाप्यते, तथैव द्वन्द्वात्समुदाये प्रतिपन्ने बुद्धिपरिकल्पितप्रविभागसमाश्रयणेन प्रत्येकं वाक्यपरिसमाप्तिर्बोद्धव्या ॥ २२४ ॥

पुनरप्याशङ्क्य परिहर्तुमाह ॥

> यच्च द्वन्द्वपदार्थस्य
> तच्छब्देन व्यपेक्षणा ।
> सा ऽपि व्यावृत्तरूपे ऽर्थे
> सर्वनामसरूपता ॥ २२५ ॥

द्वन्द्वान्तर्वर्तिनः पदार्थस्य वाच्यार्थ(१)व्यतिरेकेणासम्भवात्सर्वनाम्ना परामर्शो नोपपद्यते । यथा जनपदतदवध्योरिति । अत्र हि जनपदात्तच्छब्देन परामृष्टाच्च तस्मादेवावधिभूतात्प्रत्यय इष्यते । वाक्यार्थव्यतिरेकेणासति च पदार्थे कथमसतः सर्वनाम्नाऽपेक्षणमिति पराभिप्रायमनूद्य समाधत्ते । सापीत्यादिना । नात्र किं चित्सर्वनाम विद्यते तत्कुत एव तत्र द्वन्द्वपदार्थपरामर्शः स्यात्केवल(२)व्यावृत्तरूपे विशिष्टएवात्र वाक्यार्थे प्रतिभामात्रे ऽन्वयात्सर्वनामसारूप्यमात्रमाभाति न तु वास्तवो ऽत्र तत्पदार्थप्रत्ययः कश्चित्प्रतिपन्नः । यद्वक्ष्यति "यदन्तराले ज्ञानं तु पदार्थेषूपजायते । प्रतिपत्तेरुपायोसौ प्रक्रमानवधारणादि"ति ॥ २२५ ॥

नन्वसति पदार्थे धवखदिरपलाशाश्छिद्यन्तामित्यत्राक्रमिकनि-

---

(१) वाक्यार्थेति २ पु० पाठः ।
(२) केवलम् इति २ पु० पाठः ।

विभागो वाक्यार्थ इष्टस्ततश्च यथैव शब्दादवगतो ऽर्थस्तथैवानुष्ठानमिति युगपदेव च्छिदिक्रिया प्राप्नोति न चैवमनुष्ठातुं पार्यतइत्याह ॥

यथा च खदिरच्छेदे भागेषु क्रमवांश्छिदिः ।
तथा द्वन्द्वपदार्थस्य भागेषु क्रमदर्शनम् ॥ २२६ ॥

यत्रापि भवतः पदार्थवाक्यार्थयोर्भेदः खदिरश्छिद्यतामित्यादौ, तत्रापि युगपदेवानुष्ठातुं न याति। यावता खदिरस्य प्रथमं त्वग्भागं छिन्दन्ति ततोऽप्यस्थिभागं तदनन्तरं सारभागमिति क्रमवर्त्तिन्येव छिदिक्रिया पर्यवस्यति । तथैव द्वन्द्वे यः पदार्थो ऽपोद्धारबुद्धिपरिकल्पितस्तस्य क्रमेण दर्शनं व्यवस्थितिरनुष्ठानमिति यावत् ॥ २२६ ॥

अथास्मिन्पर्वते धवखदिरपलाशाश्छिद्यन्तामिति धवखदिरपलाशच्छेदनं निरूपितं वाक्यार्थः । तत्रैकदेशमात्रेपि च्छिन्ने यदादिष्टं तत् कृतमिति ब्रुवन्ति, तदेतदनंशे वाक्यार्थे कथमुपपत्तिमदित्याशङ्क्याह ॥

सङ्घैकदेशे प्रक्रान्तान्यथासङ्घानुपातिनः ।
क्रियाविशेषान्मन्यन्ते स द्वन्द्वावयवे क्रमः ॥ २२७ ॥

यथा ब्राम्हणा भोज्यन्तामित्यत्र सङ्घातानुपातिन्यपि भुजिक्रिया तदेकदेशे प्रक्रान्ता प्रवर्त्तिता अतो भुक्तं ब्राह्मणैरित्युच्यते, तथा द्वन्द्ववाच्यसमुदायान्तर्गतावयवप्रवर्त्तितापि शब्दार्थपरित्यागकारणतां न प्रतिपद्यतइति विज्ञेयम् ॥ २२७ ॥

यदि च पद(१)पदार्थासम्भवस्तदा पूर्वपदार्थप्रधानो ऽव्ययीभाव, उत्तरपदार्थप्रधानस्तत्पुरुष, इत्यादिकं समासेष्वर्थाभिधानमनुपपन्नमित्याशङ्क्य परिहर्तुमाह ॥

---

(१) पदेति २ पु० नास्ति ।

प्रतिपादयता वृत्तिमबुधान्वाच्यपूर्विकाम् ।
वृत्तौ पदार्थभेदेन प्राधान्यमुपदर्शितम् ॥ २२८ ॥

वाक्यपूर्विकां वृत्तिं समासलक्षणामबुधान्प्रतिपादयता तद्भेदेन समासेषु पदार्थप्राधान्यमाचार्येणोपदर्शितम् । वाक्यपूर्विकामिति । यदा वाक्यमेव वृत्ती भवति कार्यवशादन्वाख्यानपक्षे तदैवमुक्तमित्यर्थः । एतदुक्तं भवति । अबुधबोधनाय तथा शास्त्रे प्रक्रियामात्रप्रदर्शनं कृतं न पुनस्तावता पदपदार्थसत्ता ऽभ्युपगता ॥ २२८ ॥

अब्राह्मण इत्यादौ नञ्समासे ऽपि यत् पदार्थप्राधान्यं बहुधा भाष्ये विकल्पितं तदप्यबुधबोधनाय शास्त्रप्रक्रियामात्रप्रदर्शनमेव बोद्धव्यमित्याह ॥

अभेदादभिधेयस्य
नञ्समासे विकल्पितम् ।
प्राधान्यं बहुधा भाष्ये
दोषास्तु प्रक्रियागताः ॥ २२९ ॥

परमार्थस्त्वेकमेव तत्राभिधेयरूपं सकलजनप्रसिद्धं स्थितमिति न तत्र कश्चित्पूर्वोत्तरपदार्थव्यवहार उपपद्यतइति बोद्धव्यम् । प्रतिपादयिष्यते(१) "शास्त्रवृत्तिप्रभेदेन लौकिकोर्थो न भिद्यते । नञ्समासे यतस्तत्र त्रयः पक्षा विचारिता" इति ॥ २२९ ॥

अथ पदार्थासम्भवे वृत्तिषु जहत्स्वार्थविकल्पो नोपपद्यते किल पदार्थासम्भवे कुत्रैतदुच्यतइत्याशङ्क्य समर्थयितुमाह ॥

जहत्स्वार्थविकल्पे च सर्वार्थत्यागमिच्छता ।
बहुव्रीहिपदार्थस्य त्यागः सर्वस्य दर्शितः ॥ २३० ॥

---

(१) प्रतिपादयिष्यति चेति २ पु० पाठः ।

यत एवमत एव तत्प्रदर्शनायाचार्येण वृत्तिषु जहत्स्वार्थपक्षे सर्वार्थत्यागमिच्छता बहुव्रीहौ समासे सर्वस्य पदार्थस्य त्याग उपदर्शितः । तत्र हि पदार्थव्यतिरेकेणान्य एव समुदायार्थो विशिष्ट एव प्रतिभातीत्यतः सर्वथा न वास्तवः कश्चित्पदार्थव्यवहारो ऽङ्गीकार्य इति । तदेवं द्वन्द्वे बहुवचनं प्रत्येकं वाक्यपरिसमाप्तिः सर्वनामप्रत्यवमर्शः क्रमेणानुष्ठानमेकदेशानुष्ठाने समुदायार्थानुष्ठानाभिमानश्चेति पञ्च चोद्यान्यपोद्धारसमाश्रयेणाखण्डवादिना परिहृतानि । बहुव्रीहौ च जहत्स्वार्थपक्षे सर्वार्थत्यागोपदर्शनादखण्डमेव वाक्यमभिप्रेतमिति लक्ष्यते ॥ २३० ॥

इदानीं सर्वो ऽयं पदपदार्थव्यवहारः काल्पनिको ऽसत्यभूत एव नानाविधशास्त्रप्रक्रियामात्रशरणो ऽवगन्तव्य इत्युपपादयितुमाह ॥

शास्त्रे क्व चित्प्रकृत्यर्थः प्रत्ययेनाभिधीयते ।
प्रकृतौ विनिवृत्तायां प्रत्ययार्थश्च धातुभिः ॥ २३१ ॥

तथा च पदस्य प्रकृतिभागाश्रितमभिधेयं प्रकृत्यसद्भावेपि प्रत्यय एवाभिदधाति, यथा इयानित्यादौ । तथा प्रत्ययार्थस्य विनिवृत्तेपि प्रकृत्यैवाभिधीयते यथा ऽहन्निति ॥ २३१ ॥

पुनरप्यव्यवस्थां प्रदर्शयितुमाह ॥

यमर्थमाहतुर्भिन्नौ
प्रत्ययावेक एव तम् ।
क्व चिदाह पचन्तीति
धातुस्ताभ्यां विना क्वचित् ॥ २३२ ॥

तत्र पचन्तीत्यादौ भिन्नौ प्रत्ययौ शप्तिङौ यमर्थं कर्तृलक्षणमाहतुस्तमेवैकोप्याह अत्ति जुहोतीत्यादौ । क्व चिद्धातुरेव तमर्थं ताभ्यां विनैवाह अहन्वृत्रमिन्द्र इत्यादाविति । किमेतत्पदार्थानां वास्तवत्वे

प्रमाणधुरामवगाहतइति यत्किं चिदेतत् ॥ २३२ ॥

शास्त्रप्रक्रियाणामप्यवास्तवत्वमुपपादयितुमाह ॥

अन्वाख्यानस्मृतौ ये च
प्रत्ययार्था निबन्धनम् ।
निर्दिष्टार्थप्रकृत्यर्थाः(१)
स्मृत्यन्तरउदाहृताः ॥ २३३ ॥

कस्यां चिच्छब्दानुशासनस्मृतौ ये प्रत्ययविधाने प्रत्ययार्था निबन्धनं निर्दिष्टास्तएव स्मृत्यन्तरे प्रकृत्यर्था निबन्धनमुदाहृता इति नास्त्येव नैयत्यं पदपदार्थानाम् ॥ २३३ ॥

प्रसिद्धत्वाच्च शास्त्राभ्यासाधिवासितमानसाः शास्त्रव्यवहारेषु पदविभागमपि प्रयुञ्जतएव । यथा उद्गमतीत्येवं प्रयोक्तव्ये उद्गमीति लाघवार्थं प्रयुञ्जते । करोषि करोमीति प्रयोक्तव्ये करीत्येतदेकदेशमात्रं प्रयुञ्जतएवेत्यभिधातुमाह ॥

प्रसिद्धेरुद्गमिकरी-
त्येव शास्त्रे ऽभिधीयते ॥ २३३ऽऽ ॥

ननु वस्तुभूताः शास्त्रप्रक्रियाः किमिति नाश्रिता इत्याह ॥

व्यवहाराय मन्यन्ते
शास्त्रार्थप्रक्रिया यतः ॥ २३४ ॥

शास्त्रार्थप्रक्रियाः केवलमबुधानां व्युत्पादनाय । अतो न शास्त्राणि तत्त्वं वक्तुं पारयन्ति ॥ २३४ ॥

अथाविद्यैवासत्या प्रक्रियाभेदेनोपवर्ण्यतइत्याह ॥

शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते ॥ २३४ऽऽ ॥

---

(१) निर्दिष्टास्ते प्रकृत्यर्था इति ३ पु० पाठः ।

यद्येवं किमविद्योपदर्शकशास्त्रप्रक्रियासमाश्रयेण प्रेचापूर्वकारिणामित्याह ॥

अनागमविकल्पा तु स्वयं विद्योपवर्त्तते ॥ २३५ ॥

अविद्योपमर्दैन ह्युत्तरकालमागमविकल्परहिता शास्त्रप्रक्रिया प्रपञ्चशून्या विद्योपावर्त्तते प्रकटीभवति। एतदुक्तं भवत्यविद्यैव विद्योपाय इति ॥ २३५ ॥

ननु कथमविद्या विद्यास्वरूपविलचणा विद्याया उपायः स्यादित्याह ॥

अनिबद्धं निमित्तेषु
निरुपाख्यं फलं यथा।
तथा विद्या ऽप्यनाख्येया
शास्त्रोपायेव लच्यते ॥ २३६ ॥

न हि कारणेषु कार्यं केन चिद्व्यपदेश्येन रूपेण सम्बद्धं वक्तुं पार्यते। यत्र यथा कार्यलचणं फलं निमित्तेषु कारणेषूपाख्याविरहितं करणसमन्वयविरहितमप्यद्भुतेन रूपेणोपजायते। तथैवाविद्याविलये स्वयं विद्योपावर्त्तमाना शास्त्रादुपजातेति नाख्यातुं शक्यते, केवलमदूरविप्रकर्षेण शास्त्राभ्यासाद्यदसावनुशील्यते ततो विद्यायां शास्त्रोपाया(१) इव लच्यन्ते वस्तुस्थित्या तु प्रविवेकादसौ प्रकाशतइति बोद्धव्यम् ॥ २३६ ॥

'शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यत'इत्युक्तं ततश्च शास्त्राभ्यासानतिक्रमेणैव लोकस्य वाक्शब्दोर्थप्रतिपत्तिं समीहतइत्याह ॥

अथाभ्यासं(२) हि वागर्थे

---

(१) शास्त्राण्युपाया इति २ पु० पाठः।
(२) यथाऽभ्यासमिति ३ पु० पाठः।

प्रतिपत्तिं समीहते ॥ २३६ऽऽ ॥

स चानादिरभ्यासो मिथ्याभूत एव स्वाभाविक इव प्रतिभाती-त्याह ॥

स्वभाव इव चानादि-
र्मिथ्याभ्यासो व्यवस्थितः ॥ २३७ ॥

मिथ्यात्वमेव प्रतिपादयितुमाह ॥

उत्प्रेक्ष्यते सावयवं परमाणुमपश्यितः ।
तथावयविनं युक्तमन्यैरवयवैः पुनः ॥ २३८ ॥

तारतम्ययोगादपकर्षप्राप्तिं परिमाणस्यानुमाय परमाणुः स्था-पितस्तस्याप्यन्यः सावयवत्वमुत्प्रेक्ष्यतइति नास्त्येव पुरुषबुद्धीनां वा-स्तवत्वम् । अवयविनमप्यवयवान्तरयोगिनमुत्प्रेक्षते ॥ २३८ ॥

तथा परिमितपरिमाणं घटादिकं दृष्ट्वा लोच्यते इति लोको ऽयं विश्वप्रपञ्चरूपः परिच्छिन्नतयावस्थितो ऽध्यवसीयतइत्याह ॥

घटादिदर्शनाल्लोकः
परिच्छिन्नो ऽवसीयते ।
समारम्भाच्च भावाना-
मादिमद्ब्रह्म शाश्वतम् ॥ २३९ ॥

उपायाः शिक्षमाणानां बालानामपलापनाः ।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते ॥ २४० ॥

समारम्भादुत्पादाच्च भावानामिदं शाश्वतमपि ब्रह्मादिमदिति लोके व्यपदिश्यते(१) । तस्मादुपायाः शास्त्राणि जिज्ञासूनामबुधाना-मपलापनाः प्रतारणा एव बोद्धव्याः । यस्मात्तत्रासत्यरूपे शास्त्रप्र-

(१) लोकैर्व्यपदिश्यतइति २ पु० पाठः ।

क्रियामात्रेर्थे स्थित्वा अविद्यामुत्सृज्य सत्यं विद्यास्वरूपं ब्रह्म समीहते प्राप्नोतीति यावत् ॥ २४० ॥

इदानीं पुनरपि पदपदार्थनिराकरणं प्रतिपादयितुमाह ॥

अन्यथा प्रतिपद्यार्थं पदग्रहणपूर्वकम्।
पुनर्वाक्ये तमेवार्थमन्यथा प्रतिपद्यते ॥ २४१ ॥

यदि च सत्यभूताः (१) पदार्थाः स्युस्तदा पदार्थप्रतिपत्त्यवसरे सर्वमन्यथा प्रतिपद्यते (२) वाक्यार्थावसरे तत्परित्यागेनान्यथैव प्रतिपत्तिर्दृश्यमाना नोपपद्यते। एतच्चाग्रे स्तुतिनिन्देत्यादिना व्यक्तीकरिष्यति ॥ २४१ ॥

यथा च पदग्रहणपूर्वकमादौ पदार्थः प्रतिपन्नः पश्चाद्वाक्यार्थप्रतिपत्त्यवसरे तदर्थपरित्यागेनान्य एवार्थ उपजायतइति प्रतिपादयितुमाह ॥

उपात्ता बहवो ऽप्यर्था
येष्वन्ते प्रतिषेधनम्।
क्रियते ते निवर्त्तन्ते
तस्मात्तांस्तत्र(३) नाश्रयेत् ॥ २४२ ॥

इहाद्य धवखदिरपलाशाश्छेदनीया नेत्यत्र पदार्थप्रतिभास(४)-समये ऽन्य एव धवादिच्छेदनलक्षणोऽर्थ उपादीयते, पश्चान्निषेधेन तन्निवर्त्तनं क्रियते, न चैतद्युक्तं, उपात्तस्य त्यागे शब्दार्थसंबन्धस्यानित्यत्वप्राप्तेरिति तेषां तत्रानाश्रयणमेव युक्तमित्याह 'तस्मात्तांस्तत्र नाश्रयेदि'ति ॥ २४२ ॥

---

(१) सत्यंभूता इति २ पु० पाठः।
(२) प्रतिपद्येति २ पु० पाठः।
(३) तस्मात्तांस्तत्रेति २ पु० पाठः।
(४) प्रतिभाससमयइति २ पु० पाठः।

अतो वाक्यवाक्यार्थयोरेव सत्यत्वमत्र(१) युक्तमभ्युपगन्तुमित्याह ॥

वृक्षो नास्तीति वाक्यं च विशिष्टाभावलक्षणम् ।
नार्थेन बुद्धौ सम्बन्धो निवृत्तेरवतिष्ठते ॥ २४३ ॥

एतद्वाक्यमेवाखण्डं विशिष्टाभावलक्षणमिति वृक्षाभावावगति-रूपस्य वाक्यार्थस्य लक्षणं प्रत्यायकमिष्यते । यदि पुनः पदार्थो ऽत्र व्यतिरिक्तो ऽभ्युपगम्यते, तदा वृक्षलक्षणे पदार्थे(२) व्यवस्थिते नसम्ब-न्धस्तस्य नोपपद्यते, तस्य हि स्वकारणाल्लब्धात्मलाभस्य न जातनि-वृत्तिः कर्त्तुं शक्यते । अथासत एव नञा सम्बन्धस्तदा ऽसत्त्वादेव निवृत्तासाविति(३) नञो वैयर्थ्यं, यदुच्यते "सतां च न निषेधोस्ति सो ऽसत्सु च न विद्यते । जगत्यनेन न्यायेन नञर्थः प्रलयं गत" इति । तस्मादर्थस्य स्वत एव निवृत्तेस्तेन सह निवृत्तिवाचकस्य स-म्बन्धो न विद्यते ॥ २४३ ॥

अथोच्यते विच्छेदेन पदार्थविषयास्तिबुद्धिरवधृता सा नञा नि-वार्यतइत्याह ॥

विच्छेदप्रतिपत्तौ च
यद्यस्तीत्यवधार्यते ॥ २४३ऽऽ ॥

एवं च बुद्धावपि नञ्सम्बन्धो नोपपद्यते इत्याह ॥

अशब्दवाच्या सा बुद्धि-
र्निवर्त्तेत स्थिता कथम् ॥ २४४ ॥

नञा शब्दवाच्योर्थः प्रतिषिध्यते, न च बुद्धिः शब्दवाच्या, शब्देन हि बाह्योर्थो ऽभिधीयते बुद्धिस्त्वर्थालम्बनात् शब्दाभिधेयत्वमर्हती-

---

(१) सत्यत्वमात्रमिति २ पु० पाठः ।

(२) वाक्यइति २ पु० पाठः ।

(३) निवृत्तोसाविति २ पु० पाठः ।

त्यत: कथं नञा सा प्रतिषिध्यते ॥ २४४ ॥

अथ बुद्धिर्न निवर्त्तते ऽपि तु तस्या नञा मिथ्यात्वमावेद्यतइ-
त्याह ॥

अथ यज्ज्ञातमुत्पन्नं
तन्मिथ्येति नञा कृतम् ॥ २४४ऽऽ ॥

एतदपि निराकर्त्तुमाह ॥

नञो व्यापारभेदे ऽस्मि-
न्नभावावगतिः कथम् ॥ २४५ ॥

नञ एवमात्मके व्यापारविशेषे बुद्धिनिषेधात्मके ऽङ्गीक्रियमाणे
सति वृक्षस्याभावावगतिर्न स्यात् किल, पर्युदासे सदृशप्रतिपत्तिवि-
धायिनि नञ्वाच्यएतदुपपद्यते । प्रसज्यप्रतिषेधे तु नैतदुपपद्यते वृ-
क्षाभावो हि तत्र वाक्यार्थ इति ॥ २४५ ॥

अथ निवर्त्यमान एवास्याधारो ऽभिधेयः कल्प्यते तत्राप्याह ॥

निराधारप्रवृत्तौ च
प्राक्प्रवृत्तिर्नञो भवेत् ॥ २४५ऽऽ ॥

आधारमनपेक्ष्यैव नञ् प्रवर्त्ततइति यद्युच्येत तदा नञः प्रागेव
प्रवृत्तिः प्रयोगः स्यात् । प्रतिषेद्धुमिष्ट सर्वत्र नेत्येवाभिदध्युरि-
ति ॥ २४५ऽऽ ॥

अथ विषयनियमार्थमाधारप्रयोगो न वृक्ष इति वृक्षस्य निषेधो
न घटादेरिति प्रतिपादयितुमाह ॥

अथाधारः स एवास्य

अत्रापि दूषणमभिधातुमाह ॥

नियमार्था श्रुतिर्भवेत् ॥ २४६ ॥

नञैव तदर्थनिषेधे जाते पुनरसौ तच्छ्रुतिर्नियमाय वा स्यात् ॥ २४६ ॥

निपाता द्योतकाः केचिदित्यभिप्रायेणाह ॥

नियमद्योतनार्थो वा

अथ वा ऽनुक्रम्य विस्पष्टार्थं पुनर्वचनमनुवादः स्यादित्याह ॥

अनुवादो ऽथ वा भवेत् ॥ २४६ऽऽ ॥

सर्वथैवमानर्थक्यमेव पदार्थानां स्यादित्याह ॥

कश्चिदेवार्थवांस्तत्र

शब्दः शेषास्त्वनर्थकाः ॥ २४७ ॥

न ब्राह्मण इत्यादौ नञ एवार्थवत्त्वमित्यन्येषामानर्थक्यं स्यान्नचैतदुपपन्नं, तस्माद्दृचो नास्तीत्यस्मादखण्डादखण्ड एव विशिष्टाभावरूपो वाक्यार्थः न पुनस्तत्त्वतः पृथगेव पदार्थः सत्यभूतः कश्चिदुपपन्नः ॥ २४७ ॥

अथान्यथा प्रतिपद्यार्थमित्येतद्व्याख्यातुमाह ॥

विरुद्धं चाभिसम्बन्धमुद्धार्यादिभिः कृतम् ।
वाक्ये समाप्ते वाक्यार्थमन्यथा प्रतिपद्यते ॥ २४८ ॥

उद्धार्यादिभिः पदैर्विरुद्धपदार्थप्रतिभासावसरे ऽभिसम्बन्धमवगच्छति। यथा उद्धारि भगिनि या त्वं शिरसानड्वाहं वहसि सा त्वं प्राचीनं कुम्भमभिधावन्तमद्राक्षीरित्यत्रोत्तरकालं वाक्यार्थप्रतिपत्त्यवसरे ऽन्यथैवार्थप्रतिपत्तिरिति न पदार्थः कश्चिदुपपन्नः ॥ १४८ ॥

एतदेवान्यथा प्रतिपादयितुमाह ॥

स्तुतिनिन्दाप्रधानेषु वाच्येष्वर्थो(१) न तादृशः ।
पदानां प्रविभागेन यादृशः परिकल्प्यते ॥ २४९ ॥

(१) वाक्येष्वर्थ इति २ पु० पाठः ।

स्तुतिप्रधानं वाक्यं किं चिद्भवति यत्र पदार्थों निन्दा "इन्दोर्लक्ष्म स्मरविजयिनः कण्ठमूलं मुरारिर्दिग्नागानां मदमलमषीभाञ्जि गण्डस्थलानि । अद्याप्युर्वीवलयतिलक श्यामलिम्नानुलिप्तान्युद्भासन्ते वद धवलितं किं यशोभिस्त्वदीयैः" । अत्र पदार्थप्रतिभासवेलायां निन्दावगम्यते, यस्माद्धे राजन्नलीकमेवोद्धतां कन्धरां वहसि तथा हि न सर्वव्यापि त्वदीयं यशः यदि हि तथा स्यात्तदा किमित्यद्यापि प्रसिद्धा एव शशलक्ष्मादयः पदार्थाः श्यामलतया भासन्ते, यशसो ह्यवदाततया तदीयस्य व्यापितायां तद्व्याप्तास्ते श्वेता भवेयुरेवेति पदार्थो ऽत्र निन्दा, स्तुतिस्तु वाक्यार्थः । तथा च राजन् सर्वमेव जगद्यशसा त्वदीयेन धवलितं केवलं स्वभावस्य दुस्त्यजत्वाद्यदि परं चत्वार्येव वस्तूनि त्रिजगति श्यामगुणयुक्तान्यन्यत्सर्वमेव त्वदीयेन यशसा व्याप्तमिति सर्वत्र त्रिलोक्यामपि प्रथितप्रतापस्त्वमिति वाक्यार्थः निन्दाप्रधाने स्तुतिः पदार्थे यथा "देहे लाजितबोधिसत्त्ववचसां किं विस्तरैस्तोयधे नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः । तृष्यत्पान्यजनोपकारघटनावैमुख्यलब्धाऽयशोभारप्रोद्वहने करोषि कृपया साहायकं यन्मरोः" । अत्र बोधिसत्त्वचरितस्यापि त्वदीयेनानेन तोयनिधे परार्थसम्पादनषाड्गुण्येन पराजय इति पदेभ्यः स्तुतिरवगम्यते, वाक्यार्थस्तु निरतिशयगर्हापात्रत्वमुदधेरवेत्यतइति । ततश्च पदपदार्थानां वास्तवत्वे कथमेतत्सङ्गच्छतइति ॥ २४६ ॥

अथात्र पदवादिमतमाशङ्कितुमाह ॥

अथासंसृष्ट एवार्थः पदेषु समवस्थितः ।
वाक्यार्थस्याभ्युपायो ऽसावेकस्य प्रतिपादने ॥ २५० ॥

पदेष्वर्थो ऽसंसृष्ट एव वाक्यार्थस्यैकस्य संसर्गलक्षणस्य प्रतिपादने ऽभ्युपायः स्थितः । पदार्थपूर्वको हि वाक्यार्थावसायो व्यवस्थित इति ॥ २५० ॥

एतन्निराकर्त्तुमाह ॥

पूर्वं पदेष्वसंसृष्टो यः क्रमादुपचीयते ।
छिन्नग्रथितकल्पत्वान्न विशिष्टतरं विदुः ॥ २५१ ॥

आदौ पदेष्वसंसृष्ट एव स्थितः क्रमाच्च संसृज्योपचीयते यो वाक्यार्थः स विशिष्टतरः सुदृढं विशिष्ट एव, कस्मात्, छिन्नग्रथितकल्पत्वादिति पूर्वं छिन्नः पश्चाद्ग्रथितो यस्तत्तुल्योसावित्यसंसृष्टपदार्थपूर्वको वाक्यार्थावसायो न युज्यतइति ॥ २५१ ॥

तदेवं प्रकृतिप्रत्यययोः परस्परमेकापायेनाप्यर्थावगतेः, उभयतोऽर्थस्य सम्प्रत्यये सत्येकस्मादेव प्रत्ययात् क्वचिदर्थप्रतिपत्तेः, प्रकृतिप्रत्ययार्थयोश्च साङ्कर्येण शास्त्रेष्वभिधानात्, वाक्यार्थस्य च पदार्थप्रतिपत्तिविलक्षणत्वात्, नञर्थानुपपत्तेः, सर्वत्रोपात्तत्यागप्रसक्ते,रित्युपपत्तिषट्केन वृत्तिषु विरुद्धार्थोपपादनादिना च पूर्वोक्तोपपत्तिचतुष्टयेन सत्यभूतानां पदार्थानामनुपपत्तेः, अखण्डपक्षे च प्रतिनिध्यादिचोद्यपञ्चकस्य तथा द्वन्द्वाश्रयेण चोद्यसप्तकस्य परिहरणान्निरवद्यमखण्डमेव स्फोटात्मकं वाक्यं प्रतिभैव च वाक्यार्थ इति स्थितम् ॥ २५१ ॥

इदानीमपोद्धारसमाश्रयेणापि पदार्थस्याभ्युपगतत्वान्मुख्यगौणविचारमप्यासूत्रयितुमाह ॥

एकमाहुरनेकार्थं शब्दमन्ये परीक्षकाः ।
निमित्तभेदादेकस्य सार्वार्थ्यं तस्य भिद्यते ॥ २५२ ॥

अत्रैकशब्ददर्शनमनेकशब्ददर्शनं चेति द्वौ पक्षौ । तत्रापि पदपदार्थयोः सत्यत्वं पदवादिमतेन, असत्यत्वं च वैयाकरणमतेनेति चत्वारः पक्षाः । प्रतिक्षिप्तमपि पक्षं व्यवहारार्थमङ्गीकरोत्येव टीकाकारः । यतः सर्वपार्षदमिदं हि व्याकरणं शास्त्रं, तत्र चायं स्थित

इत्यत्र पुनः पदपदार्थावङ्गीकरोति । तत्रैकशब्ददर्शने शब्दोपचारः प्रसिद्ध्यप्रसिद्धिनिमित्तकः । तत्रैव चार्थोपचारो द्विधा स्वरूपार्थत्वे-न बाह्यार्थत्वेन चेति त्रयः पक्षाः । एवमन्यत्र । तदेवमेतैस्त्रिभिः प-क्षैश्चत्वारोपि पक्षाभिहिता(१) द्वादश सम्पद्यन्तइति बोद्धव्यम् । त-त्रैकशब्ददर्शनसमाश्रयणेन तावद्गौणमुख्यविचारमेकमाहुरित्यादिना करोति सर्वेष्वप्यर्थेष्वेक एव गोशब्दो वाचकः । यद्येवं युगपदेव सर्वा-र्थप्रकाशनं कस्मान्न करोतीत्याह "निमित्तभेदादि"त्यादि । निमि-त्तभेदो वक्ष्यमाणस्तस्मात्सार्वार्थ्यं भिद्यतइति ॥ २५२ ॥

ततश्च किमित्यत आह(२) ॥

यौगपद्यमतिक्रम्य पर्याये व्यवतिष्ठते ॥ २५२ऽऽ ॥

निमित्तवशात् युगपत् सर्वार्थप्रकाशनं न करोतीत्यर्थः ॥ २५२ऽऽ ॥

निमित्तभेदमाह ॥

अर्थप्रकरणाभ्यां वा
योगाच्छब्दान्तरेण वा ॥ २५३ ॥

यौगपद्यमतिक्रम्य पर्याये व्यवतिष्ठतइत्यस्योदाहरणमाह ॥

यथा सास्नादिमान् पिण्डो
गोशब्देनाभिधीयते ।
तथा स एव गोशब्दो
वाहीकेऽपि व्यवस्थितः ॥ २५४ ॥

यद्येवं गौणमुख्यविभागः कुत इत्याह ॥

सर्वशक्तेस्तु तस्यैव शब्दस्यानेकधर्मणः ।
प्रसिद्धिभेदाद्गौणत्वं मुख्यत्वं चोपवर्ण्यते ॥ २५५ ॥

---

(१) भेदिता इति २ पु० पाठः ।
(२) किमित्याहेति २ पु० पाठः ।

सर्वशक्तिमत्त्वं चानेकधर्मण इत्यनेन व्याख्यातम् । प्रसिद्धिभेदात्प्रसिद्धिविशेषाद्गोजातीये सातिशया गोशब्दस्य प्रसिद्धिः । बाहीके त्वीषदिति । तस्मात्प्रसिद्ध्यप्रसिद्धिकृतो गौणमुख्यभावः ॥ २५५ ॥

तथैकदर्शनएव प्रक्रियां दर्शयति ॥

एको मन्त्रस्तथाध्यात्म-
मधिदैवमधिक्रतु ।
असङ्करेण सर्वार्थो
भिन्नशक्तिर्व्यवस्थितः ॥ २५६ ॥

तथा चैक एव मन्त्र आत्मन्यपि जपावसरे दैवेष्वपि क्रतौ यजनसमये ऽपि विनियुज्यते, भिन्नशक्तित्वादसांकर्येण प्रतिनियतार्थतया व्यवस्थितिं लभतइत्यर्थः ॥ २५६ ॥

एवं शब्दोपचारः प्रसिद्ध्यप्रसिद्धिनिमित्तकः प्रदर्शितः । एतस्मिंश्च शब्दोपचारे शब्दार्थसम्बन्धस्यानित्यत्वं स्यादित्याशङ्क्यार्थोपचारमाश्रित्याह ॥

गोत्वानुषङ्गो बाहीके निमित्तात्कैश्चिदिष्यते ।
अर्थमात्रं विपर्यस्तं शब्दः स्वार्थे व्यवस्थितः ॥ २५७॥

अर्थः शब्दस्य द्विविधः स्वरूपं बाह्यश्च(१) । तत्र निमित्ताज्जाड्यादेर्गोत्वं बाहीकेप्यनुषज्यते, शब्दस्तु गोत्वमेवाभिधत्तइति बाह्यार्थोपचारः । इयांस्तु विशेषः । गौरित्यत्र मुख्यमेव गोत्वं गौर्बाहीक इत्यत्र तूपचरितं तदेव वाच्यमिति ॥ २५७ ॥

अथ स्वरूपोपचारमाह ॥

तथा स्वरूपं शब्दानां

---

(१) बाह्यं चेति २ पु० पाठः ।

सर्वार्थेष्वनुषज्यते ।
अर्थमात्रं विपर्यस्तं
स्वरूपे तु स्थितिः स्थिरा ॥ २५८ ॥

शब्दानां स्वरूपमेव सर्वत्र वाच्यं तत्तु गोजातीये कदा चिदनुषज्यते कदाचिद्वाहीक इत्यनित्यत्वं नास्ति शब्दार्थसम्बन्धस्य प्रसिद्ध्यप्रसिद्धिकृतस्तु गौणमुख्यविभागो बोद्धव्यः ॥ २५८ ॥

अथानेकशब्ददर्शनमाश्रित्याह ॥

एकत्वं तु स्वरूपत्वाच्छब्दयोर्गौणमुख्ययोः ।
प्राहुरत्यन्तभेदेऽपि भेदमार्गानुदर्शिनः ॥२५९ ॥

भेदमार्गानुसारिणः शब्दभेदवादिनः । गौणमुख्यार्थाभिधायिनोर्गोशब्दयोर्भेदमेवाहुः । ते ह्यर्थभेदाच्छब्दभेदं मन्यते, यतः शब्दार्थयोरिहाध्यासलक्षणः सम्बन्धो व्यवस्थितः । एकत्र चेदध्यस्तस्तस्मिंस्तेनैवाभेदमापन्नः कथमन्येन सहाध्यासमुपेयादित्यर्थः । तदेवं शब्दभेद एवोपपन्नः । एतच्च भेदाभेदस्वभावं दर्शनद्वयं शब्दानां भाष्यकारेण वार्त्तिकव्याख्यानावसरे दर्शितं तत्र ह्युक्तं 'तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वात्' अत्रोत्तरम् 'एकत्वादकारस्य सिद्ध'मिति । यद्येवं अनुबन्धसङ्करस्तु, एकाजनेकाज्ग्रहणेषु चानुपपत्तिरि,त्यादीनि चोद्यानि प्राप्नुवन्ति तत्रैवैतानि परिहृतानि, विषयेण तु नानालिङ्गकरणात्सिद्धम्, एकाजनेकाज्ग्रहणेषु चावृत्तिसंख्यानादि,त्येवमेकशब्ददर्शनं स्थापितम्, अथानेकदर्शनमाश्रित्य तत्रैवोक्तम्, आन्यभाव्यं तु कालशब्दव्यवायात्, युगपच्च देशपृथक्त्वदर्शना,दित्येव भेदाभेदौ शब्देषु व्यवस्थापितौ तद्व्याख्यानायैव च टीकाकारः स्वतन्त्रपक्षद्वयदर्शनं करोतीति बोद्धव्यम् ॥ २५९ ॥

अथैतदेव शब्दभेददर्शनं प्रसङ्गाद्वैदिकेष्वपि शब्देषु योजयितु-

माह ॥

सामिधेन्यन्तरं चैवमावृत्तावनुषज्यते ॥ २५९ऽऽ ॥

त्रयोदशैकादश वा समिन्धनार्था ऋचः सामिधेन्यः । तत्र त्रिः प्रथमामन्वाह त्रिरुत्तमामन्वाह एवं चावृत्त्या सप्तदश पञ्चदश वा सामिधेन्यो भवन्तीति स्थितं, तत्रावृत्तं सामिधेन्यन्तरमेव विभिन्नस्वरूपमनुषक्तं बोद्धव्यं, न तत्त्वेकैवासौ पुनरावृत्तेति शब्दभेदवादिनः ॥ २५९ऽऽ ॥

एवं च मन्त्राणामपि भेदमाहुरिति प्रदर्शयितुमाह ॥

मन्त्राश्च विनियोगेन लभन्ते भेदमूहवत् ॥ २६० ॥

विनियोगेनाभ्युपयोगादिनोपलक्षिता अपि मन्त्रा भिन्ना एव बोद्धव्याः । यथा आह देवीरापः शुद्धा इत्यस्मादन्य एव स्तुत्यर्थवादोऽभ्यूह्यते देव आज्यं शुद्धमित्यादि । एवमूहमन्त्राणामन्यत्वं तथैव विनियुक्तानां मन्त्राणामन्यत्वमेव ॥ २६० ॥

अन्यत्वे च तेषां किं वेदत्वं स्यान्न वेत्याशङ्क्य वेदत्वमेव तेषां बोद्धव्यमित्याह ॥

तान्याम्नायान्तराण्येव पठ्यते कश्चिदेव तु ॥ २६०ऽऽ ॥

मन्त्राणां सर्वेषां वेदत्वमेव वेदे तु कश्चिदेव मन्त्रः पठ्यते न चैतावता तेषामेव वेदत्वं अन्यथा वेदेऽनर्थका एव सर्वे पठिता इत्याह ॥

अनर्थकानां पाठो वा शेषस्त्वन्यः प्रतीयते ॥ २६१ ॥

उपलक्षणभूता अनधिकारा एव वेदे मन्त्राः (१) पठिता, स्तैस्तु विनियोगावसरे प्रतीयमानानामन्येषामेव वेदत्वं बोद्धव्यम् ॥ २६१ ॥

तदेवमर्थभेदाच्छब्दस्य भेदे मन्त्राणां भेद एव, पठितानां (२) चोपलक्षणार्थतेति प्रदर्शितम् । अथ स्वरूपार्थमेव पाठः सर्वेषां वैदि-

---

(१) वेदमन्त्रा इति २ पु० पाठः ।

(२) अपठितानामिति २ पु० पाठः ।

कानां कैश्चिदुच्यतइत्याह ॥

शब्दस्वरूपमर्थस्तु

पाठो ऽन्यै(१)रुपवर्ण्यते ॥ २६१ऽऽ ॥

ततश्च सर्वेषां स्वरूपवतां भेद एवेत्याह ॥

अत्यन्तभेदः सर्वेषां

ननु पठ्यमानानामेव स्वरूपार्थत्वात्स्वरूपवत्ता युज्यते, इतरेषां तु यागादौ विनियुक्तानां कथं स्वरूपवत्त्वमेव स्यादित्याह ॥

तत्सम्बन्धात्तु तद्वताम् ॥ १६२ ॥

तत्रापि प्रवृत्तिनिमित्तस्य स्वरूपस्यैव विद्यमानत्वात्तद्वत्त्वमेव बोद्धव्यम् ॥ २६२ ॥

तस्मान्मन्त्रेषु संस्कारादिविनियोगभेदात्पाठोपलक्षितानां चाभिन्नानामेव प्रतीतिः स्वरूपार्थत्वाद्वा, भिन्नानामेषां भेद एव मन्तव्य इत्युपसंहर्त्तुमाह ॥

अन्या संस्कारसावित्री कर्म्मण्यन्या प्रयुज्यते ।

अन्या जपप्रबन्धेषु सा त्वेकैव प्रतीयते ॥ २६३ ॥

सारूप्यात्त्वेकत्वव्यवहार(२)स्तत्र बोद्धव्यः ॥ २६३ ॥

तदेवमनेकशब्ददर्शने ऽर्थभेदाच्छब्दभेदे गौणो ऽर्थो ऽन्यः मुख्योर्थश्चान्य एव, किं तु सारूप्यादभेदे मुख्यार्थस्य प्रसिद्धत्वात्तद्वाचकउपचर्यतएवेति शब्दोपचार एव तत्र कल्पयितुं शक्यः । न त्वेकशब्ददर्शनद्दव शब्दसम्बन्धस्यानित्यत्वादुपचारो ऽर्थस्याश्रीयते । अत एवाभिप्रायवता टीकाकृता तत्र तत्र शब्दोपचारार्थोपचारौ व्याख्यातौ ॥ २६३ ॥

---

(१) पाठेऽन्यैरिति २ पु० पाठः ।

(२) एकत्वं व्यवहारइति २ पु० पाठः स चायुक्तः ।

तत्सम्बन्धात्तु तद्वतामित्यत्र स्वरूपेण प्रवृत्तिनिमित्तेन सम्बन्धः प्रतिपादितः । तदेव च सर्वेषां शब्दानां प्रवृत्तिनिमित्तं बोद्धव्यमिति विस्पष्टयितुमाह ॥

अर्थस्वरूपे शब्दानां

स्वरूपाद्वृत्तिरिष्यते ॥ २६३ऽऽ ॥

अर्थस्वरूपे ऽर्थवस्तुनीति यावत् । तत्र सर्वेषां स्वरूपादेव निमित्तात्प्रवृत्तिर्बोद्धव्या ॥ २६३ऽऽ ॥

न केवलं पदानां सर्वत्र स्वरूपमेव प्रवृत्तिनिमित्तं, यावद्वाक्यरूपस्यापि शब्दस्य वाक्यार्थे वर्त्तमानस्य वृत्तिरन्यानपेक्षया स्वरूपेणैव बोद्धव्येति प्रसङ्गेन प्रतिपादयितुमाह ॥

वाक्यरूपस्य वाक्यार्थे

वृत्तिरन्यानपेक्षया ॥ २६४ ॥

इदानीमेकशब्ददर्शने गौणमुख्यविभाग इत्युपसंहर(१)न्नाह ॥

अनेकार्थत्वमेकस्य यैः शब्दस्यानुगम्यते ।

सिद्ध्यसिद्धिकृता तेषां गौणमुख्यप्रकल्पना ॥ २६५ ॥

सिद्ध्यसिद्धिभ्यां प्रसिद्ध्यप्रसिद्धिभ्यां तत्र गौणमुख्यविभागो बोद्धव्यः । अनेनैकशब्ददर्शनेपि (२) सादृश्यादभेदे पुनरपि प्रसिद्ध्यप्रसिद्धिभ्यामेव गौणमुख्यविभाग इत्युक्तमेव ॥ २६५ ॥

अथोभयत्रापि गौणमुख्यविभागे निमित्तान्तरं दर्शयितु(३)माह ॥

अर्थप्रकरणापेक्षो यो वा शब्दान्तरैः सह ।

युक्तः प्रत्याययत्यर्थं तं गौणमपरे विदुः ॥ २६६ ॥

---

(१) उपसंहरन्नित्येवेतिपदराहितः २ पु० पाठः ।

(२) अनेकशब्ददर्शनेपीति २ पु० पाठः ।

(३) निमित्तान्तरमुपदर्शयितुमिति २ पु० पाठः ।

B...NARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

...NḌITS OF THE BENARES SANSKṚIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH M. A.,

...TE DIRECTOR OF PUBLIC INSTRUCTION, N. W. P. & OUDH,

& G. THIBAUT PH. DR.,

PRINCIPAL, BENARES COLLEGE.

No. 24.

श्रीविश्वनाथो विजयते ।

वाक्यपदीयं

साङ्गवैयाकरणसिद्धान्तनिरूपणं श्रीभर्तृहरिमहावैयाकरणविरचितं

श्रीपुण्यराजकृतप्रकाशाख्यटीकायुतम् ।

VÁKYAPADÍYA

...TREATISE ON THE PHILOSOPHY OF SANSKṚIT GRAMMAR BY BHARTṚIHARI,

WITH A COMMENTARY BY PUNYARÁJA.

EDITED BY PAṆḌIT GAṄGÁDHARA ŚÁSTRÍ MÁNAVALLÍ,

PROFESSOR OF LITERATURE, SANSKRIT COLLEGE, BENARES.

Fasciculus III.

BENARES:

...UBLISHED BY MESSRS. BRAJ B. DAS & CO.

PRINTED AT THE BENARES PRINTING PRESS.

1887.

अथ प्रकरणशब्दान्तरसंनिधानानि गौणमुख्यभावमुभयञ्चापि प्रयोजयन्तीत्युच्यते ॥ २६६ ॥

एतदेव संग्रहकारोक्तश्लोकप्रदर्शनेन संवादयितुमाह ॥

शुद्धस्योच्चारणे स्वार्थः प्रसिद्धो यस्य गम्यते ।
स मुख्य इति विज्ञेयो रूपमात्रनिबन्धनः ॥ २६७ ॥

एतन्मुख्यार्थशब्दलक्षणम् ॥ २६७ ॥

गौणार्थशब्दस्वरूपमप्याह ॥

यस्त्वन्यस्य प्रयोगेण
यत्नादिव नियुज्यते ।
तमप्रसिद्धं मन्यन्ते
गौणार्थाभिनिवेशिनम् ॥ २६८ ॥

यत्नादिवेति । अर्थप्रकरणादेरित्यर्थः ॥ २६८ ॥

अथ प्रकारान्तरेण गौणमुख्यविभागमाह ॥

स्वार्थे प्रवर्त्तमानस्य
यस्यार्थं यो ऽवलम्बते ।
निमित्तं तत्र मुख्यं स्याद्
निमित्ती गौण इष्यते ॥ २६९ ॥

यो वाहीके प्रवर्त्तमानः स्वार्थे सास्नादिमति वर्त्तमानस्य गोशब्दस्य सम्बन्धिनमर्थं निमित्तत्वेनावलम्बते तत्र विषये मुख्यो ऽर्थो निमित्तं स्यात् । गौणस्तु निमित्तीत्युच्यते । एतदुक्तं भवति । यत्रा ऽस्खलद्गतिः शब्दस्तत्र मुख्यो ऽर्थः स्खलद्गतित्वे तु गौणार्थतेति बोद्धव्यम् । नन्वेतेनार्थोपचार उक्तः स चैकशब्ददर्शने स्थितः, तत्र यस्यार्थं योवल-

ख्यातइति शब्दभेद उक्तः स्यात् (१)। असदेतत्। अत्रापि शक्तिभेदाश्रयणे (२) कल्पितस्य भेदस्योपपत्तेर्युज्यतएतदिति न कश्चिद्दोषः ॥ २६९ ॥

अथार्थप्रकरणादेः शब्दस्य गौणमुख्यविभागहेतुत्वे ऽतिप्रसङ्गमाह ॥

पुराराादिति भिन्ने ऽर्थे यौ वर्त्तेते विरोधिनि ।
अर्थप्रकरणापेक्षं तयोरप्यवधारणम् ॥ २७० ॥

पुराराच्छब्दौ भाविभूतदूरान्तिकलक्षणेषु यथायोगं परस्परविरुद्धेष्वर्थेषु वर्तेते। तत्रैतयोरर्थ[प्रकरणादिनार्थनिर्णयः। ततश्चात्रापि गौणमुख्यभागः स्या,न्न चैतदिष्टम्, अनयोरुभयत्रापि मुख्यार्थ] (३) त्वमिष्यतइत्यतो ऽर्थप्रकरणादीन् केवलान् गौणमुख्यभावो न प्रयोजयतीति बोद्धव्यम् ॥ २७० ॥

इदानीमखण्डपक्षमाश्रित्य गौणमुख्यतामाह ॥

वाक्यस्यार्थात्पदार्थानामपोद्धारे प्रकल्पिते ।
शब्दान्तरेण सम्बन्धः कस्यैकस्योपपद्यते ॥ २७१ ॥

पूर्वमेकशब्ददर्शने ऽनेकशब्ददर्शने वा पदपदार्थयोः सत्यत्वमभ्युपगम्योक्तं, तत्र त्वसत्यौ पदपदार्थौ बोद्धव्या,वतश्चाखण्डमेव वाक्यं वाक्यार्थस्य प्रत्यायकमिति पदपदार्थासद्भावे (४) कीदृशो गौणमुख्यभावः किल, गौर्वाहीक इत्यत्र पदपदार्थाभ्युपगमे विरुद्धसामानाधिकरण्यान्यथानुपपत्त्या गोपदस्योपचरितार्थत्वमुच्यते। यदा तु गौर्वाहीक इत्यनेनाखण्डेनैव गोगतधर्मावच्छिन्नो वाहीकलक्षणोर्थो ऽख-

(१) असदेतत्त्वमिति २ पु० पाठः।
(२) शक्तिभेदाश्रयेणेति २ पु० पाठः।
(३) [ ] एतन्मध्यस्थं २ पु० नास्ति।
(४) पदपदार्थसद्भावइति २ पु० पाठः।

ण्ड एव प्रतिपाद्यते तदा पदपदार्थानामसत्यत्वात् कस्यैकस्याविद्यमानस्यैव तथाभूतेनैवेतरेण सम्बन्ध इति कुतस्त्यो गौणविभागः। यद्येवमेतस्मिन्पक्षे कथं गौणमुख्यविभागः स्यात् । उच्यते । अपोद्धारसमाश्रयणेन पदपदार्थविभाग(१)मुपकल्प्य प्रसिद्ध्यप्रसिद्धिनिमित्तको गौणमुख्यविभागो ऽभ्युपगन्तव्य इत्यभिप्रायः ॥ २७१ ॥

ननु स्वतन्त्रं पदं पदान्तरमन्तरेण प्रयुज्यतएवातस्तन्न वास्तवः पदपदार्थप्रविभाग इत्याह ॥

यच्चाप्येकं पदं दृष्टं चरितास्तिक्रियं क्व चित् ।
तद्वाक्यान्तरमेवाहुर्न तदन्येन युज्यते ॥ २७२ ॥

एकं पदं चरित(२)क्रियत्वाद्वाक्यमेवाखण्डमिति प्रतिपादयिष्यति । अतस्तदन्येन नैव युज्यतइति बोद्धव्यम् ॥ २७२ ॥

एतदेव स्फुटीकृत्य प्रतिपादयितुमाह ॥

यच्च को ऽयमिति प्रश्ने गौरश्व इति चोच्यते(३) ।
प्रश्न एव क्रिया तत्र प्रक्रान्ता दर्शनादिका ॥ २७३ ॥

को ऽयमिति प्रश्ने दृश्यते भवतीति वा कापि क्रिया गर्भीकृता सैवोत्तरेपि गर्भीकृतेति तदपि चरितक्रियमेकं वाक्यमेवेति मन्तव्यम् ॥ २७३ ॥

इदानीं न्यूनाधिकभाव एव गौणमुख्यविभागकारणं कैश्चिदभ्युपगतमित्याशङ्क्य निराकर्त्तुमाह ॥

नैवाधिकत्वं धर्माणां
न्यूनता वा प्रयोजिका ॥ २७३ऽऽ ॥

---

(१) पदपदार्थभागमिति २ पु० पाठः ।
(२) चरतीत्ययुक्तो २ पु० पाठः ।
(३) चोच्यतइति २ पु० पाठः ।

कस्मादित्याह ॥

आधिक्यमपि मन्यन्ते
प्रसिद्धेर्न्यूनतां क्व चित् ॥ २७४ ॥

आपेक्षिकत्वादस्याव्यवस्थितत्वमेवेति न तेन गौणमुख्यव्यवहारः कल्पयितुं शक्यः ॥ २७४ ॥

सादृश्यमिदानीं निमित्तत्वेनाह ॥

जातिशब्दो ऽन्तरेणापि जातिं यत्र प्रयुज्यते ।
सम्बन्धिसदृशाद्धर्मात्तं गौणमपरे विदुः ॥ २७५ ॥

गोशब्दो गोत्वजातिं विनापि स्वव्यक्तिगतगुणसादृश्याद्वाहीके प्रयुज्यतइति सादृश्यं गौणमुख्यभावे निमित्तम् ॥ २७५ ॥

अथ विपर्यासमेव निमित्तत्वेनाह ॥

विपर्यासादिवार्थस्य
यत्रार्थान्तरतामिव ।
मन्यन्ते स गवादिस्तु
गौण इत्युच्यते क्व चित् ॥ २७६ ॥

अर्थस्य वाहीकलक्षणस्यार्थान्तरतां गोरूपतां विपर्यासादिव यत्र मन्यन्ते तत्र तस्मिंस्तद्वाचको गोशब्दः प्रवृत्तो गौण इति क्व चिन्मतं, विपर्यासश्चाध्यवसायेन भवत्याध्यारोपेण च । रजतमिदमित्यत्र विपर्ययाध्यवसाय एव । इह त्वध्यारोप्यगोगतान् गुणान् वाहीके ऽध्यवस्यतीत्यध्यारोपिततद्भावो ऽयं विपर्यासः(१) । अत एव विपर्यासादिवेत्युक्तं, तस्मादध्यवसिततद्भावनिमित्तप्रयुक्तो नास्ति गौणमुख्यव्यवहार इति ॥ २७६ ॥

---

(१) विपर्यय इति २ पु० पाठः ।

अथ रूपशक्तिनिमित्तको गौणमुख्यव्यवहार इति पक्षान्तरं दृष्टान्तप्रदर्शनपूर्वकं दर्शयितुमाह ॥

नियताः साधनत्वेन रूपशक्तिसमन्विताः ।
यथा कर्मसु गम्यन्ते सीरासिमुसलादयः ॥ २७७ ॥

खड्गमानयेत्युक्ते संनद्धानां संग्रामकथा वर्त्ततइति रूपशक्तिमाहात्म्यादभिधीयते । एवं सीरादिषु ॥ २७७ ॥

क्रियान्तरे लताच्छेदादौ नैतेषां शक्तयो भवन्तीति वक्तुं पार्यते । ततश्च रूपेण नियतएव कर्मणि सामर्थ्यमेषां व्यवसीयतइत्याह ॥

क्रियान्तरेण चैतेषां
भवन्ति न हि शक्तयः ।
रूपादेव तु तादर्थ्यं
निधनेन (१) प्रतीयते ॥ २७८ ॥

शब्दे योजयितुमाह ॥

तथैव रूपशक्तिभ्या-
मुत्पत्त्या समवस्थितः ।
शब्दो नियततादर्थ्यः
शक्त्याऽन्यत्र प्रयुज्यते ॥ २७९ ॥

उत्पत्त्या स्वभाविनैव । यथोच्यते "औत्पत्तिकः शब्दस्यार्थेन सम्बन्धः" सहज एवेति गम्यते । अनेकशक्तिसद्भावाच्चान्यत्रापि प्रयुज्यते ॥ २७९ ॥

ततश्च गौणमुख्यभावः कथमत्र ज्ञायेतेत्याह ॥

श्रुतिमात्रेण यत्रास्य तादर्थ्यमवसीयते ।

---

(१) नियमेनेति २ पु० पाठः ।

मुख्यं तमर्थं मन्यन्ते गौणं यत्नोपपादितम् ॥ २८० ॥

"गौणं यत्नोपापादितमि"ति तदभिधानशक्तिसद्भावेऽप्यप्रसिद्धत्वा-द्यत्नेन प्रकरणादिना गौणत्वाध्यवसाय इत्यर्थः । तदेवमर्थप्रकरणश-ब्दान्तरसन्निधानमात्रं प्रसिद्ध्यप्रसिद्धिसहितं चार्थप्रकरणादिकम-थानादिसमुच्चयेन अङ्गाङ्गिभावेन चेति द्वौ पक्षौ । न्यूनाधिकभावः सादृश्यं विपर्यासः रूपशक्तिः इति सप्त पक्षाः । अत्रार्थप्रकरणमात्रं पुरारादित्यादिभिरतिप्रसङ्गादनिमित्तमेव । न्यूनाधिकभावस्याव्यव-स्थितेरनिमित्तत्वमेव । सादृश्यस्यापि काश्यपप्रतिकृतिः काश्यप इ-त्यादौ निमित्तयुक्तेऽपि गौणत्वासद्भावादनिमित्ततैव । पारिशेष्यात्प्र-सिद्ध्यप्रसिद्धिसहिताः प्रकरणादयः प्रकरणादिसहिते वा प्रसिद्ध्य-प्रसिद्धी विपर्यासो ऽध्यारोपलक्षणो रूपशक्तिरिति चत्वारः प्रकाराः गौणमुख्ययोर्निमित्तत्वेन परिगृहीताः । इत्येतैर्निमित्तैः शब्दोपचारो ऽर्थोपचारो वा । स च द्विविधः वाक्यार्थोपचारः स्वरूपोपचारो वे-त्येवं गौणमुख्यविभागो मन्तव्यः ॥ २८० ॥

इदानीमेतदेव लक्ष्ये योजयितुमाह ॥

गोयुष्मन्महतां च्व्यर्थे स्वार्थादर्थान्तरे स्थितौ ।
अर्थान्तरस्य तद्भावस्तत्र मुख्येऽपि दृश्यते ॥ २८१ ॥

गवादीनां शब्दानां स्वार्थादर्थान्तरे ऽगवाद्यलक्षणे आश्रितपूर्वाव-स्थोपचरितोत्तरावस्थात्मके स्थितौ प्रवृत्तौ सत्यामर्थान्तरस्य वाही-कादेस्तद्भावो गवादिरूपतापत्तिलक्षणो यदा तदा गौणोऽर्थस्तेषां दृ-श्यतइति बोद्धव्यम् । न केवलं गौणोऽर्थस्तथा, यावन्मुख्योऽपि दृश्यतइति बोद्धव्यम्, तत्रागौर्गौः समपद्यत, गो ऽभव,दत्वं त्वं सम्पद्यते, त्वद्भव-तीत्यत्रागवि अयुष्मदि च गोरूपता युष्मद्रूपता चोत्तरावस्थाविद्यमा-नैवोपचर्यतइति गौणार्थता । अमहान्महा,महाक्षः मुक्षः सम्पद्यते,

मह्वभूतश्चन्द्रमाः, शुक्ली भवति पट, इत्यत्र तूत्तरावस्था वस्तुसत्यैवेति मुख्य एवार्थे महच्छुक्लीशब्दौ स्थिताविति नास्ति गौणत्वम् । अतश्च गोभवदित्यत्र गौणार्थत्वादोदन्तस्य निपातत्वे ऽप्योदिति प्रगृह्यसंज्ञाया नास्त्येव प्राप्तिः । तथा त्वद्भवतीत्यत्रोपचरितस्य युष्मदर्थस्य प्रतीतेर्गौणार्थत्वादेव मध्यमपुरुषस्याप्यभावः । यतो गौणमुख्ययोर्मुख्ये सम्प्रत्यय इति भाष्ये स्थापितम् । वार्त्तिककारस्तु गो ऽभवदित्यत्र च्व्यर्थवृत्तित्वान्निपातस्य गोशब्दस्य च्व्यर्थलक्षणं मुख्यमेव सर्वमर्थमवगच्छन् गौणमुख्यभावासम्भवमेवाभिमन्यमानः प्रगृह्यसंज्ञानिवृत्तये 'ओतश्च्विप्रतिषेध' इति यत्नमारब्धवान् । भाष्यकारस्त्वभिप्रायानभिज्ञ एवान्तरङ्गत्वाद्गौणमुख्ययोर्मुख्ये सम्प्रत्यय इत्येवमत्र प्रगृह्यसंज्ञा अतो ऽन्तरङ्गस्य कार्यस्य प्राप्तिरिति स्थितम् । ननु गौणार्थत्वे शब्दानां कार्याप्रवृत्तौ गौर्वाहीकस्तिष्ठति गां बाहीकमानयेत्यत्र वृद्ध्यात्वे प्राप्नुतः । अत्र ह्युपचरितार्थो गोशब्द इति । उच्यते । द्विविधं हि शब्दानां कार्यमस्ति प्रातिपदिककार्यं पदकार्यं च । तत्र पदकार्येषु गौणमुख्यन्यायः न प्रातिपदिककार्येषु । पदस्य विरुद्धपदसामानाधिकरण्यान्यथानुपपत्त्या गौणार्थताप्रतिपादकस्य प्रयोगानर्हस्य पदान्तरेण सामानाधिकरण्यासम्भवाद्गौणार्थता नैव निश्चेतुं शक्यते प्रातिपदिककार्यं च वृद्ध्यात्वे इति तत्प्रवर्त्तत एव । तदुक्तम् । 'अर्थाश्रयएतदेवं भवति तद्धि शब्दाश्रये च वृद्ध्यात्वे' इति ॥ २८१ ॥

तदेवं गो ऽभवत् त्वद्भवतीति चात्र गौणार्थत्वे सिद्ध्यतीष्टं मह्वभूतश्चन्द्रमा इत्यत्र तु चन्द्रमसः पौर्णमास्यां महत्त्वस्य सद्भावादनुपचरितत्वमिति महच्छब्दस्यान्महात इत्यादि न प्राप्नोत्येवात्वमित्याशङ्क्याचापि गौणार्थतां प्रतिपादयितुमाह ॥

महत्त्वं शुक्लभावं च

प्रकृतिः प्रतिपद्यते ।
भेदेनापेक्षिता सा तु
गौणत्वस्य प्रयोजिका ॥ २८२ ॥

महद्भूतश्चन्द्रमाः शुक्ली भवति पट इत्यत्रापि प्रकृतिर्महत्त्वं शुक्लभवनं च भेदेनाश्रितपूर्वावस्थोपचारितोत्तरावस्थतयैव प्रतिपद्यते, ततश्च यद्यपि वस्तुवृत्त्या एक एवार्थः, तथापि वक्त्रापेक्षिता आश्रिता सती गौणत्वं प्रयोजयति । एतदुक्तं भवति । यद्यप्यत्र महत्त्वं शुक्लभावश्च तथैव विद्यते तथाप्यत्र शब्दवृत्त्योन्मज्जद्रूपा प्रकृत्यवस्थैवोच्यत इति तदाश्रयेणोपचरितत्वान्महत्त्वस्य न भवत्यत्र महच्छब्दस्यात्वं शुक्ली भवति पट इत्यस्य कार्यं न किं चिदस्ति अर्थप्रदर्शनाय केवलमत्र प्रदर्श्यते ॥ २८२ ॥

अथाग्निसोमौ माणवकावित्यत्र संज्ञाशब्दत्वान्मुख्यार्थत्वे "ऽग्नेः स्तुत्स्तोमसोमाः" इति षत्वं कस्मान्न क्रियतइत्याह ॥

अग्निसोमादयः शब्दा ये स्वरूपनिबन्धनाः ।
संज्ञिभिः संप्रयुज्यन्ते प्रसिद्धेस्तेषु गौणता ॥ २८३ ॥

इहाग्निसोमादयः शब्दा देवतावाचकाः स्वरूपनिमित्तकाश्च संज्ञाभूतार्थवृत्तयश्चेति त्रिविधाः सम्भवन्ति । तत्र देवतायां स्वरूपनिमित्तेषु संज्ञासु चैते मुख्यार्था एव तत्र संज्ञाया गौणतेति देवतायामग्निसोमादयः प्ररूढिमुपगता माणवके चाप्रसिद्धा इत्येवमप्रसिद्ध्या तेषां गौणार्थत्वमुच्यते न त्वध्यारोपेणेति बोद्धव्यम् । अतश्च षत्वाप्रवृत्तिरेव ॥ २८३ ॥

यत्र त्वतस्मिंस्तदध्यारोपेणाग्निसोमादयः प्रवर्त्यन्ते तत्र स्फुटैव गौणार्थता तेषामित्याह ॥

अग्निदत्तस्तु यो ऽग्निः स्यात्तत्र स्वार्थोपसर्जनः ।

शब्दो दत्तार्थवृत्तित्वाद्गौणत्वं प्रतिपद्यते ॥ २८४ ॥

स्वार्थं देवतालक्षणमुपसर्जनीकृत्यार्थान्तरमिव तदध्यारोपेण यत्राभिदधति तत्र गौणार्थत्वं स्फुटमेवेति शब्दाः प्रतिपद्यन्तइति बोद्धव्यम् ॥ २८४ ॥

अथ हरिश्चन्द्रो माणवक इत्यत्र सुट्समर्थनार्थं प्रस्तोतुमाह ॥

निमित्तभेदात्प्रक्रान्ते
शब्दव्युत्पत्तिकर्मणि ।
हरिश्चन्द्रादिषु सुटो
भावाभावौ व्यवस्थितौ ॥ २८५ ॥

हरिश्चन्द्रादिषु सुटोभावाभावौ नियताविव, यस्माच्छब्दव्युत्पत्तिक्रियायां तत्र निमित्तभेदः समाश्रीयते ऋषावनादिभूते प्रसिद्धो हरिश्चन्द्रः साधुः हरिश्चन्द्रो यस्येत्येतस्मिंस्तु व्युत्पत्तिकर्मण्यभाव एव स्फुट इत्यसांकर्यमेव ॥ २८५ ॥

अथ यदा पुरातनहरिश्चन्द्रगतगुणसंदर्शनेन साक्षाद्धरिश्चन्द्रो ऽयं माणवक इत्युच्यते तदा किं गौणार्थत्वान्न भवितव्यमेव सुटेत्यसाङ्कर्यं दर्शयितुमाह ॥

ऋष्यादौ प्राप्तसंस्कारो यः शब्दो ऽन्येन युज्यते ।
तत्रान्तरङ्गः संस्कारो बाह्ये ऽर्थे न निवर्त्तते ॥ २८६ ॥

हरिश्चन्द्रशब्दस्तावदृषावेव संस्कृतः उत्तरकालं प्राप्तसंस्कारः (१) सन्नसौ यदा हरिश्चन्द्रगुणसधर्मण्यन्यत्र प्रयुज्यते तदान्तरङ्गः संस्कारो वाक्यार्थवेलायामर्थान्तरसंबन्धावसरे न निवर्त्ततइति वैयाकरणसमयः । यथा करिष्यति श्वः, वर्षेण गमिष्यती,त्यत्र श्वःशब्दसंनिधानाद्भविष्यदनद्यतनलक्षणकालप्रादुर्भावे भविष्यत्सामान्यसमाश्रयणेन वि-

(१) उत्तरकालमप्राप्तसंस्कार इति २ पु० पाठः ।

हितस्य लटो न निवृत्तिः शक्या कर्त्तुमेवमत्रापि हरिश्चन्द्रो माणवक इति गौणार्थत्वेपि सुट्सिद्धेरेवेति ॥ २८६ ॥

इदानीं न्यायदर्शनच्छायया बौद्ध एव शब्दार्थो नास्ति कश्चिच्छब्देषु गौणमुख्यविभाग इत्याशङ्क्याह ॥

अत्यन्तविपरीतो ऽपि यदा योऽर्थो ऽवधार्यते ।
यथासंप्रत्ययं शब्दस्तत्र मुख्यः प्रवर्त्तते ॥ २८७ ॥

इह वक्तुरिच्छया विषयीकृते ऽर्थे कश्चिद्यावच्छब्दः प्रवर्त्तते तावद्यदा यथा विपर्ययेण चार्थावधारणं क्रियते तदा (१) यथासंप्रत्ययं प्रत्ययानुसारेणैव शब्दः प्रवर्तमानः सर्वत्र मुख्यतयैव प्रवृत्त इति वाक्ये न शब्देषु गौणमुख्यविभागः कश्चित् ॥ २८७ ॥

इदानीमत्रापि गौणमुख्यविभागं समर्थयितुं सत्यासत्यविभागं तावदुपक्रमितुमाह ॥

यद्यपि प्रत्ययाधीनमर्थतत्त्वावधारणम् ।
न सर्वः प्रत्ययस्तस्मिन्नसिद्ध इव जायते ॥ २८८ ॥
दर्शनं सलिले तुल्यं मृगतृष्णादिदर्शनैः ।
तुल्यत्वे दर्शनादीनां न जलं मृगतृष्णिका ॥ २८९ ॥
यदसाधारणं कार्यं प्रसिद्धं रज्जुसर्पयोः ।
तेन भेदः परिच्छेद्यस्तयोस्तुल्येपि दर्शने ॥ २९० ॥

अथ दर्शनस्य विषयासत्यत्वेनाप्यसत्यत्वमुपदर्शयितुमाह ॥

प्रसिद्धार्थविपर्यासनिमित्तं यच्च दृश्यते ।
यस्तस्माल्लच्यते भेदस्तमसत्यं प्रचक्षते ॥ २९१ ॥

---

(१) तथेति २ पु० पाठः ।

यच्च नैमित्तिकदर्शनं (१) प्रसिद्धार्थविपर्यासनिमित्तमिति प्रसिद्धः सत्यरूपोर्थः । तस्य विपरीतो यो मिथ्यात्वलक्षणस्तस्य निमित्तं कारणमिन्द्रियविषयगतो दोष इति, यश्च तस्माद्भेदो विशेषो लक्ष्यते द्विचन्द्रादिः तं तथाभूतं दर्शनविषयं प्रचक्षते ॥ २९१ ॥

पुनरपि दर्शनभेदमाह ॥

यच्च निम्नोन्नते चित्रे सरूपं पर्वतादिभिः ।
न तत्र प्रतिघातादि कार्यं तद्वत्प्रवर्त्तते ॥ २९२ ॥

पर्वतादिभिः सरूपं (२) निम्नोन्नतचित्रभित्तौ दृश्यते न च तावता तत्र प्रतिघातादिकार्यभेदः ज्ञानान्तरेण तत्र भेदावगतिरेवेत्यर्थः ॥ २९२ ॥

एतदेव दृष्टान्तान्तरैः प्रतिपादयितुमाह ॥

स्पर्शप्रबन्धो हस्तेन
यथा चक्रस्य संततः ।
न तथा ऽलातचक्रस्य
विच्छिन्नं स्पृश्यते हि तत् ॥ २९३ ॥

वप्रप्राकारतल्पैश्च स्पर्शनावरणे यथा ।
नगरेषु न ते तद्वद्गन्धर्वनगरेष्वपि ॥ २९४ ॥

व्यगपश्वादिभिर्य्यावा-
न्मुख्यैरर्थः प्रसाध्यते ।
तावान्न मृन्मये ऽप्यस्ति
तस्मात्ते विषयः कनः ॥ २९५ ॥

---

(१) दर्शनेति समस्तः २ पु० पाठः ।

(२) सरूपेति समस्तः २ पु० पाठः ।

महानाध्रियते देशः प्रसिद्धैः पर्वतादिभिः ।

अल्पदेशान्तरावस्थं प्रतिबिम्बं तु दृश्यते ॥ २६६ ॥

मरणादिनिमित्तं च यथा मुख्या विषादयः ।

न ते स्वप्नादिषु स्वस्य तद्वदर्थस्य साधकाः ॥ २६७ ॥

अत्र हस्तिकान्विक्रीणीते, अश्वकान् विक्रीणीते, इत्यादौ कार्यभेदादेव भेदमवसाय कन्प्रत्ययान्तान् प्रतिकृतिवाचकानीरितवानिति मृगपश्वादिभिरित्यस्य श्लोकस्यार्थः । अन्यत् स्पष्टम् ॥ २६७ ॥

इदानीमुपसंहर्त्तुमाह ॥

देशकालेन्द्रियगतैर्भेदैर्यद्दृश्यते ऽन्यथा ।

यथा प्रसिद्धिर्लोकस्य तथा तदवसीयते ॥ २६८ ॥

देशभेदेनासत्तिविप्रकर्षरूपेण, कालभेदेन यथा ग्रीष्मे मरीचयो भौमिनीष्मणा स्यन्दमाना दूरस्थस्य जलज्ञानमुपजनयन्ति, इन्द्रियभेदेन यथा तैमिरकस्य द्विचन्द्रज्ञानमुपजनयन्ति तैर्देशकालेन्द्रियगतैर्भेदैरन्यथा दृश्यमानं वस्तु लोकप्रसिद्धिवशाद्दार्ढ्यादार्ढ्यप्रत्ययभेदेनार्थक्रियाभेदेन च यथावदवैपरीत्येनाध्यवसीयते ॥ २६८ ॥

ततश्चेदमत्रार्थतत्त्वं बोद्धव्यमित्याह ॥

यच्चोपघातजं ज्ञानं

यच्च ज्ञानमलौकिकम् ।

न ताभ्यां व्यवहारो ऽस्ति

शब्दा लोकनिबन्धनाः ॥ २६९ ॥

उपघातजं सत्यत्वविपरीतं (१) ग्रैष्मतिमिरिकादिज्ञानं अलौकिकं च यदपि परमर्षीणां सम्बन्धिज्ञानं ताभ्यामुभाभ्यामपि व्यव-

(१) विपरीतेति समस्तः २ पु० पाठः ।

हारनिर्वहणमशक्यमित्यतो यथैवा ऽविसम्बाधं लोकप्रसिद्ध्या सकलव्यवहारनिर्वहणनिपुणं ज्ञानं यथावदर्थतत्त्वावधारणाय समाश्रीयते । यथोक्तं (२) "असमाख्येयतत्त्वानामर्थानां लौकिकैर्यथा । व्यवहारे समाख्यानां (३) तत्प्राज्ञो न विकल्पयेदि"ति तथैवार्थस्वरूपप्रत्यायनाय शब्दा लोकनिबन्धना लोकव्यवहारनिमित्तभूताः प्रवर्त्तमानाः प्रसिद्ध्यप्रसिद्धिभ्यामेव स्खलद्गतित्वास्खलद्गतित्वाभ्यां गौणमुख्य(४)विभागमापादयन्तीति बौद्धेपि शब्दार्थे व्यवस्थित एव गौणमुख्यविभाग इति सिद्धम् ॥ २९९ ॥

एवं गौणमुख्यविभागमुक्त्वा तत्प्रसङ्गेन च सत्यासत्यविभागं विधाय पुनरपि शब्दानां मुख्यनान्तरीयकविचारं वैतत्येन कर्त्तुमाह ॥

घटादिषु यथा दीपो
येनार्थेन प्रयुज्यते ।
ततो ऽन्यस्यापि सान्निध्या-
त्स करोति प्रकाशनम् ॥ ३०० ॥

इह यत्प्रतिपादनाय शब्दाः प्रयुज्यन्ते तत्तस्य प्रयोजकमुख्यं, तत्प्रतिपादनावसरे च संनिधानाद्यदन्यत्प्रत्याययति तत्तस्य नान्तरीयकमुच्यते । एतत् दृष्टान्तद्वयेन प्रदर्शयति घटादिष्वित्यादिना । तत्र यथा दीप इति ज्ञापकदृष्टान्तोपदर्शनं घटादिषु ज्ञातेषु विषयेषु यथा ज्ञापको दीपो येनार्थेन घटादिज्ञापनलक्षणेन ततः प्रयोजकादन्यत्प्रकाशं नान्तरीयकं यथा करोति ॥ ३०० ॥

एवं दार्ष्टान्तिके योजयितुमाह ॥

---

(१) तथोक्तमिति २ पु० पाठः ।

(२) समाख्यातमिति २ पु० पाठः ।

(३) मुख्यार्थेति २ पु० पाठः ।

संसर्गिषु तथा ऽर्थेषु
शब्दो येन प्रयुज्यते ।
तस्मात्प्रयोजकादन्या-
नपि प्रत्याययत्यसौ ॥ ३०१ ॥

यथा भाव इत्यादावर्थेषु बहुषु संसर्गिषु सध्याद्येनार्थेन सिद्धतादिना ऽसौ भावशब्दः प्रयुज्यते यस्मादन्यानपि लिङ्गसंख्यादीन् नान्तरीयकतया स्थितात् संनिधानात्प्रत्याययत्येवेति बोद्धव्यम् ॥ ३०१ ॥

कारकहेतुदृष्टान्तोपदर्शनार्थमाह ॥

निर्मन्थनं यथा ऽरण्योरग्न्यर्थमुपपादितम् ।
धूममप्यनभिप्रेतं जनयत्येकसाधनम् ॥ ३०२ ॥

अरण्योः सम्बन्धि यन्निर्मन्थनं तदग्न्यर्थं अग्निनिष्पत्तये, ऽग्निस्तस्य प्रयोजक इत्यर्थः । यस्मान्नान्तरीयकतया धूममप्यनुपयोगिनं जनयत्येव । कीदृशमेकसाधनमेकहेतुक इत्यर्थः । अरण्योरित्यनेनोत्तरारणिरधरारणिश्च तत्रोच्यतइति दर्शितम् ॥ ३०२ ॥

पुनरपि दार्ष्टान्तिके योजयितुमाह ॥

यथा (१) शब्दो ऽपि कस्मिंश्चि-
त्प्रत्याप्यार्थो (२) विवक्षिते ।
अविवक्षितमप्यर्थं
प्रकाशयति सन्निधेः ॥ ३०३ ॥

कस्मिंश्चित्प्रत्याप्ये ऽर्थे सिद्धताख्ये धर्मे ऽविवक्षितमप्यर्थं पुंस्त्वैकत्वलक्षणं प्रकाशयति प्रत्याययति संनिधानादिति ॥ ३०३ ॥

---

(१) तथेति २ पु० पाठः ।
(२) प्रत्याप्ये ऽर्थे इति २ पु० पाठः ।

नन्वस्तु (१) वस्तुगतिरीदृश्येव यथा दीपादिना नान्तरीयकप्रत्यायनेन प्रयोजकं प्रकाश्यते तत्सन्निधानान्नान्तरीयकतया ऽन्यदपि घटकुड्यादीति तत्र युक्तं, शब्दस्तु यत्प्रतिपादनाय वक्ता प्रतिपादयितुमिष्टस्तथैव भूत्वा तत्प्रतिपादनं करोतु किं तस्य नान्तरीयकप्रत्यायनेनेत्याशङ्क्याह ॥

यथैवात्यन्तसंसृष्टस्त्यक्तुमर्थो न शक्यते ।
तथा शब्दो ऽपि सम्बन्धी प्रविवेक्तुं न शक्यते ॥३०४॥

यथा मत्स्यमांसार्थिना मत्स्यमांससंसृष्टस्तोकत्वक्कण्टकादिरनुपयोग्यपि त्यक्तुं न शक्यते, तथा शब्दो ऽप्यत्यन्तसम्बन्धाल्लिङ्गसंख्याप्रतिपादक,स्तत्र न केवला प्रकृतिः प्रयोक्तव्या, न च केवलः प्रत्यय इति प्रविवेक्तुं परिहर्त्तुं न शक्यते ॥ ३०४ ॥

अतश्च तत्रार्थेषु बहुषु सन्निहितेषु कः शब्दस्यार्थो वाच्यः स्यादित्याह ॥

व्यर्थानां सन्निधाने ऽपि सति चैषां प्रकाशते ।
प्रयोजको ऽर्थः शब्दस्य रूपाभेदे ऽपि शस्यते ॥३०५॥

बहूनां संसर्गिणामर्थानाम् । तत्र सन्निधानादेतेषां च सत्यपि शब्दाद्दीपादिवाविशेषेण प्रकाशने यस्तस्य प्रयोजकः स एव वाच्यो ऽर्थो ऽन्यो नान्तरीयको न तस्य प्रयोजकत्वं तत्रापि रूपस्याभेदे समानरूपत्वे इति ॥ ३०५ ॥

एतदेव वैतत्येन प्रकारभेददर्शनपूर्वकमाह ॥

क्व चिद्गुणप्रधानत्व-
मर्थानामविवक्षितम् ।

---

(१) अत्रेति २ पु० पाठः ।

क्व चित्सान्निध्यमप्येषां (१)
प्रतिपत्तावकारणम् ॥ ३०६ ॥

यच्चानुपात्तं शब्देन
तत्कस्मिंश्चित्प्रतीयते ।
क्व चित्प्रधानमेवार्थो
भवत्यन्यस्य लक्षणम् ॥ ३०७ ॥

अत्र च गुणप्रधानताविपर्ययः पदार्थैकदेशाविवक्षा, सकलपदार्थाविवक्षा, उपात्तपदार्थापरित्यागेनैवान्यार्थोपलक्षण,मित्येवमनेन श्लोकद्वयेन प्रकारचतुष्टयस्योद्देशः कृतः ॥ ३०७ ॥

अथाद्यप्रकारप्रदर्शनार्थमाह ॥

आख्यातं तद्धितार्थस्य यत्किञ्चिदुपदर्शकम् ।
गुणप्रधानभावस्य तत्र दृष्टो विपर्ययः ॥ ३०८ ॥

तेन दीव्यतीत्याख्यातं तद्धितार्थस्य निमित्तत्वेनोक्तम् । अतश्च तत्र क्रियाप्रधानमाख्यातमिति तदर्थस्यैव तद्धितान्तादवगतिः स्यात् । यतश्च तत्र क्रियाप्रधानत्वेपि नाख्यातस्य (२) तद्धितः स्वभावात्साधनप्रधान इति साधनार्थस्यैव प्राधान्येनावगतिरिति । तेन दीव्यत्यादौ निर्देशे गुणप्रधानभावो न विवक्षितो ऽक्षकरणकदेवनादिक्रियाकर्तृमात्रमेव तत्र प्रयोजकमिति स एव मुख्योर्थः । वक्ष्यति च "गुणप्रधानताभेदः पुरुषादिविपर्ययः । निर्दिष्टस्यान्यथा शास्त्रे नित्यत्वान्न विरुध्यते । यथानिर्देशमर्थाः स्युर्येषां शास्त्रं विधायकम् । किं चित्सामान्यमाश्रित्य स्थिते तु प्रतिपादनम् । यो ऽश्वो यः पीठ इत्यत्र भूतयोरश्वपीठयोः यथोपलक्षणार्थत्वं तथार्थेष्वनुशासनमि"ति ॥३०८॥

(१) सान्निध्यमेतेषामिति २ पु० पाठः ।
(२) चाख्यातस्येति २ पु० पाठः ।

अथ क्व चित्सांनिध्यमित्येतस्य प्रतिपादनायाह ॥

निर्देशे (१) लिङ्गसख्यानां

सन्निधानमकारणम् ॥ ३०८ऽऽ ॥

सिद्धलक्षणो भावो घञादीनां निमित्तत्वेनाभीष्ट इति तत्प्रतिपादनाय भाव इत्यस्मिन्निर्देशे लिङ्गसंख्ययोर्नान्तरीयकतया प्रतिपत्तावपि सन्निधानमकारणं न यत्र तयोः प्रयोजकत्वमिति यावत्। ननु नान्तरीयकतया प्रतिपत्तौ कथं, क्व चित्सान्निध्यमप्येषां प्रतिपत्तावकारणमित्युक्तम्। प्रयोजकार्थवत्तद्व्यवहारपर्यन्तायां प्रतिपत्तावकारणमित्यभिप्रायः॥ ३०८ऽऽ ॥

इदानीं यत्रानुपात्तमित्येतस्य प्रतिपादनायाह ॥

प्रमाणमेव (२) ह्रस्वादावनुपात्तं प्रतीयते ॥ ३०९ ॥

इह उदात्तानुदात्तस्वरसमाहारः स्वरित इत्युक्तं ह्रस्वदीर्घप्लुताश्च मात्रिकद्विमात्रि(३)कत्रिमात्रलक्षणा उदात्तानुदात्तस्वरसमाहाररूपा भवन्ति तत्र ह्रस्वस्वरितादीनां कियदुदात्तं कियदनुदात्तम् आदौ किमुदात्तमथानुदात्तं मध्ये ऽन्ते वेति सन्देहापाकरणायोक्तं "तस्यादित उदात्तमर्धह्रस्वमि"ति। अत्र चार्द्धह्रस्वग्रहणमर्द्धमात्रालक्षणस्य प्रमाणस्योपलक्षणमिति तदेव तस्मात्प्रतीयते इत्यर्धह्रस्वग्रहणप्रतिपाद्यस्याप्रधानस्याविवक्षैवोक्ता॥ ३०९ ॥

एतदेव प्रदर्शयितुमाह ॥

ह्रस्वस्यार्द्धं च यद् दृष्टं तत्तस्या ऽसन्निधावपि।

ह्रस्वस्य लक्षणार्थत्वात्तद्देवाभिधीयते ॥ ३१० ॥

अतश्च ह्रस्वस्यार्द्धं च दृष्टमर्द्धमात्रात्मकं तत्तस्य ह्रस्वस्यासन्निधाव-

---

(१) निर्देशेति २ पु० पाठः।

(२) प्रमाणमर्धेति २ पु० पाठः।

(३) द्विमात्रेति २ पु० पाठः।

पि दीर्घप्लुतयोरप्यादिभूतार्द्धमात्रोदात्तेत्युच्यते । कस्मादित्याह । ह्रस्वस्य लक्षणार्थत्वादिति । अर्द्धह्रस्वमित्यत्र ह्रस्वग्रहणं मात्राया उपलक्षणार्थम् । अतो दीर्घप्लुतयोरप्यादिभूतार्द्धमात्रोदात्तेति बोद्धव्यम् । एतदेवान्यैरुक्तम् अर्द्धह्रस्वमित्यनेनार्द्धमात्रा लक्ष्यते ह्रस्वग्रहणमतन्त्रमिति । तस्माद्ध्रस्वस्यात्र लक्षणार्थत्वाद् दीर्घप्लुतयोरप्यर्द्धमात्रोदात्ता भवतीत्यभिधीयते । किंवदित्याह तद्वदेवेति । यथा तस्य ह्रस्वस्यार्द्धमात्रोच्यते तथा तत्संनिधौ दीर्घप्लुतयोरपीत्यर्थः ॥ ३१० ॥

अथ वा प्रकारत्रयमत्र प्रतिपाद्यते तत्राद्य(१)प्रकारमाह ॥

दीर्घप्लुताभ्यां तस्य स्यात्

ह्रस्वग्रहणेन "ऊकालोऽज्झ्रस्वदीर्घप्लुत" इत्यत्रैकयोगनिर्दिष्टत्वाद्दीर्घप्लुतावपि लक्ष्येते ततश्च दीर्घप्लुताभ्यां तस्यार्द्धस्यावच्छेदः स्यात् । विषमविभागेप्यर्द्धशब्दो दृष्टो ग्रामार्द्धं नगरार्धम् इति तथा ऽत्रेति दीर्घप्लुतयोरप्यर्द्धमात्रोदात्ता भवति ॥

द्वितीयं प्रकारमाह ॥

मात्रया वा विशेषणम् ॥ ३१०ऽऽ ॥

मात्रया अथ वार्द्धस्यावच्छेदः ह्रस्वसंज्ञकत्वस्याविवक्षितत्वात् । एतच्च निदर्शितं(२) ह्रस्वस्यार्द्धमित्यनेन । अथ वा निरस्तावयवविभागो ऽर्द्धह्रस्वशब्दो ऽखण्ड एवार्द्धमात्रजातेः सप्तपर्णादिवदुपलक्षक इति ॥ ३११ऽऽ ॥

तृतीयमत्र प्रकारमाह ॥

जातेर्वा लक्षणा यस्मा-
त्सर्वथा सप्तपर्णवत् ॥३११॥

---

(१) तत्राद्यमिति २ पु० पाठः ।

(२) निदर्शनमिति २ पु० पाठः ।

इदानीं क्व चित्प्रधानमेवार्थो भवत्यन्यस्य लक्षणमिति व्याख्यातु-माह ॥

गन्तव्यं दृश्यतां सूर्य इति कालस्य लक्षणे ।
छायतां काम इत्येतत्सोपायमभिधीयते ॥ ३१२ ॥

पथिकैः क्व चिदित्यमभिधीयते त्वर्यतामद्यापरो ऽध्वा गन्तव्यः सूर्यश्च दृश्यतामि,त्यत्र सूर्यदर्शनप्राधान्येन शब्दः श्रूयमाणो ज्ञायता-मल्पीयान् भागो ऽह्नः परिशिष्यतइत्यर्थस्य सोपायस्य सनिश्चयस्यो-पलक्षकः सम्पद्यतइति प्रधानेनार्थेनान्यार्थोपलक्षणमिति लक्षितप-रार्थमुख्यशक्त्यर्थो ऽपि न त्यक्त इति ॥ ३१२ ॥

एतदेव श्लोकत्रयेण शास्त्रलोकयोरुदाहरणेषु वितत्य प्रदर्शयितु-माह ॥

विध्यत्यधनुषेत्यत्र विशेषेण निदर्श्यते ।
सामान्यमाश्रयः शक्तेर्यः कश्चित्प्रतिपादकः ॥ ३१३ ॥

अधनुषेत्यनेन विशेषेण करणसामान्यमात्रं निदर्श्यते । तत्कीदृश-मित्याह शक्तेः करणशक्तेराश्रयो ऽधिकरणमात्रं, ततश्च तस्या यः क-श्चित्प्रतिपादक उपादीयते । एतदुक्तं भवति । करणनिषेधपरायां चोदनायां धनुर्लक्षणस्य विशेषस्यापरित्यागेनैव करणमात्रस्य मुख्य-त्वमिति शास्त्रीयमुदाहरणम् । उक्तं च । "विध्यत्यकरणेनेतीतरथा ह्यतिप्रसङ्ग" इति ॥ ३१३ ॥

विशेषाभिधायकेपि वाक्ये सामान्यमात्रमेव प्रयोजकं लोकेपि दृ-श्यतइत्याह ॥

काकेभ्यो रक्ष्यतां सर्पिरिति बालोपि चोदितः ।
उपघातपरे वाक्ये न श्वादिभ्यो न रक्षति ॥ ३१४ ॥

सर्पिषः काकेभ्यो रक्षणमत्र विशिष्टमेव विहितमप्युपघातमात्र-

निवारणफलं पर्यवस्यतीति तदेव तत्र प्रयोजकं बोद्धव्यम् ॥ ३१४ ॥

क्व चित्साचादनुक्तमपि मुख्यार्थनान्तरीयकतया प्रतिपद्यतएवेति दर्शयितुमाह ॥

प्रचालनं शरावाणां स्थालीनां(१) मार्जनं तथा ।
अनुक्तमपि रूपेण भुज्यङ्गत्वात्प्रतीयते ॥ ३१५ ॥

भोजनमस्योपपाद्यतामित्यत्र भोजनोपपादनं शब्दः प्रत्याययंस्तदङ्गानामासनदानपात्रप्रचालनादीनां नान्तरीयकतया प्रत्यायनङ्करोत्येवं प्रचालनइति वा पाठः । शरावाणाम्प्रचालने शब्देनोपात्तस्थालीनिर्माजनाद्यनुक्तमपि सम्भवाद्भुज्यङ्गत्वात्प्रतीयतएवेति । तदेवं "प्रयोजकमिदन्त्वेषामत्रेदं नान्तरीयकमि"त्येतदेव वितत्य प्रसङ्गाद्वैचित्र्येणोपदर्शितम् । एवं "प्रमाणमर्द्धह्रस्वादावि"त्यादिना "प्रचालनं शरावाणामि"(२)त्यनेन ग्रन्थेन यत्रानुपात्तमित्यादिश्लोको व्याख्यातः । एतेन श्लोकेन प्रकारद्वयेन लचणा प्रदर्शिता । कदा चिन्मुख्यार्थत्यागेनैवान्यस्योपलचणमेतदेवाविवचितवाच्य(३)मुच्यते । कदा चिन्मुख्यार्थाविरामोपायपूर्वकमन्यार्थोपलचणमेतदेव विवचितान्यपरवाच्यमुक्तं विज्ञेयम् । इत्येवं मुख्यनान्तरीयकविभाग उपदर्शितः ॥ ३१५ ॥

अथात्रेदं गौणमिदं मुख्यमिदं नान्तरीयकमित्येवं शब्दार्थनिर्णयप्रस्तावे तत्तन्निश्चयोपायानुपदर्शयितुकाम आह ॥

वाक्यात्प्रकरणादर्थादौचित्याद्देशकालतः ।
शब्दार्थाः प्रविभज्यन्ते न रूपादेव केवलात् ॥ ३१६ ॥

तत्र वाक्याच्छब्दार्थनिर्णयो यथा कटं करोति भीष्ममुदारं दर्श-

(१) स्थलानामिति २ पु० पाठः ।

(२) इत्यन्तेनेति २ पु० पाठः ।

(३) अविवक्षितं वाच्यमिति क्वाचित्को ऽपपाठः ।

नीयमिति तुल्यायामपि श्रुतौ यदा कटस्यैव करोतिक्रियया सम्बन्धः तदा द्रव्यस्य च निर्गुणस्यानुपपत्तेर्गुणानां च निरधिकरणानामसम्भवादाकाङ्क्षादिना तत्सामानाधिकरण्यं वाक्यीयात्समन्वयादिति भीष्मगुणान्वितस्यैव कटस्य करणं वाक्यार्थः । वक्ष्यति च "आश्रयाश्रयिणोर्वाक्यान्निर्णयस्त्ववतिष्ठत"इति तथा च शास्त्रे "कर्मणि द्वितीये"त्यादीनि पृथगेव प्रकरणानि विरचितानि । तत्र प्रातिपदिकादनभिहिते कर्मादौ यदेकत्वादि तत्र द्वितीयाद्या विभक्तयो भवन्तीत्येवमर्थस्य सङ्गतेराकाङ्क्षादिवशाद्भिन्नेष्वपि प्रकरणेषु तात्पर्यालोचनके श्रोतरि वाक्यीयः सम्बन्धो ऽर्थनिश्चयाय पर्यवस्यतीति वाक्याच्छब्दार्थनिर्णयः । तथात्र प्रकरणमप्यशब्दं शब्दार्थनिर्णयनिमित्तं यथा ग्रामप्रस्तावे सैन्धवानां चोदनमश्वानयनपर्यवसायि भवति भोजनप्रस्तावे तु तदेव लवणप्रतीतिमुपजनयतीति । शास्त्रे यथा धातुप्रकरणात् धातुरित्युक्तम् । तथा चोभयावगतौ सत्यां "कर्त्तृकरणयोस्तृतीये"त्यत्र कारकाणां प्रक्रान्तत्वात्करणशब्देन क्रियाग्रहणं न विज्ञायते, शब्दवैरेत्यादौ सूत्रे च धात्वधिकारे करणशब्दात् क्रिया प्रतीयतइति । अर्थस्तु शाब्दत्वाच्छब्दार्थनिर्णयं प्रकल्पयति यथाञ्जलिना जुहोत्यञ्जलिना सूर्यमुपतिष्ठते ऽञ्जलिना पूर्णपात्रमाहरतीत्यत्र जुहोतीत्याद्यर्थवशाद्विभिन्नार्थवाचको ऽञ्जलिशब्दः । शास्त्रेपि पूरणगुणसहितार्थेत्यत्र गुणेन सह षष्ठी न समस्यतइत्यर्थसामर्थ्याददेङामसम्प्रत्ययः । तथा "न शसददवादिगुणानामि"त्यत्र नाश्रयिणो ग्रहणं भवत्यर्थादिति । औचित्यादपि शब्दार्थव्यवस्थानं दृश्यते यथा सीरासिमुसलैः केवलैरनिर्दिष्टक्रियापरैरप्यौचित्याद्विलेखनयुद्धावहननलक्षणसमुचितक्रियापदाक्षेपे शब्दार्थनिर्णयः पर्यवस्यति । यथा वा प्रष्ठादयः शब्दा अग्रगामित्वादिनिमित्तसमाश्रयणेन प्रवर्त्तमानास्तस्य च निमित्तस्यौचित्यात्पुंस्येव सम्भवात्पुंशब्दास्तदुच्यते तद्योगात्

स्त्रियां वर्त्तन्ते न साक्षादिति प्रष्ठसम्बन्ध एव षष्ठ्यादीनां "पुंयोगादाख्यायामित्य"नेन निमित्तत्वेनोपदर्शितः । यथा च "यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा । यश्चैनं गन्धमाल्याभ्यां सर्वस्य कटुरेव स" इत्यत्रानुक्तक्रियापदानि साधनान्येवौचित्यवशात्स्वसमुचितक्रियापदावगत्या अवान्तरवाक्योपप्लावनप्रत्यायनपूर्वकाप्रस्तुत(१)प्रशंसालक्षणस्य वाक्यार्थस्य प्रतीतिमुपजनयन्ति । तथा च यो निम्बं परशुना छिनत्ति यश्चैनं गन्धेनानुलिम्पति सर्वस्य तस्य दुस्त्यजा प्रकृतिरिति कृत्वा कटुरेव दौर्मनस्यदाननिपुण एवेति कस्य चित् खलत्वप्रतिपादनमत्र तात्पर्यार्थः । शास्त्रे यथा "पुंयोगादाख्यायामि"त्यत्रोक्तं पुंसि शब्दप्रवृत्तिनिमित्तस्य सम्भवात्पुंशब्दा एतइति । देशाच्छब्दार्थनिर्णयो यथा मथुरायाः प्राचीनादुदीचीनाद्वा नगरादागच्छामीत्युक्ते नगरविशेषात्पाटलिपुत्रादागच्छामीति गम्यते पाटलिपुत्रस्य मथुरासम्बन्धिनोश्च प्राचीनोदीचीनभागयोर्विद्यते प्रत्यासत्तिरिति कृत्वा देशवशादत्र निर्णयः । कालात् खलु व्यवस्था दृश्यते यथा शिशिरे द्वारमित्युक्ते पिधेहीति ग्रीष्मसमये त्वेवमभिधाने समुद्घाटयेति गम्यते । एतच्च शब्दार्थनिर्णयोपायानां दिङ्मात्रप्रदर्शनं बोद्धव्यम् । अन्ये ऽपि तन्निश्चयाय प्रकारा अनुसन्धातव्याः । श्लोकवशाच्चोदाहरणमात्रमेव दर्शितमिति मन्तव्यं सर्व्वथा न रूपमात्राच्छब्दार्थप्रविभागनिर्णयः कर्त्तुं शक्य इति प्रतिपादयितुमुक्तं "न रूपादेव केवलादि"ति ॥ ३१६ ॥

तथा चापरैः संसर्गादयः शब्दार्थावच्छेदहेतवः प्रदर्शिता इत्याह ॥

संसर्गो विप्रयोगश्च साहचर्यं विरोधिता ।

अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥ ३१७ ॥

इह कैश्चिदर्थभेदाच्छब्दभेदो ऽभ्युपगतः तदपरैरेकशब्दतेति द्वौ प-

(१) पूर्वकमशक्येति २ पु० पाठः ।

त्तौ । तत्र नानात्वपक्षे स्वभावभिन्नेषु तुल्यश्रुतिषु रूपाभेदादनवच्छि-न्नेषु निमित्तान्तरैः संसर्गादिभिरवच्छेदः क्रियते । एकत्वपक्षे त्वर्था-भिधाने भिन्नासु शक्तिषु श्रुतिसारूप्यमात्रादलब्धविभागासु यथैव संसर्गादिभिरर्थनिर्णयः क्रियतइत्युभयत्रापि प्रकरणादयः शब्दार्थ-निर्णयनिपुणा इति तदुपन्यासः कथ्यते । तदत्र केचित्सामर्थ्यमेवैकं शब्दार्थनिर्णयनिमित्तमिति मन्यन्ते । योप्यर्थप्रकरणादिना तत्र भेदः समधिगम्यते सोपि सामर्थ्यादेवात्र प्रतीयतइति कथयन्ति । सामर्थ्य-मेव हि संसर्गादिभिर्व्यज्यतइति तत्र संसर्गाद्यथा सकिशोरा धेनु-रानीयतामित्यत्र नियतेन संसर्गिणा किशोरलक्षणेन विशेषावसाय-निमित्तेन वडवाया एव सम्प्रत्ययः, यथा च सवत्सा धेनुरित्यत्र व-त्ससंसर्गाद्गोर्धेनोरेव सम्प्रत्यय इति संसर्गादर्थनिर्णयः । रूढ्या गौरेव धेनुरुच्यते इति तु येषां दर्शनं तेषामत्र संसर्गो विशेषसम्प्रत्यये नोप-युज्यतइति बोद्धव्यम् । शास्त्रे यथा "अवाद्ग्र" इत्यत्र यस्याविनोपस-र्गेण सम्बन्धः सम्भवति स एव गृह्यते गिरतिः । गृणातेस्तु स्वभावाद-र्थविरोधादेव संबन्धो नोपपद्यतएव । तथा संसर्गवद्विप्रयोगोऽप्यवच्छे-दहेतुः । यथा निर्ज्ञातसंबन्धस्योच्यते अकिशोरा धेनुः अवत्सा अकर-भा वा आनीयतामिति किशोरादिविप्रयोगेन विशिष्टजातीयाया एव धेनोरवगतिरुपजायतइति । शास्त्रेऽपि "भुजोनवन"इति यस्य भुजेरवनमनवनं चार्थः तस्य ग्रहणं विज्ञायते न तु कौटिल्यार्थस्य । निर्भुजति पाणिमिति । साहचर्याद्यथा रामलक्ष्मणावित्युक्ते लक्ष्म-णसाहचर्याद्दाशरथेरेव प्रतीतिः । अत्र यद्यप्येको दृष्टव्यभिचारसाह-चर्यात्तत्तुल्यधर्मा ज्ञायतइति बोद्धव्यम् । शास्त्रे यथा विपराभ्यां जे-रित्यत्र पराशब्दो ऽदृष्टव्यभिचारेण विना साहचर्यादुपसर्ग एव गृह्य-ते । यद्यपि बहुविवनमित्यादौ विशब्दोनुपसर्गोऽस्ति तथापि समुदा-यो ऽर्थवान् । जहत्स्वार्थाद्वृत्तिपक्षे ऽवयवा अनर्थका एव । अजह-

त्स्वार्थवृत्तिपक्षे कथमुपसर्जनभावमापन्नो विरप्राधान्यात् ग्रहीतुमशक्य एवेति नास्ति विरनुपसर्गः । वीजयते इत्यत्र तु वीशब्दो न विशब्द इति । भाषेप्युक्तमस्य गोर्द्वितीयेनार्थइति गौरेव प्रतीयते नाश्वो न गर्दभ इति । यथा चा"न्तरान्तरेणयुक्ते"इत्यत्र द्वावपि टाप्तृतीयान्तयोः संभवात् दृष्टापचारौ । अतः परस्परसाहचर्यान्निपातयोरेव ग्रहणमित्येवं साहचर्यमर्थनिर्णयहेतुः शब्दानाम् । विरोधादप्यर्थो ऽवधार्यते । यथा रामार्ज्जुनावित्यत्रार्ज्जुनसन्निधाने निसर्गवैरिणो जामदग्न्यस्यैव प्रतीतिः । अर्थप्रकरणदेशकालौचित्यैर्विशेषे ऽवस्थापनं वाक्यदर्शितम् । लिङ्गाच्च वाक्यान्तरे दृष्टाद्भेदः प्रसिद्धः प्रतीयते । यथा अक्ताः शर्करा उपदधातीत्यत्रानेकस्याञ्जनद्रव्यस्य संभवे तेजो घृतस्य स्तुतिरुक्ता । एतस्माल्लिङ्गात् घृतसाधनत्वमञ्जिक्रियायाः शर्कराकर्मिकाया निर्द्धार्यते । तथा पशुमालभेतेत्यत्र पशुत्वसंबन्धिषु प्राणिषु सत्सु छागस्य हविषो वपाया मेदस इति लिङ्गाच्छागैकार्थसमवायि पशुत्वं प्रतीयते । शास्त्रेप्यूह्यम् । शब्दान्तरसंनिधानादपि विशेषावगतिः । यथा अर्ज्जुनः कार्त्तवीर्यः रामो जामदग्न्य इति । सामर्थ्याद्विशेषप्रतिपत्तिर्यथा । अनुदरा कन्येति सामर्थ्यादुदरविशेषप्रतिषेधप्रतीतिः । तथा अभिरूपाय कन्या देयेति । अभिरूपवरायेति सामर्थ्यात्प्रतीयते । शास्त्रेपि "प्रथमा नर्दिष्टं समासउपसर्ज्जनमि"ति समासार्थे शास्त्रे समासशब्दस्य प्रवृत्तिः । "एकविभक्ति चापूर्वनिपात" इत्यत्र यः समासशब्दोनुमीयते तस्य प्राथमकल्पिक एव वृत्तिः । व्यक्तिर्लिङ्गम् । तस्मान्निर्णयो यथा तद्ग्रामस्यार्द्धं लभेतेत्यत्र समप्रविभागे ऽर्द्धशब्दो नपुंसकेन परामर्शात् [ग्रामस्यार्द्धं स्वयमेव प्रतीयते । (१)] शास्त्रेप्य-

(१) [ ] एतन्मध्यस्थाने तस्माद् ग्रामस्यार्धं सममेव प्रतीयते । तं ग्रामस्यार्धमित्यत्र तु तमिति पुंलिङ्गेन परामर्शाद् ग्रामैकदेशमात्रं प्रतीयतइति २ पु० पाठः ।

स्वराद्यथा स्थूलपृषतीमालभेतेत्यत्रान्तोदात्तस्य श्रवणात् स्थूला चासौ पृषतीत्येवंविधार्थप्रतीतिः । पूर्वपदप्रकृतिस्वरत्वदर्शने स्थूलानि पृषन्ति यस्यामित्यन्यपदार्थप्रतीतिः । तथा वैपाशः कूप इत्यत्राद्युदात्तस्य श्रवणाद्विपाश उत्तरस्य विशिष्टस्यैव प्रतीतिः । अन्तोदात्तश्रवणे तद्विपरीतस्येति । सत्वाद्यथा । सुसिक्तमतिस्तुतमित्यादौ पूजातिक्रमणयोः कर्मप्रवचनीयसंज्ञायामुपसर्गत्वाभावे तयोरेव प्रतिपत्तिः । उपसर्गसंज्ञायां तु सत्यां सुषिक्तं सुष्टुतमित्यादौ षत्वप्रवृत्तेरर्थान्तरस्य प्रतिपत्तिः । णत्वनत्वाभ्यां यथा प्रणायक इत्यत्रोपसर्गाश्रयणत्वसद्भावे प्रणयनक्रियाकर्त्तुः प्रतीतिः, णत्वाभावे तु प्रगता नायका अस्माद्देशादसौ प्रनायको देश इत्यन्यपदार्थप्रतीतिरिति । तदेवमेते शब्दार्थस्य सन्देहनिराकरणद्वारेण नियतार्थावसायहेतुत्वाद्विशेषस्मृतिहेतवो निर्णयहेतवः संसर्गादय इति बोद्धव्यम् ॥ ३१७॥

नन्वेकत्वदर्शने भेदाभावाच्छब्दानामर्थस्य सन्देहे तन्निर्णयाय प्रकरणादय उच्यन्तइति शोभनं, भेदपक्षे तु विभिन्नत्वादेव शब्दस्तदर्थप्रत्यायनं करिष्यतीत्याशङ्क्य तत्रापि रूपसादृश्योत्पादितसंशीतीनां व्यवहर्त्तॄणां प्रकरणादिभिरेव शब्दार्थनिर्णय इति प्रतिपादयितुमाह ॥

भेदपक्षेऽपि सारूप्या-
द्भिन्नार्थाः प्रतिपत्तिषु ।
नियता यान्त्यभिव्यक्तिं
शब्दाः प्रकरणादिभिः ॥ ३१८ ॥

भेदपक्षेपि प्रतिपत्तिषु भिन्नार्था अपि शब्दाः सारूप्यादभिन्ना इवेति प्रकरणादिभिरेवोक्तस्वरूपैर्नियता अवच्छिन्ना अर्थाभिव्यक्तावुपयोगं यान्तीति न कुत्र चित्प्रकरणादिमन्तरेण शब्दार्थनिर्णय इति

बोद्धव्यम् ॥ ३१८ ॥

युक्तं चैतत्, कस्मादित्याह ॥

नामाख्यातसरूपा ये कार्यान्तरनिबन्धनाः ।
शब्दा वाच्याश्च तेष्वर्थो न रूपादधिगम्यते ॥ ३१९ ॥

इह वाक्ये नामरूपा आख्यातशब्दा अपि सम्भवन्ति । यथा अश्व इति टुओश्वि गतिवृद्ध्योरित्यस्माल्लुङि मध्यमपुरुषैकवचने सिपि "नित्यं ङित" "इतश्चे"तीकारलोपे च्लिप्रत्ययस्य जृस्तम्भुम्रुचुम्लुचुग्लुचुग्लुञ्चुश्विभ्यश्चेत्यादिना चङादेशे श्वयतेरस्तस्यातो गुणरूपत्वे(१) सकारस्य रुत्वविसर्जनीययोः कृतयोर्लुङ्लङ्लृङ्क्ष्वित्यादिना ऽटि कृते अश्व इत्याख्यातपदं श्वयतिक्रियायाः कर्त्रवच्छिन्नाया अतीतकालायाः प्रतिपादकम्, अश्व इति च नामपदमश्वजातीयस्यार्थस्य सत्त्वभूतस्याभिधायकमिति । सारूप्यात्सन्देहे प्रकरणादिभिरर्थव्यवस्था यथा ऽजापय इत्येतत् जिजय इत्यस्माद्धातोः कश्चिदजेयं जितवान् तमन्यो ऽनुप्रयुक्तवानित्यर्थविवक्षायां हेत्वर्थे णिचि "क्रीङ्जीनां णावि"त्यात्वे अर्त्तिह्रीव्लीत्यादिना पुकि जापीत्येवं स्थिते लङि शपि गुणायादेशयोः कृतयोः सकारस्य रुत्वविसर्जनीययोश्च लुङ्लङित्यादिना ऽडागमे च कृते ऽजापय इत्याख्यात,मथ वा ऽजायाः पयो ऽजापय इत्यपि नामपदं तत्सदृशमित्यर्थादिना तन्निश्चयः । आख्यातसरूपाश्च नामशब्दास्तेन यस्य तस्येत्यादयः । तथा च तनुविस्तारे इत्यस्माल्लिटि मध्यमपुरुषबहुवचने द्विर्वचने कृते ऽत एकहल्मध्य इत्यादिना एत्वाभ्यासलोपयोः कृतयोस्तेनेत्याख्यातं, तच्छब्दस्य तृतीयान्तस्य सदृशमिति । तसु उपक्षये यसु प्रयत्ने इत्याभ्यां विध्यादौ लोटि तस्य च सिपि "सेर्ह्यपिच्चे"ति ह्यादेशे दिवादित्वाच्छ्यनो ऽनुबन्धलोपे "ऽतो हेरि"ति हेर्लुकि तस्य यस्येत्याख्यातपदं यत्तदोः षष्ठ्येकवचनान्त-

(१) अतो गुणइति पररूपत्वइति २ पु० पाठः ।

यो: सदृशमिति सारूप्यात्सन्देहे प्रकरणादिभिस्तन्निश्चीयते । की-दृशा: कार्यान्तरनिबन्धना: कार्यान्तरं विशिष्टप्रत्ययलक्षणं प्रकरणादिना तन्निबन्धनं निमित्तं येषां ते तथाभूता: तेषु रूपमात्रार्थोऽवगम्यते। तस्मात् त्वमश्वो ऽजापय: शत्रुभवनानीत्यादिवाक्यार्थपर्यालोचनयैवार्थनिर्णय:। आह च "न हि किञ्चित्पदं नामरूपेण नियतं क्वचित्। पदानामर्थरूपं च वाक्यार्थादेव जायते" इति ॥ ३१९ ॥

अथ शब्दार्थनिर्णयप्रस्तावे पदपदार्थानामसत्यत्वमखण्डस्यैव च वाक्यार्थस्य सत्यत्वमभ्युपगन्तव्यमिति प्रदर्शयितुमाह ॥

या प्रवृत्तिनिवृत्त्यर्था स्तुतिनिन्दाप्रकल्पना ।
कुशल: प्रतिपत्ता तामयथार्थां प्रतीयते ॥ ३२० ॥

या प्रवृत्तये स्तुतिप्रकल्पना निवृत्तये च निन्दाप्रकल्पना तां प्रेक्षावानयथार्थामभिमन्यते । परमार्थतस्तु तथाविधस्य वाक्यस्य प्रवर्त्तस्व निवर्त्तस्वेति वा सत्यभूतं वाक्यार्थं तत्रावगच्छतीति पदपदार्थप्रत्यय: सर्वत्रासत्यएवेति सैवैषा तात्पर्यशक्तिरिति कैश्चिदवस्थापितम् ॥ ३२० ॥

एतदेव प्रकटीकर्त्तुमाह ॥

विधीयमानं यत्कर्म दृष्टादृष्टप्रयोजनम् ।
स्तूयते सा स्तुतिस्तस्य कर्त्तुरेव प्रयोजिका ॥ ३२१ ॥

दृष्टप्रयोजनं किञ्चित्कर्म स्तूयते यथा यो राजानं भजते स सारं भुङ्क्ते, अदृष्टप्रयोजनमपि यो ऽग्निष्टोमेन यजते स स्वर्गं गच्छतीति विलक्षण: प्रवृत्तिनिवृत्तिप्रयोजनो ऽन्य एवाविभागो वाक्यार्थस्तथाविधवाक्यनिबन्धन एवाभ्युपगन्तव्य इति स्थितम् ॥ ३२१ ॥

ननु कथं न तत्र स्पष्टमेव कृत्वा प्रवृत्तिनिवृत्ती विधीयेते किमनुपयोगिनिन्दाद्यर्थप्रतिपादनासंभारेणेत्याशङ्क्याह ॥

व्याघ्रादिव्यपदेशेन
यथा बालो निवर्त्त्यते ।
असत्यो ऽपि तथा कश्चि-
त्प्रत्यवायो विधीयते ॥ ३२२ ॥

यथा रुदन्तं व्याघ्रो भक्षयतीति बालस्योच्यते, न तत्र व्याघ्रभक्षणं वस्तुस्थित्या संभवि,(१) केवलं मा कदा चित् त्वं रोदीरिति रोदननिषेध एव तस्य क्रियते, तथा तत्र प्रतिषिद्धाचरणान्नरकपातो भवतीत्येतावन्मात्रं प्रतिग्राह्यत(२)इति तत्तदर्थसमाश्रयणेन सत्यरूपपदपदार्थाभ्युपगमो न युक्तः ॥ ३२२ ॥

तथा प्रत्यवायोपदेशेन च यच्छास्त्रेण प्रतिषिद्धं न तत्राहोपुरुषिकया प्रत्यवायसंविधानमारचय्य प्रेक्षापूर्वकारिणः प्रवृत्तिरुचिते(३)त्याह ॥

न संविधानं कृत्वापि प्रत्यवाये तथाविधे ।
शास्त्रेण प्रतिषिद्धे ऽर्थे विद्वान्कश्चित्प्रवर्त्तते ॥३२३ ॥

दृष्टप्रयोजनप्रत्यवायप्रतिविधाननिदर्शनपूर्वकमेतदेव व्याख्यातुमाह ॥

सर्पेषु संविधायापि सिद्धैर्मन्त्रौषधादिभिः ।
नान्यथा प्रतिपत्तव्यं न दतो गमयेदिति ॥ ३२४ ॥

न दतो गमयेत् यद्दतो गमयेत्सर्पा एनं घातुका भवन्तीत्यनेन पुरोडाशस्य दन्तोपदंशनपूर्वकभोजनं निषिद्ध्यते तत्र कश्चित्सर्पाणां प्रतिविधानं मन्त्रौषधादिभिः कृत्वा यदि तथा प्रवृत्तस्तदानेन शा-

(१) भवतीति २ पु० पाठः ।
(२) प्रतिपाद्यतइति २ पु० पाठः ।
(३) उच्यतइति २ पु० पाठः ।

स्वानुष्ठानं परित्यक्तमिति न शोभनमाचरितम् ॥ ३२४ ॥

अस्त्वेवं विधिनिषेधपरेषु स्तुत्यर्थादीनामसत्यत्वं यत्र तु स्तुतिनिन्दे एव मुख्ये प्रयोजिके तत्र तदर्थानां सत्यत्वमेवोचितमित्याशङ्क्याह ॥

क्व चित्तत्त्वसमाख्यानं
क्रियते स्तुतिनिन्दयोः ।
तत्रापि च प्रवृत्तिश्च
निवृत्तिश्चोपदिश्यते ॥ ३२५ ॥

यत्रापि क्व चित् स्तुतिनिन्दयोर्विषये तयोः संबन्धि वा तत्त्वाख्यानं क्रियते तत्रापि सर्वथा स्तुतिनिन्दयोः केवलयोर्न किंचित्प्रयोजनमुत्पश्याम इति प्रवृत्तिनिवृत्ती एवोपदिश्येते इति बोद्धव्यम् ॥ ३२५ ॥

एवं पदपदार्थानामसत्यत्वे वाक्यवाक्यार्थयोरखण्डयोरेव सत्यत्वे प्रतिष्ठापिते पदार्थानां स्वरूपस्य वाक्यार्थ एव निबन्धनमिति दर्शयितुमाह ॥

रूपं सर्वपदार्थानां
वाक्यार्थोपनिबन्धनम् ॥ ३२५ऽऽ ॥

एकस्मिन् वाक्यार्थे रूपनिबद्धास्ते साफल्यं भजन्ते अन्यथा विशरारव एवेति वाक्यार्थ एव तेषां परस्परसमन्वये निबन्धनम् । वक्ष्यति च "पृथग् विशिष्ट(१)तत्त्वानां पृथगर्थानुपातिनाम् । इन्द्रियाणां यथा कार्यमृतेदेहान्न कल्पते ।.तथा पदानां सर्वेषां पृथगर्थनिवेशिनाम् । वाक्येभ्यः प्रविभक्तानामर्थवत्ता न विद्यते" । इति । यथोच्यते न हि के चिदित्यादि ॥ ३२५ऽऽ ॥

ननु वाक्यार्थस्यापि कस्य चिदपरिपूर्णत्वे किं तस्याप्यपरवाक्यार्थनिबन्धनत्वमङ्गीकार्यमित्याशङ्क्याह ॥

(१) निविष्टेति २ पु० पाठः ।

सापेक्षा ये तु वाक्यार्थाः

पदार्थैरेव ते समाः ॥ ३२६ ॥

एतदुक्तं भवति । अवान्तरवाक्यार्थाः साकाङ्क्षत्वात्पदार्थतुल्या एवेति न तत्र वाक्यार्थव्यपदेशः कार्यः ॥ ३२६ ॥

अथ यत्रैकस्मात्पदान्निराकाङ्क्षोऽर्थः प्रतीयते तत्रापि किं तस्याऽसत्यार्थत्वं युक्तमभिधातुमित्याशङ्क्याह ॥

वाक्यं तदपि मन्यन्ते

यत्पदं चरितक्रियम् ॥ ३२६ऽऽ ॥

एतदुक्तं भवति । सन्ति वाक्येषु वाक्यैकदेशाः प्रसिद्ध्यादिना वाक्यार्थप्रत्यायका इति तदप्येकपदं वाक्यमेव । यस्मात्तच्चरितक्रियमिति चरिता गर्भीकृता आख्यातक्रिया यस्य तद्गर्भीकृतक्रियापदं नामपदं वाक्यं प्रयुञ्जते चरितक्रियापदादस्मादर्थावगतिर्निराकाङ्क्षोपजायमाना दृश्यतइति पदमात्रस्यैवात्र वाक्यत्वम् ॥ ३२६ऽऽ ॥

एवं यथा नामपदं केवलमपि गर्भीकृताख्यातं निराकाङ्क्षार्थप्रत्यायनाद्वाक्यमेवेति तत्प्रत्यायितादर्थात्प्रवृत्तिपर्यन्तव्यवहारसिद्धौ सत्यतैव तदर्थस्य तथैवाख्यातं केवलमर्थौचित्या(१)द्दिवशाद्विशिष्टाभिधायकं वाक्यमेवोच्यतइत्याह ॥

आख्यातशब्दे नियतं

साधनं यत्र गम्यते ॥ ३२७ ॥

तदप्येकं समासार्थं(२)

वाक्यमित्यभिधीयते ॥ ३२७ऽऽ ॥

यथा वर्षतीत्युक्ते देवो जलमिति कर्त्तृकर्माक्षेपात्परिपूर्णार्थत्वे व-

(१) औचित्येति २ पु० पाठः ।

(२) समाप्तार्थमिति २ पु० पाठः ।

र्षति देवी जलमिति यथा वाक्यमेवं तदप्येकं पदं समासार्थं(१) परिपूर्णार्थं वाक्यमेवाभिधीयते । तदुक्तमादावेव आख्यातशब्द इति वाक्यमित्यर्थः ॥ ३२७ऽऽ ॥

अत्र मीमांसकः प्राह ॥

शब्दव्यवहिता बुद्धि-
रप्रयुक्तपदाश्रया ॥ ३२८ ॥
अनुमानात्तदर्थस्य
प्रत्यये हेतुरुच्यते ॥ ३२८ऽऽ ॥

केवलात्पदाद्या साधुवद्भावना बुद्धिः सा साधुवदर्थस्य तस्याप्रयुक्तस्य पदान्तरस्य यो ऽर्थस्तस्य हेतुरुच्यते । कीदृशी शब्दव्यवहिता । यथा धूमेन स्वार्थानुमाने शब्दमन्तरेण वह्नेराक्षेपः नैवमत्रापि श्रुतार्थापत्त्या परिकल्पितो यो ऽसौ तिष्ठत्यादिशब्दः तेन व्यवहिता । अथ तस्याऽश्रवणात्कथं तद्व्यवहितेत्याशङ्क्याह । अप्रयुक्तपदाश्रयेति । अप्रयुक्तमनुच्चारितं वाचकं श्रुतार्थापत्त्याक्षिप्तमाश्रयो द्वारमुपायस्तिष्ठत्याद्यर्थप्रत्यये यस्याः सा तथेति कस्मात्तदर्थस्य प्रत्यये हेतुरित्याह । अनुमानादिति । तिष्ठत्यादिकं शब्दं श्रुतार्थापत्त्योपस्थापितमनुमायाक्षिप्यासौ बुद्धिस्तदर्थप्रत्ययमुपजनयतीति यावत् । अतो न केवलमेव नामपदं सक्रियस्यार्थस्य वाचकम् । आख्यातं च ससाधनस्येति कथमुच्यते सन्ति वाक्येषु वाक्यैकदेशा वाक्यार्थप्रतिपादका इति ॥ ३२८ऽऽ ॥

श्रुतार्थापत्त्या शब्दाभिसंबन्धस्य किं प्रयोजनमेकपदादेव तस्माद् वृक्षस्तिष्ठतीत्यादिवन्निराकाङ्क्षार्थप्रत्यायनमुक्तं कथं वाक्यैकदेशस्य सकलवाक्यार्थप्रतिपादकत्वमन्तरेण शब्दान्तरपरिकल्पनं युज्यतइति

(१) समाप्तार्थमिति ३ पु० पाठः ।

परमतमाशङ्ख्याह ॥

यस्मिंस्तूच्चरिते शब्दे
यदा यो ऽर्थः प्रतीयते ॥ ३२९ ॥
तमाहुरर्थं तस्यैव
नान्यदर्थस्य लक्षणम् ॥ ३२९ऽऽ ॥

इह यस्मादुच्चरितादर्थप्रत्ययो दृश्यते तं तस्यार्थमाहुः । वृक्ष इत्यस्मादेव चार्थप्रकरणादिना वृक्षस्तिष्ठतीत्यर्थप्रतीतिः एतदेवार्थवाचकत्वाद्वाक्यमित्युक्तमेव ॥ ३२९ऽऽ ॥

एवं कृत्वा क्रियार्थोपपदस्येत्यनेन नारम्भणीयैव चतुर्थी तादर्थ्येन सिद्धत्वादित्याह ॥

क्रियार्थोपपदेष्वेवं
स्थानिनां गम्यते क्रिया ॥ ३३० ॥

क्रियार्थोपपदेषु विषये क्रियार्थोपपदानां चेति षष्ठीप्रयोगे सप्तमी । स्थानिनामप्रयुक्तानां धातूनां संबन्धिनी क्रियाहरणलक्षणा एधेभ्यो व्रजतीत्यत्रैधशब्द एव हरणमभिदधातीत्येधाहरणार्थं व्रजतीति प्रतीतिः । अतस्तादर्थ्यं स्फुटमेवेति सिद्धा चतुर्थी । एवं च कृत्वा वृत्तौ निरादयः क्रान्ताद्यर्थप्रतिपादका इत्याह ॥

वृत्तौ निरादिभिश्चैव
क्रान्ताद्यर्थो ऽवगम्यते ॥ ३३०ऽऽ ॥

निष्कौशाम्बिरित्यादौ निरादय एव सामर्थ्यात् क्रान्तार्थप्रतिपादका इति गतार्थत्वात् क्रान्तादीनां शब्दानां वृत्तावप्रयोग एव । उक्तं च "उपसर्गा ह्येवमात्मका यत्र क्रियावाची शब्दः श्रूयते तत्र क्रियां विशिंषन्ति अन्यत्र क्रियाविशिष्टं साधनमाहु"रिति ॥ ३३०ऽऽ ॥

यद्येवं वृक्षस्तिष्ठति निष्क्रान्तः कौशाम्ब्या इत्यादौ तिष्ठत्यादीनां किं प्रयोगेण केवलं वृक्ष इत्यादिकं सर्वत्र नामपदमाख्यातं वा प्रयुज्यतां केवलैरेव सर्वत्र वाक्यार्थप्रतिपादनमित्याह ॥

तानि शब्दान्तराण्येव ॥ ३३४ऽ ॥ (१)

केवलो वृक्षशब्दो वाक्यार्थप्रतिपादको ऽन्य एव वृक्षस्तिष्ठतीति चान्यदेव वाक्यं सादृश्याद् वृक्षस्तिष्ठतीत्यत्र वृक्षशब्दं वृक्ष इत्येकपदे वाक्ये ऽभिमन्यतइति भवत्वेवं सर्वदा वृक्षशब्द एव केवलः किं न प्रयुज्यते तत एव हि सामर्थ्यादिना वृक्षस्तिष्ठतीत्यर्थप्रतीतेः किमनेन विततेन वृक्षस्तिष्ठतीत्यादिकेन प्रयुक्तेनेत्याह ॥

पर्याया इव लौकिकाः ॥ ३३४ऽऽ ॥

एतदुक्तं भवति । लौकिके शब्दव्यवहारे लाघवं प्रत्यनादरात् क्व चिद् वृक्षः क्व चिद् वृक्षस्तिष्ठतीति प्रयुज्यते । यथा तरुशब्देनैव लाघवाद् वृक्षार्थप्रतीतौ पादपशब्दं प्रयुञ्जतएव लौकिका इति न कश्चिद्दोषः । अथ वृक्ष इति केवलं नामपदं क्व चिद् वृक्षो दृश्यतां क्व चिद् वृक्षो ऽस्तीत्येवंविधस्य नियतस्यार्थस्य विशेषभेदेन कथं प्रतिपादकं स्यादित्याह ॥

अर्थप्रकरणाभ्यां तु
तेषां स्वार्थो नियम्यते ॥ ३३५ ॥

एषामेकपदार्थानां वाक्यानां प्रतिनियतो ऽर्थो ऽर्थप्रकरणाभ्यां व्यवस्थाप्यते ॥ ३३५ ॥

एवमखण्डवाक्ये वाक्यार्थे सत्यरूपे स्थिते किं पदपदार्थानां वाक्यानां पदविभागपदभागार्थकल्पनयेत्याह ॥

---

(१) २८७ श्लोकमारभ्यैतत्पर्यन्तं प्रमादाच् श्लोकाङ्कव्यत्यासो जातः, स शुद्धिपत्रे स्फुटीकृत्य शोधयिष्यते ।

प्रतिबोधाभ्युपायास्तु
ये तं तं पुरुषं प्रति ॥ ३३५ऽऽ ॥

एतदुक्तं भवति । ये वाक्यार्थप्रतिबोधनोपायास्ते प्रतिनियतपुरुषसमाश्रयाः । ते चासत्यरूपा एव च पदपदार्था इत्याह ॥

नावश्यं ते ऽभिसंबद्धाः
शब्दा ज्ञेयेन वस्तुना ॥ ३३६ ॥

ज्ञेयेन वाच्येन वस्तुना सत्यरूपेण लौकिकेन नैवं ते ऽवश्यं संबद्धा इत्यसत्यभूता इत्युच्यन्त इति ॥ ३३६ ॥

अथ यस्मिन्नुच्चरितइत्यादिकं यदि शब्दार्थलक्षणमाश्रीयते तदा शब्दादुच्चरितात्प्रतिपत्तुरन्याक्षिप्तचित्तत्वादकृतसङ्केतत्वाद्वा ऽसत्यामर्थप्रतिपत्तौ कुतश्चिद् भ्रमाद्वा ऽन्यथा प्रतिपत्तौ तदर्थानवगतेरनित्यत्वमेवशब्दार्थसम्बन्धस्य स्यात्, न चैतद्युक्तमिति श्रुतार्थापत्तिवादी प्रतिपादयितुमाह ॥

असत्यां प्रतिपत्तौ च मिथ्या वा प्रतिपादने ।
स्वैरर्थैर्नित्यसम्बद्धास्ते ते शब्दा व्यवस्थिताः ॥ ३३७ ॥

ते ते शब्दा नित्यत्वाच्छब्दसम्बन्धस्य नियतार्थप्रतिपादका एव व्यवस्थिताः ॥ ३३७ ॥

कुतश्चिन्निमित्तादर्थानवगतौ शब्दार्थसम्बन्धहानिः प्राप्नोति तस्मादेकपदेषु पदान्तराध्याहारेण वाक्यार्थावगतिरुपपन्नेति प्रतिपादयितुमाह ॥

यथाप्रकरणं द्वारमित्यस्यां कर्मणः श्रुतौ ।
बधान देहि वेत्येतदुपायादधिगम्यते ॥ ३३८ ॥

प्रकरणानतिक्रमेण साधनं क्रियाया अविनाभावितया आक्षेपकं भवतीति द्वारंद्वारमित्यत्र कर्मश्रुतिर्बधान देहि वेति एतमर्थं

प्रकरणादेरुपायात्तद्वाचकद्वारेणाक्षिपतीत्येतदेव युक्तम् ॥ ३३८ ॥

एवं यस्मिन्नुच्चरितइत्यादिके(१) शब्दार्थलक्षणे शब्दार्थसम्बन्धस्या-नित्यत्वमभिधाय दूषणान्तरमभिधातुमाह ॥

यत्र साधनवृत्तिर्यः शब्दः सत्त्वनिबन्धनः ।
न सप्रधानभूतस्य साध्यस्यार्थस्य वाचकः ॥ ३३६ ॥

यस्मात्साधनवृत्ताभिधायी सत्त्वप्रधानः शब्दो न स एव प्रधान-भूतस्या[र्थस्य प्रतिपाद्यस्यासत्त्वभूतस्या](२)भिधायक उपपद्यते वि-रोधात् ॥ ३३६ ॥

तस्मादिदमत्र वक्तुं युक्तमित्याह ॥

स्वार्थमात्रं प्रकाश्यासौ
साकाङ्क्षो विनिवर्त्तते ।
अर्थस्तु तस्य सम्बन्धी
प्रकाशयति संनिधिम् ॥ ३४० ॥

असावाख्यातशब्दो नामशब्दो वा स्वार्थमेव केवलं प्रतिपाद्य सा-पेक्षः साकाङ्क्ष एव विनिवर्त्तते तस्य विनिवृत्तस्य सम्बन्धी त्वर्थः अ-र्थान्तरस्य तद्वाचकशब्दप्रकल्पनद्वारेण संनिधिमुपकल्पयति ततश्च वाक्यार्थप्रत्ययः परिपूर्ण उपजायतइत्येव युक्तमिति ॥ ३४० ॥

इदानीमखण्डवादी श्रुतार्थापत्तिवादिनं निराकर्त्तुमाह ॥

पारार्थ्यस्याविशिष्टत्वा-
न्न शब्दाच्छब्दसन्निधिः ।
नार्थाच्छब्दस्य सांनिध्यं
न शब्दादर्थसंनिधिः ॥ ३४१ ॥

---

(१) इत्यादिकमिति २ पु० पाठः ।
(२) [ ] एतन्मध्यस्थं २ पु० नास्ति ।

इह पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र भोजनं विना पीनत्वं देवदत्तस्यानुपपद्यमानं रात्रिभोजनं तद्वाचकशब्दपरिकल्पनद्वारेण गमयतीत्युच्यते तदत्र किं शब्देन शब्द आक्षिप्यते उतार्थेन शब्दः आहो स्विच्छब्देनार्थः उतार्थेनार्थ इति चतुष्टयी गतिः तत्र शब्देन शब्दस्याक्षेपो न युज्यते स्वार्थप्रतिपादनएव शब्दाक्षेपात् तत्राह "न शब्दाच्छब्दसंनिधिरि"ति अथार्थेन शब्दाक्षेप इत्युच्यते तत्राह "नार्थाच्छब्दस्य सान्निध्यमि"ति नापि(१)शब्दाक्षेपो युज्यते वाच्ये तु वाचकमाक्षिपतीति युक्तम्। अतो ऽन्यशब्दार्थस्य शब्दान्तरस्य च वाच्यवाचकता(२)विरहात्कथमर्थेन शब्दस्याक्षेपः । अथ शब्देनोच्चारितेन श्रुतार्थापत्तिपरिकल्पितशब्दवाच्यो ऽर्थ आक्षिप्यते इत्युच्यते तदप्यनुपपन्नमित्याह "न शब्दादर्थसंनिधिरि"ति न शब्दाच्छब्दान्तरवाच्यस्यार्थस्य सन्निधिरुपपद्यते वाच्यवाचकभावाभावादेवेति कथं शब्देनार्थस्याक्षेपः अथार्थेनार्थो गम्यत इत्युच्यते अनुमानमेवैतत्स्पष्टं भवति न शब्दार्थस्यासावर्थ इति शब्दैकत्वमेव परित्यक्तं स्यात् । अत एवात्र चतुर्थपक्षप्रदर्शनमौचित्यं न जहातीति तन्निरासो न कृत एव । तस्मादेकपदेषु श्रुतार्थापत्त्या शब्दान्तराक्षेपे वाक्यार्थावगतिरिति यत्किञ्चिदेतत् । एकपदमेव शब्दान्तराभिसम्बन्धमन्तरेण प्रकरणादिवशात्तत्तदर्थप्रत्यायननिपुणमित्येव मन्तव्यम् ॥ ३४१ ॥

पुनः श्रुतार्थापत्तिवाद्याह ॥

नष्टरूपमिवाख्यातमाक्षिप्तं कर्मवादिना ।
यदि प्राप्तं प्रधानत्वं(३)युगपद्भावसत्त्वयोः॥ ३४२ ॥

द्वारं द्वारं कर्म इत्यत्र कर्मपदेनैवाख्यातमसत्कल्पमाक्षिप्तं यद्यत्रो-

(१) नार्थेनापीति २ पु० पाठः ।
(२) वाचकभावेति २ पाठः ।
(३) प्रधानं चेति २ पु० पाठः ।

ष्यते तदा युगपत्परस्परविरुद्धयोः सिद्धासिद्धयोरर्थयोरेकस्मिन् शब्दे प्रधानत्वेन वाच्यत्वमापतितं न चैतत्परिदृष्टं पूर्वं यत्र साधनवृत्तिरित्यनेन यः सत्त्वप्रधानो नासावाख्यातार्थवाचक उपपन्न इत्युक्तम् इदानीं पुनः प्रत्ययस्य च विरुद्धार्थवाचकत्वमुच्यत इति विशेषः॥ ३४२॥

सिद्धान्तवाद्याह॥

तैस्तु नामसरूपत्वमाख्यातस्योपवर्ण्यते॥ ३४२ऽऽ॥

द्वारं द्वारमित्येतदाख्यातमेव नामपदसरूपं तु वर्ण्यते अतस्त्वान्याख्यातवत्प्राधान्येन क्रियाया एतदपि नामपदसरूपं प्रतिपादकमेव यद्येवं कथमस्माद्द्वितीया श्रूयत इत्याह॥

अन्वयव्यतिरेकाभ्यां व्यवहारो विभज्यते॥ ३४३॥

भाण्डभाण्डं पिधेहि द्वारं द्वारं पिधेहीत्यादावाख्यातस्य क्रियाभिधायकत्वं परिदृष्टं नाम्नो द्रव्यवाचकत्वमित्यन्वयव्यतिरेकाभ्यामन्यत्राप्येकपदे द्वारमित्यादौ सादृश्यात्साधनाभिधायित्वमेवेति भवत्येव द्वितीया॥ ३४३॥

अथ द्वारं द्वारमित्यस्यानेकार्थवाचकत्वात्सन्देहे कथमस्य वाचकत्वं भवेदित्याह॥

न चापि रूपात्सन्देहे वाचकत्वं निवर्त्तते॥ ३४३ऽऽ॥

रूपसादृश्येपि सामर्थ्यादिना ऽर्थनिर्णयो व्यवस्थाप्यत इत्याह॥

अर्द्धं पशोरिव यथा सामर्थ्यात्तद्विकल्प्यते॥ ३४४॥

अत्र पश्ववयवोर्द्धं देवदत्तावयवो वार्द्धं पशुस्वामिकमिति सन्देहः तत्र किं संदेहे वाक्यमवाचकमेव अर्थप्रकरणादिनार्थस्तत्र कल्प्यत एव॥ ३४४॥

चोदयति॥

सर्व्वं सत्वपदं शुद्धं यदि भावनिबन्धनम्।

संसर्गे च विभक्तोऽस्य तस्यार्थो न पृथग्यदि ॥ ३४५ ॥

क्रियाप्रधानमाख्यातं नाम्नां सत्त्वप्रधानता ।
चत्वारि पदजातानि सर्वमेतद्विरुध्यते ॥ ३४६ ॥

स्पष्टोऽर्थः ॥ ३४६ ॥

एतच्चोद्यं निराकर्त्तुमाह ॥

वाक्यस्य बुद्धौ नित्यत्वमर्थयोगं च लौकिकम् ।
दृष्ट्वा चतुष्ट्वं नास्तीति वार्त्ताक्ष्यौदुम्बरायणौ ॥ ३४७ ॥

वाक्यस्याखण्डस्य बुद्धौ प्रतिपत्तबुद्धौ नित्यत्वं दृष्ट्वा तथा तस्यैवार्थेन प्रतिभालक्षणेन योगं सम्बन्धं दृष्ट्वा पदे तत्पदपरिकल्पनं पदार्थपरिकल्पनं च तत्रास्त्येव नैवोपपद्यतइत्याचार्यावाहतुः । अतोस्माकमेषा विभीषिका यत्पदानां चतुष्टं नोपपद्यतइति ॥ ३४७ ॥

यद्येवं किं शास्त्रेणेत्याह ॥

व्याप्तिमांश्च लघुश्चैव-
व्यवहारः पदाश्रयः ।
लोके शास्त्रे च कार्यार्थं
विभागेनैव कल्पितः ॥ ३४८ ॥

पदाश्रयो वाक्यव्यवहारः शास्त्रेणोपदिष्टः सन् व्याप्तिमान्सकलसाधुशब्दपरिज्ञानहेतुर्विभागेन परिकल्पित इति किमत्रानुपपन्नम् ॥ ३४८ ॥

अथ यदि पदपदार्थविभागः सर्वथैवासत्यभूतः तत्कथं लौकिकानां तदाश्रयेण वृत्त्यादय इत्याशङ्क्याह ॥

न लोके प्रतिपत्तॄणा-
मर्थयोगात्प्रसिद्धयः ।

तस्मादलौकिको वाक्या-
दन्यः कश्चिन्न विद्यते ॥ ३४९ ॥

लोके प्रतिपत्तॄणां सर्वथा न सत्यार्थयोगादेव प्रसिद्धयो व्यवहारनिष्पत्तयो सत्येनाप्युपायेन मरीचिकास्वपि जलप्रसिद्धिस्तेषां दृश्यते। अथ वा रेखागवयवदसत्येनाप्यनेनोपायेन सत्यभूतवाक्यपरिज्ञानं भवत्येव सर्वथा न लोकस्यार्थं विना प्रवृत्त्यादयो न सन्तीति वक्तव्यं कदा चित्सत्यगवयेन गवयार्थप्रतीतिरस्य जन्यते कदाचिद्रेखागवयेनेति बोद्धव्यम् । यत एवं तस्माद्वाक्यात्सत्यभूतादखण्डाद्वाक्यार्थप्रत्ययो जन्यत इति न कश्चिदलौकिकः सत्यभूतः पदार्थः पदं वा विद्यते उपपत्तिविरहादिति ॥ ३४९ ॥

ज्ञापकगम्यश्चार्थः सर्वत्र वाक्यादेवावगम्यत इत्याह ॥

अन्यत्र श्रूयमाणैश्च लिङ्गैर्वाक्येषु सूचिताः ।
स्वार्था एव प्रतीयन्ते रूपाभेदादलक्षिताः ॥ ३५० ॥

अक्ताः शर्करा उपदधातीत्यत्र तैलेन घृतेन वेति संदेहे ऽन्यत्र तेजो वै घृतमिति घृतस्य स्तुतिरुपक्रान्ता तयैतत्सूच्यते ऽभ्यञ्जनं घृतेनैवोपदिष्टमिति । अतो ऽत्राक्ता इत्यादौ वाक्ये घृताक्ता उपदधातीति वाक्यार्थो ज्ञायतइति विज्ञेयं यद्यक्ता इत्यस्यैव घृताक्ता उपदधातीत्यर्थो ऽवगतः किं ज्ञापकानुसारेणेत्याह "रूपाभेदादलक्षिताः" अक्ताः शर्करा उपदधातीति वाक्ये रूपमविशिष्टं पश्यन्तो विशेषमवगन्तुमक्षमा इति लिङ्गानुसरणेनात्रार्थनिर्णयो व्यवस्थाप्यतइति वाक्येषु वाक्यैकदेशाः सन्तीत्येतदप्रमाणमेव ॥ ३५० ॥

अथ बाध्यबाधकभावं निर्णेतुमाह ॥

उत्सर्गवाक्ये यत्त्यक्तमशब्दमिव शब्दवत् ।
तद्बाधकेषु वाक्येषु श्रुतमन्यत्र गम्यते ॥ ३५१ ॥

उत्सर्गवाक्ये सामान्यलक्षणे उपक्रमएव यत्यक्तमपवादाक्रान्तं किं तत्र शब्देन परित्यक्तं नेत्याह "अशब्दमिवे"ति बोधकविरहेणेव कथं त्यक्तं "शब्दवत्" बोधकवदेव त्यक्तं धातोः कर्मण्युपपदे ऽण्प्रत्ययस्तावदेव बाधकानाक्रान्तधातुविषयमेवाण्प्रत्ययविधानमिति गम्यतएव अन्यथा त्वविशेषेणप्रवृत्तावुत्तरकालमाकारान्तेभ्यः कथं निवार्यते। अतस्तात्पर्यपर्यालोचनवशाद्बाधकानाक्रान्तधातुविषये (१) भवतीति वाक्यार्थो ज्ञायतएव तद्दर्शिना एतत्तत्कालएव नावधारितमुत्तरकालं तु बाधकेषु वाक्येषु तच्छ्रुतं सदन्यत्र सामान्यलक्षणे वर्जितमिति गम्यते ॥ ३५१ ॥

लौकिकेन दृष्टान्तेनैतदेव व्याख्यातुमाह ॥

ब्राह्मणानां श्रुतिर्दधि प्रक्रान्ता माठरं विना ।
माठरस्तक्रसम्बन्धात्तत्राचष्टे यथार्थताम् ॥ ३५२ ॥

दधि ब्राह्मणेभ्यो दीयतामित्यत्र श्रुत्या माठरवर्जमेवात्र ब्राह्मणानां दधिदानमुपक्रान्तमिति बोद्धव्यमुत्तरकालं तक्रं माठरायेत्येतत्तत्र यथार्थबाधकविषयपरिहारेणैवार्थवत्तां गमयतीत्येव भिन्नवाक्यतासमाश्रयणेन तावदप्राप्त्यनुमानं बाध इति बोद्धव्यम् ॥ ३५२ ॥

इदानीमेकवाक्यतामेवाश्रित्योत्सर्गापवादयोर्बाध्यबाधकभावं दर्शयितुमाह ॥

अनेकाख्यातयोगे ऽपि वाक्यं न्याय्यापवादयोः ।
एकमेवेष्यते कैश्चिद्भिन्नरूपमिव स्थितम् ॥ ३५३ ॥

कैश्चित्प्राप्यापवादयोरुत्सर्गापवादयोराख्यातभेदेपि एकवाक्यतैवेष्यते भिन्नवाक्यतैव तत्कालं प्रतिभाति । वस्तुतस्त्वाकाङ्क्षायोग्यतासंनिधिवशादेकवाक्यतां गतं वाक्यं बोद्धव्यम् ॥ ३५३ ॥

---

(१) अण् प्रत्यय इत्यधिकं २ पु० पाठः ।

एवं सतीदं तत्र बोद्धव्यमित्याह ॥

नियमः प्रतिषेधश्च विधिशेषस्तथा सति ॥३५३ऽऽ॥

इको गुणवृद्धी इत्यादिको नियमः सार्वधातुकार्द्धधातुकयोरित्यस्य गुणविधेः शेषः तेन सहास्यैकवाक्यतायां सार्वधातुकार्धधातुकयोः परतो ऽङ्गस्येको गुणो भवतीत्येवं वाक्यार्थो ज्ञायते अन्यथाङ्गस्येगनिकोः स्थाने गुणवृद्ध्योः प्रवृत्तयोरुत्तरकालं नियमेन किमत्र कृत्यम् । उक्तं च यो हि भुक्तवन्तं ब्रूयान्मा भुङ्क्था इति किं तेन कृतं स्यादिति। तथा प्रतिषेधोपि विधिना सहैकवाक्यतां गत्वा साफल्यं भजतीत्याह"प्रतिषेधश्चे"ति प्रतिषेधश्च विधिशेष एव तथा सति बोद्धव्य इत्यर्थः । अलुगुत्तरपद इत्यनेनोत्तरपदे परतो लुक्प्रतिषेध उच्यमानः सुपो धातुप्रातिपदिकयोरित्यस्य लुग्विधेरङ्गभावमुपगच्छन्वाक्यैकवाक्यतयार्थप्रत्यायनं करोतीति बोद्धव्यम् । एतदेव दर्शयितुमाह ॥

द्वितीये यो लुगाख्यातस्तच्छेषमलुकम्विदुः ॥ ३५४ ॥

द्वितीये अध्याये य आख्यातो लुग्विधिः तस्य षाष्ठिकं लुक्प्रतिषेधं शेषमङ्गं विदुर्व्याख्यातार इति ॥ ३५४ ॥

अथ वाक्यभेदवाद्याह ॥

निराकाङ्क्षाणि निर्वृत्तौ प्रधानानि परस्परम् ।
तेषामनुपकारित्वात्कथं स्यादेकवाक्यता ॥ ३५५ ॥

निर्वृत्तौ विशेषपरिपूर्णतायां वाक्यानि निराकाङ्क्षाण्येव । अतः परस्परं प्रधानानि तान्यभिधीयन्ते न तेषामङ्गाङ्गिभाव इति अतः परस्परमुपकार्योपकारकभावाभावात्कथं तेषां निष्प्रयोजनापेक्षा परिकल्प्यते नैकवाक्यतेति पूर्वः पक्षः ॥ ३५५ ॥

अथैकवाक्यवाद्याह ॥

विशेषविधिना ऽर्थित्वाद्वाक्यशेषो ऽनुमीयते ।
विशेषवन्निवर्त्त्ये ऽर्थे तस्मात्तुल्यं व्यपेक्षणम् ॥ ३५६ ॥

उत्सर्गवाक्यशेषः सर्व्वत्रानुमीयते कस्मादित्याह "विशेषविधिने"-त्यादि । अन्यथा वाक्यान्तरवदविशेषेण तस्य प्रवृत्तिः स्यात् न चैतद्युक्तं ततश्च निवर्त्त्ये प्रतिषेध्येर्थे ऽपेक्षणमुपयुज्यतएव तस्मात् तयोः परस्परापेक्षणं तुल्यमेवेति कृत्वा ऽर्थपर्यालोचनावशेनाकाङ्क्षादिना परस्परसम्बन्धेनाङ्गाङ्गिभावापत्तावेकवाक्यतैव ज्यायसीत्युक्तम् ॥ ३५६ ॥

उद्धारेण वाक्येषु वाक्यैकदेशाः सन्तीति चतुर्भिः प्रकारैर्निरूपितम् । अर्थप्रकरणाभ्यां यथा वृक्ष इत्यादौ । प्रसिद्धेर्यथा वर्षतीत्यादौ । लिङ्गाद्यथा अक्ताः शर्करा इत्यादौ । आकाङ्क्षादिना वाक्यान्तरस्य सन्निधानाद्यथा दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेत्यादौ । यथा च कर्मण्यण् आतोनुपसर्गे क इत्यादौ ॥

इदानीमपोद्धारसमाश्रयणे प्रसङ्गात्पदेषु पदैकदेशाः सन्तीति विचारयितुं स्तौति ॥

संज्ञाशब्दैकदेशो यस्तस्य लोपो न विद्यते ।
विशिष्टरूपा सा संज्ञा कृता च न निवर्त्तते ॥ ३५७ ॥

इह देवदत्तादयः संज्ञाशब्दाः स्थिताः तत्र कदा चिद्देवः कदा चिद्दत्त इति प्रयुञ्जाना दृश्यन्ते तदेतत्कथमुपपद्यते यस्मात्तेषु संज्ञाशब्देषु एकदेशास्तेषां लोपस्तावच्छास्त्रे न क्वचिदुपदिश्यते उपदेशोपि तेन कर्त्तुं न पार्यतइत्याह "विशिष्टरूपे"त्यादि । यदा लोके नियतवर्णानुपूर्वीकः पदसमुदायः संज्ञात्वेन विनियुज्यते तदा तदन्तर्गता अवयवा विनियुक्ता एव, यथा वृक्षः प्रचलन् सहावयवैः प्रचलतीत्याचारानुरोधेन किमसौ न्यूनवर्णा वाचिका भवति सा

ह्वि नियतानुपूर्वीका परिपूर्णैव कता न निवर्त्तते ॥ ३५७ ॥

अथोच्यते दत्तशब्दादसौ सकला प्रतीता स्वसंज्ञिनं प्रत्याययती-त्याशङ्क्याह ॥

संज्ञान्तराच्च दत्तादेर्नान्या संज्ञा प्रतीयते ॥३५७ऽऽ॥

दत्तशब्दः स्वतन्त्रो ऽन्य एव कस्य चित्संज्ञान्तरं तस्मात्कथमन्या देवदत्तेति संज्ञा प्रतीयते शब्दान्तरत्वादकृतसङ्केतत्वाच्चेत्यभिप्रायः । नापि तद्वाच्यं संज्ञिनमवगमयितुमलं दत्तशब्द इत्याह ॥

संज्ञिनं देवदत्ताख्यं दत्तशब्दः कथं वदेत् ॥ ३५८ ॥

दत्तशब्दस्यान्य एव संज्ञी प्रत्याप्यस्तत्कथं शब्दान्तराभिधेयमसौ प्रत्यापयेत् तदेवं नियतवर्णानुपूर्व्वीकायास्तस्या लोपस्तावदेकदेशस्य नोपपद्यते नापि दत्तशब्दाद्देवशब्दाद्वा तदेकदेशभूतदेवदत्तशब्दप्र-तीतिरुपपद्यते तत्रापि (१) तद्वाच्यप्रतिपत्तिरिति यत्किञ्चिदेत-त् ॥ ३५८ ॥

अत्र मतान्तरं दर्शयितुमाह ॥

सर्व्वैरवयवैस्तुल्यं सम्बन्धं समुदायवत् ।
केचिच्छब्दस्वरूपाणां मन्यन्ते सर्व्वसंज्ञिभिः ॥३५९॥

सर्व्वैरवयवैस्तुल्यमेव समकालमेव संज्ञिनः सम्बन्धः कथं समुदा-यवत्, यथा समुदायस्तस्य वाचकत्वेन नियुक्तः तथा तत्कालएव तदवयवा अपीत्यतस्तदेकदेशस्तस्य प्रत्यायनं करोतीति को दो-षः ॥ ३५९ ॥

अत्र दूषणद्वयं दर्शयितुमाह ॥

वर्णानामर्थवत्त्वं तु
संज्ञानां संज्ञिभिर्भवेत् ॥ ३५९ऽऽ ॥

(१) न चापि इति २ पु० पाठः ।

संज्ञानां ये वर्णास्तेषां संज्ञिनार्थवत्त्वं प्राप्नोति ततः स्वाभिमतैकदेशवदेकोपि वर्णो वाचकः स्यात् न चैतत्परिदृष्टम् । अपि च तदवयवः पृथग्वाचको नोपपद्यतइत्याह ॥

सम्बन्धो ऽ(१)वयवः
संज्ञाप्रविवेकेन कल्प्यते(२) ॥ ३६० ॥

योसौ भवता वाचको ऽवयव एकदेशः परिकल्प्यते स सम्बद्ध एव वाचकत्वेन विनियुक्तः समुदायाच्च तस्य प्रविवेके पृथग्भावे वाचकत्वं न कल्प्यते विलक्षणत्वात् ॥ ३६० ॥

एतदेवापरेण श्लोकेन प्रतिपादयितुमाह ॥

सर्वस्वरूपैर्युगपत् सम्बन्धे सति संज्ञिनः ।
नैकदेशसरूपेभ्यस्तत्प्रत्यायनसम्भवः ॥ ३६१ ॥

युगपत्सर्वावयवस्वरूपैः सम्बन्धेनैकदेशास्तद्वाचका उपपन्नाः अथ वा तदेकदेशास्ते न भवन्तीति प्रतिपादयितुमाह "नैकदेशसरूपेभ्य" इत्यादि । एकदेशसरूपेभ्य इत्युक्तम् । एकदेशसदृशास्ते दत्तादयः न पुनस्तदेकदेशा इति ॥ ३६१ ॥

मतान्तरमाह ॥

एकदेशात्तु सङ्घाते केषां चिज्जायते स्मृतिः ।
स्मृतेस्तु विषयाच्छब्दात्सङ्घातार्थः प्रतीयते ॥ ३६२ ॥

स्पष्टो ऽर्थः ॥ ३६२ ॥

एतन्निराकर्त्तुमाह ॥

एकदेशात्स्मृतिर्भिन्ने
सङ्घाते जायते कथम् ।

---

(१) संबद्ध इति २ पु० पाठः ।

(२) कल्पतइति २ पु० पाठः ।

कथं प्रतीयमानः स्या-

च्छब्दो ऽर्थस्याभिधायकः ॥ २६३ ॥

सदृशवस्तुसन्दर्शनात् स्मृतिरुपजायतइति प्रसिद्धं तत्र सङ्घाते भिन्नस्वरूपे कथं तस्मात्स्मृतिः कथं च तस्मात्प्रतीयमानो देवदत्तस्य संज्ञिनो ऽभिधायक उपपद्यते प्रतीयमानस्य वाचकत्वे ऽतिप्रसङ्गः स्यात् श्रुतिपथमवतीर्णाः शब्दा वाचका इति प्रसिद्धम् ॥ २६३ ॥

(१)सिद्धान्तमाह ॥

एकदेशसरूपास्तु

तैस्तैर्लिङ्गैः समन्विताः ।

अनुनिष्पादिनः शब्दाः

संज्ञासु समवस्थिताः ॥ २६४ ॥

यदा तु समुदायः संज्ञात्वेन विनियुज्यते तदैव तदन्तर्गतावयवसरूपा अपि संज्ञात्वेन विनियुज्यन्तइति तेष्वनुनिष्पादिन्यायेन सिद्धाः संज्ञात्वेन बोद्धव्या इति ॥ २६४ ॥

तदन्तर्गतावयवसरूपा अनुनिष्पादिन्यायेन विनियुक्ता अपि साधारणत्वात्संज्ञिनमभिधातुमसमर्थाः । तथा हि । देवशब्दो देवानां वाचकः कस्य चित्संज्ञिनोपि तथा, दत्तशब्दः क्रियाशब्दो ऽपि संज्ञाशब्दोपि, तत्र कथं नियतस्य संज्ञिनस्तेभ्यः प्रतिपत्तिः स्यादित्याशङ्क्य नियतार्थतामेषां समर्थयितुमाह ॥

साधारणत्वात्संदिग्धाः

सामर्थ्यान्नियताश्रयाः ।

तेषां ये साधवस्तेषु

(१) इदानीमित्यधिकं २ पु० पाठः ।

शास्त्रे लोपादि शिष्यते ॥ ३६५ ॥

सामर्थ्यादिभिर्नियताश्रयाः संज्ञाभिधायका व्यवस्थाप्यन्ते तेषामनुनिष्पादिनामेव शास्त्रे लोपादिविधिप्रणालिकया साधुत्वमुच्यतइत्याह। तेषामित्यादि। तेन देवदत्ते स्वतन्त्रः क्रियावाचकदत्तशब्दसाधारणो दत्तसंज्ञाशब्दः देवोपि संज्ञाशब्दो ऽनुनिष्पादित्वान्न तदन्तर्गता अपीति बोद्धव्यम् । एतदेव शास्त्रे लोपादिद्वारेणान्वाख्यायते यथोक्तं "चतुर्थादनजादौ च लोपः पूर्वपदस्य चे" त्यादि ॥ ३६५ ॥

एतत्स्फुटीकरणायाह ॥

तुल्यायामनुनिष्पत्तौ
ज्ये द्रा घा इत्यसाधवः ।
न ह्यन्वाख्यायके शास्त्रे
तेषु दत्तादिवत्स्मृतिः ॥ ३६६ ॥

समुदाये यथा पदान्यनुनिष्पादिन्यायेन तत्र विनियुज्यन्ते नैवमत्र समानायामप्यनुनिष्पत्तौ वर्णानां वर्णा विनियुज्यन्ते अतश्च ज्येष्टादिषु न ज्यादयो वर्णमात्रा वृद्धव्यवहारे साधवो ऽभ्यनुज्ञायन्तइति शास्त्रेप्यन्वाख्यायकेन तथाभूतानामनुगमः क्रियतइति बोद्धव्यम् । अतो नैते घादयो वर्णा मघादिवाच्येष्वर्थेषु वाचका इति ॥ ३६६ ॥

अथ पदेषु पदैकदेशाः सन्तीति विचारप्रस्तावे संज्ञाशब्दानां शब्दार्थसम्बन्धस्यानित्यत्वमाशङ्क्य समर्थयितुमाह ॥

कृतणत्वाश्रये शब्दा नित्यं खरणसादयः ।
एकद्रव्योपदेशित्वात्तान् साधून् संप्रचक्षते॥३६७॥

इह संज्ञाशब्दानां संज्ञिसम्बन्धात्प्राग्लक्षणयोग उत तदुत्तरकालं यदा प्राक् तदासौ न कस्य चित्संज्ञेति तन्निबन्धनं कार्यं कथं स्यात्।

अत्रोच्यते । अत्र संज्ञासंज्ञिसम्बन्धात्संज्ञात्वं तत्र लक्षणमिति । अथो-त्तरकालं संज्ञात्वं तदा चाकृतणत्वोसौ शब्दः संप्रति णत्वं भजत-इत्यनित्यत्वं शब्दानां स्यादित्याशङ्काह "कृतणत्वा" इत्यादि । इह द्वौ राशी कृतणत्वानामेको राशिर्नित्य एव अकृतणत्वानामपर इति तत्र ये कृतणत्वास्ते साधवो नित्या एव एकद्रव्योपदेशित्वात्स्वभावे-नैव ते संज्ञाशब्दा इत्यर्थः । शास्त्रे 'पूर्वपदात्संज्ञायामग' इत्यनेन कृ-तणत्वानामेव तेषां साधुत्वमन्वाख्यायतइति कृतणत्वता शास्त्रे प्र-क्रियासमाश्रयणेनैषामुक्तेति न कश्चिद्विरोधः ॥ ३६७ ॥

एतदेव प्रतिपादयितुमाह ॥

गोत्राण्येव तु तान्याहुः संज्ञाशक्तिसमन्वयात् ।
निमित्तापेक्षणं तेषु स्वार्थेनावश्यमिष्यते ॥ ३६८ ॥

संज्ञाशब्दकुलानि व्यवस्थितानि न तेषु स्वार्थे संज्ञिनि निमित्ता-न्वेषणमिष्यते नित्यत्वाच्छब्दार्थसम्बन्धस्य,तद्वाचकास्ते स्ववाच्ये निय-ता इति स्वरूपव्यतिरेकेण निमित्तान्तरान्वेषणमव्यापकमेव॥ ३६८ ॥

ननु च नित्यत्वं संज्ञाशब्दानामनुपपन्नं सम्प्रति क्रियमाणत्वात् यस्मात्पुरुषेच्छया यथा कथञ्चिन्नियुज्य संज्ञाः क्रियन्ते उक्तं च "कृ-तकत्वादनित्यत्वं सम्बन्धस्योपजायते । संज्ञायाः सा हि पुरुषैर्यथा-कामं नियुज्यते" यथा हि पांसुरेखाणां बालकैर्मधुरादयः । संज्ञाः क्रियन्ते संज्ञासु सर्वास्वेषैव कल्पनेत्याशङ्क्य समर्थयितुमाह ॥

व्यवहाराय नियमः संज्ञानां संज्ञिनि क्वचित् ।
नित्य एव तु सम्बन्धो डित्यादिषु गवादिवत् ॥३६९॥

संज्ञाशब्दानां क्वचित्संज्ञिनि, यदि परं व्यवहारार्थं पुरुषैर्नियम-मात्रं क्रियते । यथा ऽस्मिन् गृहे ऽद्यप्रभृति डित्थशब्दवाच्यो ऽयमिति बोद्धव्यं, शब्दार्थसम्बन्धस्तु डित्यादिष्वनादिर्योग्यतालक्षणो नित्य एष

यदुक्ष्यति "इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा । अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथे"ति । तदेवं यथा गवादिष्वनादियोग्यतासम्बन्धाद्वाचकत्वं गोशब्दादीनां तथैव डित्थादीनां बोद्धव्यम् ॥ ३६९ ॥

शास्त्रेपि तथैव व्यवहारनियमः संज्ञाशब्दानामवसातव्य इत्याह ॥

वृद्ध्यादीनां च शास्त्रेऽस्मिञ्छक्त्यवच्छेदलक्षणः ।
अकृत्रिमोऽभिसम्बन्धो विशेषणविशेष्यवत् ॥ ३७० ॥

शास्त्रे वृद्ध्यादीनां संज्ञाशब्दानां(१)सर्वार्थप्रकाशनशक्तियोगः संज्ञिनामादैजादीनां च सर्वशब्दवाच्यता योग्यता, अतः केवलं शास्त्रे संज्ञान्तरादवच्छिद्यादैजादिप्रत्यायनएव शक्तिर्वृद्ध्यादीनां नियम्यते आदैजादीनां वृद्ध्यादिशब्दवाच्यत्वमेव व्यवस्थाप्यते इति सहजशक्तिप्रतिनियम एव वाच्यवाचकयोरुच्यते, न पुनः कृत्रिमसम्बन्धाधानं विज्ञेयं, यथा विशेषणविशेष्ययोरनादिः शब्दवाच्यतात्मक एव सम्बन्धो न पुनस्तत्र पुरुषेणानीलादियोगः क्रियतइति ॥ ३७० ॥

अथ संज्ञाप्रवृत्तिनिमित्तं विचारयितुमाह ॥

संज्ञास्वरूपमाश्रित्य निमित्ते सति लौकिकी ।
का चित्प्रवर्त्तते का चिन्निमित्तासंनिधावपि ॥ ३७१ ॥

सर्वसंज्ञाशब्दानां स्वरूपमेव प्रवृत्तिनिमित्तं बोद्धव्यम् । तस्मिन् सति कुत्र चिदर्थानुपात्तं(२) निमित्तं विद्यते कुत्र चित्तस्याभाव एव डित्थादाविति केश्चित्तत्राप्युच्यतएव ॥ ३७१ ॥

न केवलं तत्रैकाक्षराणां स्वरूपमेव प्रवृत्तिनिमित्तं विद्यते यावन्महतीनामपि स्वरूपमेवोपनिबन्धनं प्रवृत्तिनिमित्तं बोद्धव्यमित्याह ॥

---

(१) संज्ञाशब्दानामिति २ पु० नास्ति ।
(२) अर्थानुगतमिति २ पु० पाठः ।

शास्त्रे तु महती संज्ञा स्वरूपोपनिबन्धना ।
अनुमानं निमित्तस्य संनिधाने प्रतीयते ॥ ३७४ ॥

केवलं तत्र निमित्तस्यावयवार्थस्य संनिधाने सत्यनुमानं तत्सञ्ज्ञात्वे प्रतीयते अनुमानेनावयवार्थोऽपि तत्र निमित्तमिति प्रतीयतइत्यर्थः ॥ ३७४ ॥

कथं तदनुमानमित्याह ॥

आवृत्तेरनुमानं वा सारूप्यात्तत्र गम्यते ।
शब्दभेदानुमानं वा शक्तिभेदस्य वा गतिः ॥ ३७५ ॥

स एक एव द्विरावर्त्तते तत एकेन स्वरूपनिरूपितसंज्ञिनः प्रतिपत्तिरपरेणावयवार्थनिबन्धनता व्यवस्थाप्यते । नन्वावृत्तिरनुमीयते किं यदिह तत्र तवाभीष्टं स्यात् द्विधोच्चारणादित्याह "सारूप्यादिति" सारूप्यादेक एवोच्चारितः शब्द इति गम्यते । अथ वा तन्त्रेण द्वावेव शब्दावुच्चारिताविल्यनुमीयत इत्याह "शब्दभेदानुमानं वे"ति । तत एकेन स्वरूपाच्छादितसंज्ञिमः प्रतिपत्तिरपरेणावयवार्थनिबन्धनेति । तृतीयमपि पक्षं प्रदर्शयितुमाह "शब्दभेदस्य वा गतिरि"ति स एवैको द्विशक्तिरुच्चारितस्तत एकया संज्ञिनः प्रतिपत्तिरपरेणावयवार्थसङ्गतिरिति ॥ ३७५ ॥

इदानीं लौकिकस्याकृत्रिमस्य क्व चिद्ग्रहणं क्व चित् कृत्रिमस्य पारिभाषिकस्य क्व चिदुभयगतिरिह शास्त्रे सम्भवतीत्युभयोरपि कृत्रिमाकृत्रिमयोः क्व चिदकृत्रिमएव व्याप्तिः परिगृहीत इतरस्यापि विषयं व्याप्नोतीति चातुर्विध्यं संज्ञाशब्दानां प्रदर्शयितुमाह ॥

क्व चिद्विषयभेदेन कृत्रिमा व्यवतिष्ठते ॥ ३७५ऽऽ ॥

कृत्रिमा शास्त्रीया पारिभाषिक्युच्यते सा विषयभेदेन व्यवतिष्ठते

न तु सर्वत्र तथैव(१) । व्यवस्था यथा 'कर्त्तरि कर्मव्यतिहार' इत्यत्रा-कृत्रिमा गृह्यते व्यतिहारस्यात्र कृत्रिमसंज्ञाश्रयणानुपपत्तेः । 'कर्मण्यणि'त्यत्र कृत्रिमा शब्दवैरेत्यादावकृत्रिमा धात्वधिकारात्कृत्रिमाया अत्रानुपपत्तेः । 'कर्त्तृकरणयोस्तृतीये'त्यत्र कृत्रिमेति क्व चिदेकत्रो-भयरूपताया ग्रहणमिति दर्शयितुमाह ॥

संख्यायामेकविषयं व्यवस्थानं द्वयोरपि ॥ ३७६ ॥

संख्याविषये शास्त्रे कृत्रिमाकृत्रिमयोरपि समाश्रयणं शास्त्री-याया बहुगुणवतुडतीत्यादिकाया अपि कृत्रिमाया लौकिक्या अथ कृत्रिमाया विंशत्यादिकाया अतिशदन्ताया इति प्रतिषेधादत्र ज्ञा-पकाद्ग्रहणम् ॥ ३७६ ॥

क्व चिदकृत्रिमः संज्ञाशब्दो गृहीतः कृत्रिमस्यापि प्रत्यायनं करो-तीति प्रदर्शयितुमाह ॥

विषयं कृत्रिमस्यापि लौकिकः क्व चिदुच्चरन् ।
व्याप्नोति दूरात्संम्बुद्धौ तथा हि ग्रहणं तयोः॥३७७॥

लौकिको ऽकृत्रिमः संज्ञाशब्दः समुच्चरन् कृत्रिमस्यापि शास्त्रीय-स्य विषयं व्याप्नोति यथै'कश्रुति दूरात् सम्बुद्धावि'त्यत्र सम्बोधनं स-म्बुद्धिरिति लौकिकेन शास्त्रीयमप्ये'कवचनं सम्बुद्धिरि'ति गृह्यतएव तत्रापि सम्बोधनस्य विद्यमानत्वादित्यर्थः ॥ ३७७ ॥

अथेदानीं वाक्यविचारप्रस्तावे क्व चित्प्रत्येकं वाक्यपरिसमाप्तिः क्व चित्समुदायइति प्रदर्शयितुमाह ॥

सर्वैकशेषद्वन्द्वेषु के चित्सामर्थ्यलक्षणम् ।
प्रत्याश्रयमवस्थानं क्रियाणां प्रतिजानते ॥ ३७८ ॥

वाक्यवद्वाक्यार्थस्यापि प्रत्येकसमुदायपरिसमाप्तिं वाक्यपरिसमा-

(१) तथैवेति २ पु० पाठः ।

प्तिं प्रसङ्गान्मतभेदेन निरूपयति । तत्र वाक्यार्थस्य प्रत्येकपरिसमाप्तिरिति तावद्दर्शयति "सद्वैकशेषद्वन्द्वेष्वि"त्यादिना कदा चित्संघेनैकशेषेण द्वन्द्वेन वार्थप्रतिपादनं क्रियते यथा ब्राह्मणा भोज्यन्तां ब्राह्मणौ भोज्यतां देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्ताम् अत्र ब्राह्मणकर्त्तृकाया भुजिक्रियाया वाक्यार्थभूताया प्रत्याश्रयमवस्थानं प्रतिजानते ऽभ्युपगच्छन्ति कीदृशं "सामर्थ्यलक्षणमि"ति सामर्थ्यं समर्थभावात्मकं अग्रे निरूप्यमाणलक्षणं स्वरूपं यस्य तत्तथाविधं सामर्थ्यलक्षणत्वादित्यर्थः ॥ ३७८ ॥

अथ भुजिक्रिया कारकसमुदाय एव नाट्यक्रियावत् किं न समाप्यतइत्याह ॥

भोजनं फलरूपाभ्यामेकैकस्मिन्समाप्यते ।
अन्यथा हि व्यवस्थाने न तदर्थः प्रकल्प्यते(१)॥३७९॥

इहैकेन पादप्रक्षालनमपरेणासनउपवेशनमपरेणान्नदान(२) मन्येनान्ननिगरणमिति नैवं भुजिक्रिया निर्वर्त्तयितुमायाति यस्मादसौ भुजिक्रियाफलेन तृप्तिलक्षणेन रूपेणान्नदानादीनां चैकाधिकरणेन निर्वर्त्त्यते, तथा नाश्रयणेन भुज्यर्थानिष्पत्तेः, भिन्नाधिकरणा सा स्वरूपं न प्रतिभजतइति प्रत्यक्षसिद्धमेव ॥ ३७९ ॥

एतदेव स्फुटयितुमाह ॥

अन्नादानादिरूपां(३) च सर्वे तृप्तिफलां भुजिम् ।
प्रत्येकं प्रतिपद्यन्ते न तु नाट्यक्रियामिव ॥ ३८० ॥

नियतस्वरूपा हि वस्तुगतयो दृश्यन्ते, नाट्यक्रिया ऽनेकसाधनसाध्या सती फलवत्युपजायते भुजिक्रिया त्वेकैककारकनिर्वर्त्त्येति वस्तु-

(१) प्रकल्पतइति २ पु० पाठः ।
(२) अन्नादानमिति २ पु० पाठः ।
(३) अन्नदानादिरूपामिति २ पु० पाठः ।

गतिः ॥ ३८० ॥

एतदेव दृष्टान्तान्तरेण व्याचष्टे ॥

पाद्यवत्सा विभागेन सामर्थ्यादवतिष्टते ।
भुजिः करोति भुज्यर्थं न तन्त्रेण प्रदीपवत् ॥३८१॥

श्राद्धकर्मणि ब्राह्मणेषु कर्त्री यथा पाद्यमनेकाधिकरणं तदभ्यर्चनायोपकल्प्यते (१) तथैवेयं भुजिक्रिया सामर्थ्याद्वस्तुस्वाभाव्याद्विभागेनैवावतिष्ठतइति, न तु तन्त्रेण साधारण्येनासौ प्रदीपवदेकाधिकरणेव भुज्यर्थं तृप्तिलक्षणं करोति ॥ ३८१ ॥

अथ भुजिक्रियावदन्यासामपि क्रियान्तरसमाश्रयणेन समुदायपरिसमाप्तिमुपदर्शयितुमाह ॥

दृश्यादिषु क्रियैकापि तथाभूतेषु कर्मसु ।
आवृत्तिमन्तरेणापि समुदायाश्रया भवेत् ॥३८२॥

देवदत्तयज्ञदत्तविष्णुमित्रा दृश्यन्तामित्यत्र दृशिक्रिया तथाभूतेषु योग्यदेशस्थितेषु विषये प्रत्येकपरिसमाप्तिं विना भुक्तिव(२)न्नोपपद्यतइति नोच्यते, युगपदेवात्र दर्शनक्रियाधिगमफला समुदायमाप्नोतीत्यसौ समुदायाश्रया भवेत् ॥ ३८२ ॥

अथ पच्यादिक्रिया किं समुदायपरिसमाप्ता किं वा प्रत्येकं समाप्तेत्याशङ्क्याह ॥

भिन्नव्यापाररूपाणां व्यवहारादिदर्शने ।
कर्तॄणां दर्शनं भिन्नं संभूयार्थस्य साधकम् ॥ ३८३ ॥

देवदत्तः काष्ठैः स्थाल्यामोदनं पचति विक्लिद्यतस्तण्डुलान् विक्लेदयतीत्यत्र भिन्नव्यापाररूपाणां कारकाणां दर्शनं भिन्नं प्रार्थनादि-

(१) उपकल्पतइति २ पु० पाठः ।
(२) भुजियदिति २ पु० पाठः ।

क्तो(१)व्यापारो भिन्नः स संभूय सङ्घादर्थस्य पाकक्रियालक्षणस्य साधको दृश्यते व्यवहारादिदर्शन इति । व्यवहारः कश्चिन्नियतविषय एवोपयोगो(२)ऽत्राभिप्रेतः । आदिग्रहणेन तदन्येषां परिग्रहः तेषां दर्शनं समारम्भः प्रारम्भ इति यावत् तस्मिन्सतीत्यर्थः । एतदुक्तं भवति । कर्तृस्था वा क्रिया भवति कर्मस्था वेत्यत्र पचिक्रिया कर्मणि समवेता न समुदायइति केचित् । अन्ये त्वाहुः । यद्यपि कर्मणि समवेता तथाप्यधिश्रयणोपसर्जनविक्लित्तिरपि पचेरर्थ इत्यवान्तरक्रियान्यग्भावे प्रधानक्रियासमाश्रयणेन व्यावृत्तव्यापारस्याविशेषात्संभूय सर्वैर्निर्वर्त्यतइति समुदायएव परिसमाप्यतइति ॥ ३८३ ॥

अथ शास्त्रे प्रत्येकं वाक्यपरिसमाप्तिमुपदर्शयितुमाह ॥

लक्ष्यस्य लोकसिद्धत्वाच्छास्त्रे लिङ्गस्य दर्शनात् ।
अर्थित्वादैच्चु भेदेन(३)वृद्धिसंज्ञा समाप्यते ॥३८४॥

'वृद्धिरादैजि'त्यत्र वृद्धिशब्दः प्रत्येकमादैच्स्वर्थिषु संज्ञात्वेन नियुज्यते, यस्माल्लोके तथैव लक्ष्यं सिध्यति आस्वगुप्तायनिः(४) ऐतिकायनिः औपगव इति । तथा शास्त्रे प्रत्येकमादैचां वृद्धिसंज्ञा लिङ्गाद् दृश्यते यथा 'प्रस्थे वृद्धमकर्क्यादीनां' 'मालादीनां च' 'वृद्धिर्यस्याचामादिस्तद्वृद्धं' 'प्रस्थेवृद्धमकर्क्यादीनामि'त्यत्र प्रस्थे उत्तरपदे पूर्वपदमवृद्धमाद्युदात्तं भवति तदनन्तरं मालादीनामादिरुदात्तो भवति इत्युक्तं, यदि चैकैकस्य वृद्धिसंज्ञा तदा मालादीनां वृद्धिर्यस्याचामादिस्तद्वृद्धमिति मालादयो वृद्धा भवन्ति ॥ ३८४ ॥

इदानीं क्वचित्समुदाये वाक्यपरिसमाप्तिरिति प्रदर्शयितुमाह ॥

---

(१) पाचनादिकइति २ पु० पाठः ।

(२) उद्योग इति २ पु० पाठः ।

(३) अर्थित्वादैक्षवभेदेनेति २ पु० पाठः ।

(४) आश्वगुप्तायनिरिति २ पु० पाठः ।

शतादाने प्रधानत्वाद्
दण्डने शतकर्मके ।
अर्थिनां गुणभेदे ऽपि
संख्येयो ऽर्थो न भिद्यते ॥ ३८५ ॥

गर्गाः शतं दण्ड्यन्तामित्यत्र शतकर्मकं दण्डनं समुदाये परिसमाप्यते । अर्थिनश्च राजानो हिरण्येन भवन्ति न च प्रत्येकं दण्डयन्ति यस्माद्वाक्यार्थज्ञा राजानो विवेचयन्ति यथात्र द्वे कर्मणी प्रधानमप्रधानं चेति तत्र शतकर्मके दण्डने शतादानमेव प्रधानं, यदि च प्रत्येकं शतकर्मदानं समाप्येत तदा गर्गाः शतानि दण्ड्याः स्युः ततश्च प्रधानकर्मणः स्वरूपभ्रंशो भवेत्, न च प्रधानार्थपरित्यागो युक्तः, अतः संख्यान्तराश्रयणे विरोधो वाक्यस्य स्यात्, वीप्सायां बाधप्राप्तिः । अत्र गुणभेदेपि दण्ड्यभेदेप्यप्रधानत्वात्तेषां नात्र प्रत्येकमपि तु अर्थिनां राज्ञां शतकर्मकं दण्डनं समुदायएवावतिष्ठतइति बोद्धव्यम्। एतदुक्तं भवति। प्रत्येकं वाक्यपरिसमाप्तिः समुदाये वाक्यपरिसमाप्तिरित्येतत् न राजाज्ञावशाद् व्यवस्थाप्यते अपि त्वर्थतथाभावादिति न्यायसिद्धमेवैतद्वेदितव्यम् ॥ ३८५ ॥

शास्त्रे प्रदर्शयितुमिदानीमाह ॥

संघस्यैव विधेयत्वात्
कार्यवत्प्रतिपादने ।
तत्र तन्त्रेण सम्बन्धः
समासाभ्यस्तसंज्ञयोः ॥ ३८६ ॥

समाससंज्ञा ऽभ्यस्तसंज्ञा च समुदायएव परिसमाप्यते 'सह सुपा' 'उभे अभ्यस्तमि'ति च । अत्र समाससंज्ञाया अभ्यस्तसंज्ञायाश्च तन्त्रेण साधारण्येन समुदायस्यैव सम्बन्धः । कस्मादित्याह "सङ्घस्यै-

षविधेयत्वादि''ति। यस्मादत्र सङ्घ एव विधीयते पूर्वपदोत्तररूपे हि समाससंज्ञा विधीयते। तथा ऽभ्यस्तमित्यत्र युगपत् द्वयोरभ्यस्तसंज्ञा विधीयते किञ्चित्कार्यं विधातुमिति। ननु समाससंज्ञायां कथं राजपुरुष इत्यादौ समुदायो विधीयते यावता नित्यत्वाच्छब्दार्थसम्बन्धानां विधेयतानुपपत्तिरित्याशङ्क्याह "कार्यवत्प्रतिपादन" इति। यदा कार्यवदन्वाख्यानमिति पक्षः प्रतिपाद्यते तदैतदुक्तमित्यर्थः॥ ३८६ ॥

इदानीं क्व चिदेकत्रैवोभयथापि वाक्यपरिसमाप्तिर्दृश्यतइति प्रतिपादयितुमाह॥

लक्षणार्थी स्तुतिर्येषां काञ्चिदेव क्रियां प्रति।
तैर्व्यस्तैश्च समस्तैश्च स धर्म्म उपलक्ष्यते॥ ३८७॥

उदाहरणमाह॥

वृषलैर्न प्रवेष्टव्यमित्येतस्मिन् गृहे यथा।
प्रत्येकं संहतानां च प्रवेशः प्रतिषिध्यते॥ ३८८॥

अत्र वृषलजातीयस्य प्रवेशनिषेधः क्रियते तत्र चैकस्यापि वृषलत्वस्य सद्भावात्सामर्थ्यात्पृथक् समुदाये च प्रवेशनिषेधार्थः(१)सम्पद्यत इति॥ ३८८॥

प्रकारान्तरेणोपदर्शयितुमाह॥

सम्भूय त्वर्थलिप्सादिप्रतिषेधोपपादने।
पृथगप्रतिषिद्धत्वात्प्रवृत्तिर्न विरुध्यते॥ ३८९॥

भवद्भिः समग्रैरेवाद्यप्रभृति राजोपसेवा न कार्या, समुद्गमनं वा न विधेयं, कृषिकर्म वा नानुष्ठेयमित्यत्र समुदाये प्रत्येकं वा निषेधे वाक्यस्य न प्रवृत्त्यनुपपत्तिः॥ ३८९॥

अत्रापि शास्त्रीयमुदाहरणं दर्शयितुमाह॥

(१) प्रवेशानिषेध इति २ पु० पाठः।

व्यवायलक्षणार्थत्वादट्कुप्वाङादिभिस्तथा ।
प्रत्येकं वा समस्तैर्वा णत्वं न प्रतिषिध्यते ॥ ३९० ॥

व्यवायो व्यवधानं तदुपलक्षणार्थत्वादट्कुप्वाङादिभिरिति प्रत्येकं समुदायेपि तेषां स्थितेर्व्यवायस्य सिद्धत्वात्तथैव णत्वं प्रवर्त्ततइति न कश्चिद्दोषः ॥ ३९० ॥

इदानीं भुजिक्रियाया एकत्वानेकत्वविचारः । तत्रापि किमेकस्मिन् देशे काले पात्रे ऽनुष्ठिता स्वरूपमासादयति, उत देशादिभेदेनानुष्ठितेति विचारयितुमाह ॥

अनुग्रहार्थं भोक्तॄणां भुजिरारभ्यते यदा ।
देशकालाद्यभेदेन नानुगृह्णाति तानसौ ॥ ३९१ ॥

"देशकालाद्यभेदेने"ति नात्र भुजेरनुग्रहार्थाया विशेषः कश्चित् उभयथापि तदनुग्रहस्य निर्वृत्तेरिति ॥ ३९१ ॥

अथास्या एकत्वानेकत्वे विचारयितुमाह(१) ॥

पात्रादिभेदान्नानात्वं यस्यैकस्योपदिश्यते ।
विपर्यये वा भिन्नस्य तस्यैकत्वं प्रकल्प्यते ॥ ३९२ ॥

यस्य मते एकैव भुजिः तृप्तिलक्षणसमानफलत्वात् तस्य देशकालभेदान्नानात्वं स्वतस्त्वेकत्वमेव । कस्य चिन्मते तु भोक्तृभेदात्फलभेदे भुजिक्रियाभेद एव । तस्य विपर्यये पात्राद्यभेदादेकत्वं तस्या बोद्धव्यं स्वभावतस्तु भिन्नत्वमेवेति मतभेदः ॥ ३९२ ॥

किं च ॥

संहत्यापि च कुर्वाणा
भेदेन प्रतिपादिताः ।

---

(१) एकत्वानेकत्वविचारायेति २ पु० पाठः ।

स्वं स्वं भोज्यं विभागेन

प्राप्तं संभूय भुञ्जते ॥ ३९३ ॥

देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामित्यत्र सामर्थ्याद्भेदेन वाक्यार्थप्रतिपत्ताविच्छावशात्संभूय स्वं स्वं भोज्यं विभागेन प्राप्तं संभूय भुञ्जते(१) ॥ ३९३ ॥

अथ शतादानप्रधानत्वादित्येतत्प्रतिपाद्यस्यार्थस्योपपत्तिं प्रतिपादयितुमाह ॥

वीप्साया विषयाभावात् विरोधादन्यसंख्यया ।

द्विधा समाप्त्ययोगाच्च शतं सङ्घे ऽवतिष्ठते ॥३९४॥

यद्येकैकं शतं शतं दण्ड्येत तदा वीप्साविषयो ऽपहृतः स्यात्, तथा शतकर्मकमत्र दण्डनं प्राधान्येन विधीयते । यदि तु प्रत्येकं शतदण्डनं प्राधान्येन विधीयते(२)प्रत्येकं शतदण्डने संख्यान्तरोपजननाच्छतसंख्या विरुध्यते । न चाप्यत्र द्विधा वाक्यं समाप्यते । यत एकेन प्रधानकर्मणः सम्बन्धो ऽपरेण गुणकर्मणामिति वाक्यार्थज्ञैः पर्यालोच्य सङ्घएव शतादानमवतिष्ठतइत्युच्यते ॥ ३९४ ॥

अथ भुजिक्रियायाः प्रत्येकं परिसमाप्तावपि यत्र देवदत्तयज्ञदत्तविष्णुमित्रैः सह भोक्तव्यमित्युच्यते तत्र द्विधापि प्रत्येकं समुदाये च वाक्यार्थस्य परिसमाप्यतइत्याह ॥

भुजिर्द्वन्द्वैकशेषाभ्यां यत्रान्यैः सह शिष्यते ।

तत्रापि लक्षणार्थत्वात् द्विधा वाक्यं समाप्यते॥३९५॥

"लक्षणार्थत्वादि"ति यस्मादत्र सह भोजनं सहैव वा तत्प्रतिषेध इत्येव तावन्नच्यते । तत्र बहुभिः सह भोक्तव्यं द्वाभ्यां त्रिभिर्वा न वे-

(१) भुज्यतइति २ पु० पाठः ।

(२) विधीयेतेति २ पु० पाठः ।

त्येतदत्राभिधीयते । एवं च सहैव भोक्तव्यं न वेति समुदायएव विधिर्वा प्रतिषेधो वा विधीयते, केवलं सह भोजनविधिस्तत्प्रतिषेधो वाभीष्ट इति प्रत्येकं समुदाये च वाक्यार्थो ऽत्र समाप्यतइति बोद्धव्यम् ॥ ३६५ ॥

एवं वाक्यर्थाश्रयणेन प्रत्येकं वाक्यपरिसमाप्तिः समुदाये च वाक्यपरिसमाप्तिरिति प्रदर्शितम् । इदानीं वाक्यसमाश्रयणेन प्रतिपादयितुमाह ॥

वाक्यान्तराणां प्रत्येकं समाप्तिः कैश्चिदिष्यते ।
रूपान्तरेण युक्तानां वाक्यानां तेन संग्रहः ॥ ३६६ ॥

इहैकं यद्वाक्यं श्रुतं तेन वाक्यान्तराणां वाक्यरूपाणां संग्रहो लक्षणं प्रत्यायनमिष्यते तानि वाचकानि तस्मान्महावाक्यं प्रत्येकं समाप्यते ततश्च तथैवार्थावगतिरिति ॥ ३६६ ॥

अथ वाक्यान्तराणां किमिकमेव तन्महावाक्यमभिधायकमुच्यतइत्याशङ्क्याह ॥

न वाक्यस्याभिधेयानि भेदवाक्यानि कानि चित् ।
तस्मिंस्तूच्चरिते भेदांस्तथान्यान्प्रतिपद्यते ॥ ३६७ ॥

तस्मादुच्चरितादर्थप्रतिपत्तावर्थपर्यालोचनावशेनावान्तरवाक्यप्रतिपत्तिः सम्पद्यतइत्युच्यते न पुनस्तेन तान्यभिधीयन्तइति ॥ ३६७ ॥

अत्राखण्डवाक्यवादी प्रौढवादितया पदवादिमतं निराकर्त्तुमाह ॥

येषां समस्तो वाक्यार्थः
प्रतिभेदं समाप्यते ।
तेषां तदानीं भिन्नस्य
किं पदार्थस्य सत्तया ॥ ३६८ ॥

प्रत्येकमखण्डस्यैव वाक्यार्थस्य परिसमाप्तेः पदार्थानामनुपयोगात्पदार्थकल्पना वृथैव ॥ ३९८ ॥

वाक्यवादी विकल्पयितुमाह ॥

अथ तैरेव जनितः सो-
र्थो भिन्नेषु वर्त्तते ।
पूर्वस्यार्थस्य तेन स्या-
द्विरोधः सह वा स्थितिः ॥ ३९९ ॥

अथोच्यते पदार्थैरेव वाक्यार्थो जनितो भिन्नेषु वर्त्तते पूर्वस्य तेन सह विरोधः सहानवस्थानलक्षणो वा स्यात्, अथ वा सहावस्थिति,-रिति द्वयी गतिः ॥ ३९९ ॥

तत्र सह स्थितौ चोद्यमाह ॥

सहस्थितौ विरोधित्वं
स्याद्विशिष्टाविशिष्टयोः ॥ ३९९ऽऽ ॥

भेदसंसर्गौ विरुद्धावत्रानुषज्येयातामित्यर्थः । अथ पदार्थवाक्यार्थयोरत्र सहानवस्थानं यत्पूर्वः पदार्थो वाक्यार्थो वाक्यार्थे तत्र समाप्ते विनिवर्त्तते तदायं दोष इत्याह ॥

व्यभिचारी तु संबन्ध-
स्त्यागेऽर्थस्य प्रसज्यते ॥ ४०० ॥

वाक्यार्थफलानां पदानामुपात्तार्थपरित्यागे शब्दार्थसम्बन्धो व्यभिचार्यनित्यः प्राप्नोति । अतः प्रत्येकं वाक्यपरिसमाप्तिपक्षे सत्यभूतपदपदार्थासम्भव एव ॥ ४०० ॥

अथ समुदायवाक्यपरिसमाप्तिपक्षे किं समुदायार्थेन सह एवार्थवान् नावयवाः, आहो स्वित्तदवयवा अपीति विचारयितुमाह ॥

एकः साधारणो वाच्यः प्रतिशब्दमवस्थितः ।
सङ्घे सङ्घिषु चार्थात्मा संनिधाननिदर्शकः ॥ ४०१ ॥

सो ऽर्थात्मा वाच्यः सत्यभूतो वाक्यार्थलक्षण एको ऽखण्डः प्रतिशब्दमवस्थितो बोद्धव्यः। यतो ऽसौ साधारणः सर्व्वेषां वाच्यभूतः स्थितः। अथ तेष्वेव स्थितो ऽसौ नेत्याह "सङ्घिषु चे"ति। साधारणत्वात्समुदायेष्युच्यते तदवयवेष्वपीति। यदि प्रतिशब्दमवस्थितः तत एकपदोपलम्भकाले किमित्यसौ नावगम्यतइत्याह। "संनिधाननिदर्शक" इति। इतरपदसंनिधानं निदर्शकं यस्यासौ तथाभूतः यथोक्तं पुरस्तात् "प्रत्येकं तु समाप्तोर्थः सहभूतेषु वर्त्तत" इति। अतः सकलपदोपलम्भकाले प्रतीयतइति न कश्चिद्दोषः॥ ४०१ ॥

एतद् दृष्टान्तद्वारेण व्यक्तीकर्तुमाह ॥

यथा साधारणे स्वत्वं त्यागस्य च फलन्धने ।
प्रीतिश्चाविकला तद्वत्सम्बन्धो ऽर्थेन तद्वता ॥४०२॥

धने बहूनां साधारणे स्वत्वं स्वस्वामिभाव आत्मीयत्वं वा सर्व्वेषां त्यागस्य च दानलक्षणस्य फलं तदपि सर्व्वेषामस्माकं बहु धनमस्तीति चेतसश्च प्रीतिर्निर्वृतिलक्षणा साप्यविकला साधारणत्वादेव सर्व्वेषां भवति तद्वत्तेनार्थेन समं ज्ञात्वा तद्वतां सङ्घसङ्घिनां सम्बन्धो बोद्धव्यः॥ ४०२ ॥

इदानीमेतत्प्रसङ्गेन 'सङ्घातस्यैकार्थ्यात्सुब्भावो वर्णादि'त्येतद् व्याख्यातुमाह ॥

वर्णानामर्थवत्तायां तेनैवार्थेन तद्वति ।
समुदायेन चैकत्वं भेदेन व्यवतिष्ठते ॥ ४०३ ॥

यदा वर्णा अप्यर्थवन्तः समुदायेप्यर्थवत्ता तदा तत्रार्थवत्त्वस्य साधारणत्वेनैवैकत्वात्समुदायादेवैकत्वप्रतिपादनायैकवचनमुत्पद्यते

न प्रत्येकं वर्णेभ्य इति ॥ ४०३ ॥

एतदेव दृष्टान्तप्रदर्शनपूर्वकं दर्शयितुमाह ॥

एकेनैव प्रदीपेन सर्वं साधारणं धनम् ।
पश्यन्ति तद्वदेकेन सुपा सङ्ख्या ऽभिधीयते ॥४०४॥

सन्तमसे साधारणधनस्वरूपपरिज्ञानं यथैकेनैव प्रदीपेन सम्पद्यते तद्वत्रापि साधारणार्थवत्ताभिव्यक्तये एकेनैव समुदायादुत्पन्नेन सुपा एकत्वलक्षणा सङ्ख्या समुदायावगताभिधीयत इति न पृथक् पृथक्सुबुत्पत्तिः ॥ ४०४ ॥

अत एवं साधारणैवासावर्थवत्ता एकेनैव सुपा ऽभिहिता तस्मादसौ वर्णपदयोरपि वाक्ये च भवन्तीति न विशिष्यते न पृथगभिधातुमुपयुज्यतइति बोद्धव्यमित्यभिधातुमाह ॥

नार्थवत्ता पदे वर्णे वाक्ये चैवं विशिष्यते ॥ ४०४ऽऽ ॥

ननु पूर्वं वाक्यस्यैवार्थवत्त्वं महता प्रबन्धेन व्यवस्थापितं पदान्यनर्थकान्येवाभिहितानि वर्णानामर्थवत्त्वे कैव कथा । इदानीं वर्णे पदे वाक्ये च समं क्वैवार्थवत्तोद्घोष्यते इति किमेतदुच्यतइत्याशङ्क्याह ॥

अभ्यासात्प्रक्रमो ऽन्यस्तु विरुद्ध इव दृश्यते ॥ ४०५॥

इह भिन्नान्यागमदर्शनानि लौकिकैश्चार्वाग्दर्शिभिः तत्राभिनिविष्टैः परस्परं शास्त्राणां पृथक्पृथक् प्रक्रमाः परिपाट्यो दृश्यन्ते विरुद्धा इव परमार्थतस्तत्त्वं सत्यरूपमेकमविरुद्धमेव सर्वत्र स्थितमिति । अतश्च सर्वपार्षदत्वादेतदनुषङ्गात्क्वथं चिदाश्रितं नैतावता ऽभ्युपेतस्याखण्डपक्षस्य त्याग आयात इति बोद्धव्यम् ॥ ४०५ ॥

इदानीं शब्दस्यार्थाभिधाने स्वव्यापारं विचारयितुकाम आह ॥

विनियोगादृते शब्दो न स्वार्थस्य प्रकाशकः ।

अर्थाभिधानसम्बन्धमुक्तिद्वारं प्रचक्षते ॥ ४०६ ॥

इहैक एव शब्दो बह्वर्थः स यदा वक्त्रा प्रतिनियतएवार्थे विनियुज्यते तदा तमर्थं प्रकाशयतीति दृष्टम् । अतः शब्दस्यार्थप्रतिपादनयोग्यता उक्तिद्वारैवेत्याहुः ॥ ४०६ ॥

अथ किं स्वाभाविकः शब्दार्थसम्बन्धो ऽथेदृशीं दशामुपेतो यदमी शब्दा वक्तृविनियोगमुखप्रेक्षणसम्बन्धाः हन्तैवं वादिना भवता विभूषितैव वैयाकरणधुरेत्याशङ्क्यैतत्समर्थनार्थमाह ॥

यथा प्रणिहितं चक्षुर्दर्शनायोपकल्पते ।
तथा ऽभिसंहितः शब्दो भवत्यर्थस्य वाचकः ॥४०७॥

यथा सहजयैव योग्यतया चक्षुरिन्द्रियमर्थविषयं दर्शनमुपकल्पयद्द्रष्टृसम्बन्धिप्रणिधानमपेक्षते अन्यथा सर्वदा दर्शनोपजनप्रसङ्गात् । तथैव शब्दः स्वाभाविकेनैव सम्बन्धेनार्थप्रत्यायको ऽप्यभिधातृसम्बन्ध्यभिसन्धान(१)मपेक्षतएव । एतदुक्तं भवति । वाक्यानि स्वव्यापारे प्रतिनियतस्वार्थभाञ्जि भवन्त्यभिधेयार्थं प्रकाशयन्त्यभिधाख्यं स्वव्यापारं पुरस्कृत्यार्थप्रकाशनं कुर्वन्तीति बोद्धव्यं, स चाभिधाख्यो व्यापारः प्रयोक्तृसम्बन्ध्यभिसन्धाननिमित्तक इत्यभिसन्धानत्वेनोपचर्यते । यदाह । तथाभिसंहितः शब्दोऽर्थस्य वाचको भवतीति । अभिसन्धानमेव ह्यत्र शब्दस्योक्तिलक्षणव्यापारतया ऽतिदिशति । यदा त्वभेदपक्षस्तदा वक्तुरन्तरुल्लसिता प्रतिभैवाभिसन्धिरूपा शब्दमयी भवति । स्पष्ट एवाभिसन्धानोक्त्यो(२)रभेदनिर्देशः । अतः प्रचारश्चक्षुषोपि व्यापारः प्रणिधानात्मक एव उक्तिः करणविन्यासो न विना शब्दभावनामित्यनुसन्धानकारणकः शब्दस्य स्वव्यापारो ऽभिधानुसन्धानमेव वा शब्दमयीभूतमभिधेति विज्ञेयम् ॥ ४०७ ॥

---

(१) संबन्धाभिसंधानमिति २ पु० पाठः ।

(२) अभिसंधानोक्त्योरिति २ पु० पाठः ।

ननु चाभिधानमभिधेयं सम्बन्धश्च तयोरित्येतावदेव सुप्रसिद्धं य-त्त्वत्र विनियोग उक्तिरभिसन्धानमभिधेत्येवंरूपस्य चतुष्कस्योपयो-गः प्रतिपाद्यते तदप्रसिद्धमेवेत्याशङ्क्याह ॥

क्रियाव्यवेतः सम्बन्धो दृष्टः करणकर्मणोः ।
अभिधा नियमस्तस्मादभिधानाभिधेययोः ॥ ४०८ ॥

इह कारकाख्यः शलाकाकल्पानि परस्परमसम्बद्धान्येव तेषां च यथा क्रियाव्यवधानेन क्रियासमाश्रयणेन सम्बन्धो दृश्यते तथैवा-भिधानाभिधेययोर्वाच्यवाचकभावलक्षणः सम्बन्धो ऽभिधाख्येन श-ब्दव्यापारेण नियम्यते इति नापूर्वमत्राभिहितमिति ॥ ४०८ ॥

एतदेव स्फुटीकर्त्तुमाह ॥

बह्वष्वेकाभिधानेषु सर्वेष्वेकार्थकारिषु ।
यत्प्रयोक्ताभिसन्धत्ते शब्दस्तत्रावतिष्ठते ॥ ४०९ ॥

तथा च बहुष्वर्थेषु गवादिषु वस्तुष्वेकाभिधानेष्वेकशब्दप्रतिपाद्येषु शब्देषु(१) च तत्रार्थेषु सजातीयत्वादेकार्थकारिषु सन्निहितेषु सत्सु प्रयोक्ता यत्तत्रार्थरूपमभिसन्धत्ते ऽभिसन्धानेन विनियोगेनाभिधावि-षयीकरोति तत्रैवार्थे वाचकत्वेन शब्दो ऽवतिष्ठते नान्यत्रेति स्फुटमे-व परिदृष्टम् ॥ ४०९ ॥

प्रकारान्तरेणाप्येतदेव स्फुटयितुमाह ॥

आम्नायशब्दानभ्यासे केचिदाहुरनर्थकान् ।
स्वरूपमात्रवृत्तींश्च परेषां प्रतिपादने ॥ ४१० ॥
अभिधानक्रियाभेदादर्थस्य प्रतिपादकात् ।
नियोगभेदान्मन्यन्ते तानेवैकत्वदर्शिनः ॥ ४११ ॥

(१) सर्वेषु इति २ पु० पाठः ।

ननु पदार्थसम्प्रत्ययस्तत्रोपजायतएव पदानां त्वनर्थत्वे कथं तत्सद्भाव इत्याह ॥

यदन्तराले ज्ञानं तु पदार्थेषूपजायते ।
प्रतिपत्तेरुपायो ऽसौ प्रक्रमानवधारणात् ॥ ४१७ ॥

यदेतत्पदपदार्थज्ञानं विभ्रमरूपमन्तराले वाक्यवाक्यार्थप्रतिपत्तेरेवोपायभूतं बोद्धव्यन्तस्मान्निरंशत्वेपि वाक्यवाक्यार्थयोः प्रक्रमएव प्रथमसमयएव रूपं तयोर्नावधार्यतइति ॥ ४१७ ॥

एवं वाचकाश्रयणे प्रकारत्रितयमुक्त्वेदानीं वाच्यसमाश्रयणेन तथैव प्रतिपादयितुमाह ॥

पूर्व्वैरर्थैरनुगतो यथार्थात्मा परः परः ।
संसर्ग एव प्रक्रान्तस्तथा ऽन्येष्वर्थवस्तुषु ॥ ४१८ ॥

अनेन श्लोकेनान्विताभिधानसमाश्रयणेन संसृष्टं वाक्यार्थप्रदर्शनं क्रियते। तथा त्व(१)भिहितान्वयवादिनः पूर्वपूर्वार्थानुगतः(२)संसर्गो वाक्यार्थः । अन्विताभिधानवादिनस्तूत्तरोत्तरपदार्थावगतः प्रथमतरमेव संसृष्ट एव। यदि परमत्र संनिधानं निदर्शकं यस्येतीतिकर्त्तव्यतामात्रस्वरूपावगतावपेक्षन्तइति बोद्धव्यम् ॥ ४१८ ॥

अङ्गीकृते तु केषां चित्साध्येनार्थेन साधने ।
आधारनियमार्थैव साधनानां पुनः श्रुतिः ॥ ४१९ ॥

यदा केषां चिन्मते तत्र साध्येनार्थेन साध्यार्थनिष्ठेन संसर्गेणेति यावत् । साधनउपकारलक्षणे ऽङ्गीकृतआश्लिष्टे ऽविनाभावितया स्वयमवष्टते सति या तत्र वाक्ये साधनानां पुनः श्रुतिः सा नियमार्थैव बोद्धव्या कारकाणां, यदि तत्र परमाधारनियमः क्रियतइति

---

(१) तथा हीति २ पु० पाठः ।
(२) पूर्वार्थावगत इति २ पु० पाठः ।

बोद्धव्यम्। इन्धनाधारा करणशक्तिः स्थाल्याधारैवाधिकरणशक्तिरेव-मन्यत्र ॥ ४१८ ॥

तत्र निःसाधना क्रिया न भवतीति साधनमात्रमनियताधार-माक्षिप्तं न त्वाधारसहितमित्याह ॥

आधारनियमाभावात्तदाक्षेपो न विद्यते।
सामर्थ्यात्सम्भवस्तस्य श्रुतिस्त्वन्यनिवृत्तये ॥ ४२० ॥

साधनानामाधारनियमो नास्ति करणादिशक्तयो हि नियता-धारा दृश्यन्तइत्याधाराक्षेपः। तत्र साधनं नास्ति सामर्थ्याद्यदि परं तस्य साधनस्य तत्र सम्भव एवाभ्यूह्यते ततः क्रियाधारा एताः साध-नशक्तयः स्युरिति दण्डेन गामित्यादिका श्रुतिरन्याधारनिवृत्तये तासां पर्यवस्यतीति बोद्धव्यम् ॥ ४२० ॥

अथ क्रियां वाक्यार्थमाश्रित्याह ॥

क्रिया क्रियान्तराद्भिन्ना नियताधारसाधना।
प्रक्रान्ता प्रतिपत्तॄणां भेदाः सम्बोधहेतवः ॥ ४२१ ॥

क्रियैव विशिष्टा सर्वत्र प्रथमतरमेव वाक्यार्थत्वेन प्रक्रान्ता क्रि-यान्तराद्भिन्नेत्यनेन विशेषकथनम्। एतदेव स्फुटीकर्त्तुमाह "निय-ताधारसाधने"ति। तत्र वाक्ये भेदानां विशेषाणां प्रयोगोऽसौ स-म्बोधनोपायमात्रमिति बोद्धव्यम् ॥ ४२१ ॥

अथ स्वपक्षानुसारेण वाक्यार्थप्रदर्शनं कर्त्तुमाह ॥

अविभागं तु शब्देभ्यः क्रमवद्भ्योऽपदक्रमम्।
प्रकाशते तदन्येषां वाक्यं वाक्यार्थ एव च(१) ॥ ४२२ ॥

अक्रम एव निर्विभागः पानकरसादिवत्प्रतिभात्मको वाक्यार्थः स्फोटात्मकं च वाक्यमित्येकयोगक्षेमत्वादेवमुक्तं "वाक्यं वाक्यार्थ एव

(१) एव वेति २ पु० पाठः।

चे"ति ॥ ४२२ ॥

इदानीमसत्योपाधिः सत्यरूपः शब्दार्थ इति विचारपूर्वकं निर्दर्शयितुमाह ॥

स्वरूपं विद्यते यस्य तस्यात्मा न निरूप्यते ।
नास्ति यस्य स्वरूपं तु तस्यैवात्मा निरूप्यते ॥ ४२३ ॥

यस्य वस्तुनः प्रत्यक्षादिप्रमाणपरिच्छिन्नस्वरूपं(१)विद्यते नीलं पीतमिति तस्य तावता नात्मा निरूप्यते न व्यवहारगोचरतां नीयते । एतदुक्तं भवति । पदार्थः पृथग्रूपः सन्नपि पङ्गुप्रायो ऽसाविति (२) व्यवहारपदवीं नेतुं वार्यते संसर्गस्य त्वन्वयात्मनः प्रधानस्य तदितरोपपत्तेः पदार्थो यावदुपायो द्वारमिति तन्निरूपणमेव साफल्यं भजतइति तस्यैव सत्यत्वं युक्तम् ॥ ४२३ ॥

अथ पदार्थासत्यत्वप्रतिपादनपूर्वकं तदाच्छुरितस्यैव संसर्गस्य वाक्यार्थत्वं परिघटयितुमुपक्रमते ॥

अशब्दमपरे ऽर्थस्य रूपनिर्द्धारणं विदुः ।
अर्थाविभासरूपा हि शब्देभ्यो जायते स्मृतिः ॥४२४॥

अर्थस्य रूपनिर्द्धारणस्य स्वरूपपरिच्छेदो ऽशब्द एव, न तत्र शब्द उपायभावमुपयाति। तद्धि निर्विकल्पकैकसमधिगम्यमित्यर्थः । तर्हि शब्दस्य तत्र क्वोपयोग इत्याह "अर्थाविभासे"त्यादि । अर्थप्रतिभाससदृशायां स्मृतावेव शब्दानामुपयोगः, तेन शब्दस्यार्थेन सह सुदूरमेव विप्रकर्षस्ततश्च कथं शब्दो ऽर्थमभिदधीतेत्यसत्य एव शब्दार्थः पर्यवस्यति ॥ ४२४ ॥

अतश्चैतदेव बोद्धव्यमित्याह ॥

---

(१) परिच्छिन्नं स्वरूपमिति २ पु० पाठः ।
(२) नेष्टेति २ पु० पाठः ।

अन्यथैवाग्निसम्बन्धाद्दाहं दग्धो ऽभिमन्यते।
अन्यथा दाहशब्देन दाहाद्यर्थः प्रतीयते ॥ ४२५॥

यदि शब्देन यथावद्बाह्यो ऽर्थः प्रत्याय्येत तदा शब्दसन्निधापितो ऽसौ तामर्थक्रियां कथं न कुर्यात्, यतश्चाग्निसम्बन्धाद्दग्धो दाहमन्यथा ऽनुभवति दाहशब्देन च दाहमन्यथा ऽवगच्छतीति शब्दार्थयोर्नास्ति कश्चिद्वास्तवः समन्वय इति बोद्धव्यम् ॥ ४२५ ॥

तदेवं पदार्थौ विपरीतख्यातिरूपो ऽसत्ख्यातिस्वरूपो वा बोद्धव्य इति पदार्थस्यासत्यत्वमभिधाय तदाच्छुरितस्य वाक्यार्थस्य सत्यत्वं प्रतिपादयितुमाह ॥

पृथङ्निविष्टतत्त्वानां पृथगर्थानुपातिनाम्।
इन्द्रियाणां यथा कार्यमृते देहान्न कल्पते ॥४२६॥

पृथङ्निविष्टं तत्त्वं स्वरूपं पार्थिवत्वादिना भेदेन, अथ वा प्रतिनियतस्थानसमाश्रयणेन निविष्टमभिव्यक्तं तत्त्वं स्वरूपं येषां तानि तथा तेषामिति तथा पृथक् पृथगर्थं(१)शब्दादिलक्षणमनुपतन्ति विषयीकुर्वन्ति तच्छीलास्ते तथा तेषां, यथा सत्यपि पृथक्स्वभावे देहादिना कार्यं प्रातिस्विकं नोपकल्पते, तथैव पदानां केवलानां वाक्यव्यतिरेकेण स्थितानामर्थवत्ताविरहः परिदृश्यतइति ॥ ४२६ ॥

प्रकृतं योजयितुमाह ॥

तथा पदानां सर्वेषां पृथगर्थनिवेशिनाम्।
वाक्येभ्यः प्रविभक्तानामर्थवत्ता न विद्यते ॥ ४२७॥

वाक्यार्थस्वरूपं प्रतिपादयितुमाह ॥

संसर्गरूपं संसृष्टेष्वर्थवस्तुषु गृह्यते।

---

(१) पृथगर्थमिति २ पु० पाठः।

नात्रोपाख्यायते तत्त्वमपदार्थस्य दर्शनात् ॥४२८॥

न पुनरत्र पृथक्पदार्थप्रतिभासावसरे तस्य तत्त्वमुपाख्यायते प्रकटीभवति यस्मात्पदार्थरूपाद्विलक्षणमेव वाक्यार्थस्वरूपं दृश्यतइति ॥ ४२८ ॥

ननु च शशो नास्ति विषाणमस्तीतिवदप्रतीतिकं कथं सर्वमभिधीयते, पदपदार्थप्रतिभासः संवेद्यमानोपि नाभ्युपगम्यते, पदार्थोपहितो वाक्यार्थस्तु सत्यत्वेन निरूप्यतइत्याशङ्क्य सर्वोपरि निरूपितमेव व्यवहारगोचरतामुपयाति न स्वरूपेणेति प्रतिपादयितुमाह ॥

दर्शनस्यापि यत्सत्यं न तथा दर्शनं स्थितम् ।
वस्तुसंसर्गरूपेण तद्रूपं निरूप्यते ॥ ४२९ ॥

इह सर्वोपरि बोध एव पारमार्थिकस्तद्व्यतिरेकेणान्यस्य विचार्यमाणस्यानुपपत्तेः, स च यथा सत्यत्वेन स्वच्छत्वादि(१)रूपतया स्थितो न तथा तद्बोधस्वरूपदर्शनं पदार्थप्रतिभासावसरे स्थितम् । तदवसरे हि वस्तु संसर्गरूपेण नीलपीताद्युपसृष्टतया नीलबोधः पीतबोध इति तद्रूपविरहितमपि निरूप्यते । एवमेतत्संसर्गादिकं वस्तुसंसर्गरूपेण पदार्थोपहितं तथारूपं तद्रूपविरहितमपि निरूप्यतइति किमत्रापराद्धम् । तस्मात्सर्वथा केवलः पदार्थः पदं वा ऽव्यवहार्यमेवातश्चैतदसत्यमित्युच्यते ॥ ४२९ ॥

वाक्यवाक्यार्थौ तु व्यवहार्यत्वात्सत्यभूतावित्यर्थप्रतिपत्तये वाक्यमेव प्रयुज्यतइत्याह ॥

अस्तित्वेनानुषक्तो वा निवृत्त्यात्मनि वा स्थितः ।
अर्थो ऽभिधीयते यस्मादतो वाक्यं प्रयुज्यते ॥४३०॥

एतदेव स्फुटयितुमाह ॥

---

(१) स्वस्थत्वादीति २ पु० पाठः ।

क्रियानुषङ्गेण विना न पदार्थः प्रतीयते ।
सत्यो वा विपरीतो वा व्यवहारे न सोऽस्यतः॥४३१॥

अतो व्यवहारे केवलः पदार्थो नास्त्येवेति बोद्धव्यम् ॥ ४३१ ॥

यत्राप्येकमेव पदं सदित्येतन्निराकाङ्क्षायाः सत्तायाः प्रतिपादकं तत्रापि तदभूदस्ति नाभून्नास्ति वेति क्रियापदसम्बन्धमन्तरेण परिसमाप्तार्थं न भवतीति सर्वथा केवलस्य पदमात्रस्य नास्त्यर्थवत्तेति प्रतिपादयितुमाह ॥

सदित्येव तु यद्वाक्यं तदभूदस्ति नेति वा ।
क्रियाभिधानसम्बन्धमन्तरेण न मन्यते ॥ ४३२ ॥

तत्र च वाक्ये साध्यसाधने परस्परमविनाभाविनी अन्योन्यापेक्षके स्पर्धयैव(१)व्यवस्थिते । तथा हि । साधनं यथा निष्क्रियं न भवतीत्याकाङ्क्षावशात्क्रियापेक्षकमुच्यते । तथा क्रियापि निःसाधना न भवतीत्याख्यातपदप्रतिपाद्ये क्रियालक्षणे सत्त्वाभिधानेन विना ऽऽकाङ्क्षा न निवर्त्ततइति ॥ ४३२ ॥

तत्र सा क्रिया साधनमाकाङ्क्षत्येवेति प्रतिपादयितुमाह ॥

आख्यातपदवाच्ये ऽर्थे साधनोपनिबन्धने ।
विना सत्त्वाभिधानेन नाकाङ्क्षा विनिवर्त्तते ॥४३३॥

साधनमुपनिबन्धनं यस्याख्यानपदवाच्यस्यार्थस्य तस्मिंस्तथाभूते तस्मात् सत्त्वाभिधानेन विनाकाङ्क्षा न निवर्तते । साधनं हि सत्त्वाभिधायि ततस्तदवतिष्ठते किंकृतस्तत्रगुणप्रधानभावस्तयो,र्यदुच्यते साध्यस्यैव पूर्व्वं प्रविभाग इत्याशङ्क्याह ॥

प्राधान्यात्तु क्रिया पूर्व्वमर्थस्य प्रविभज्यते ।

---

(१) स्पष्टे एवेति २ पु० पाठः ।

साध्यप्रयुक्तान्यङ्गानि फलं तस्याः प्रयोजकम् ॥ ४३४॥

अर्थस्य वाक्यार्थलक्षणस्याख्यातप्रतिपाद्यस्य क्रियाप्रधानत्वात्क्रियैव प्राधान्यात्पूर्वं प्रविभज्यते न साधनानि, यस्मात्साध्यार्थं साध्यनिष्पत्तये प्रयुक्तानि साधनान्यतो ऽङ्गान्प्रधानभूतानि(१)तानीति न तेषां तत्र प्रविभागः। एवं क्रियाप्रयुक्तानि बोद्धव्यानि। प्रसङ्गात् क्रियाया अपि प्रयोजकमाह "फलं तस्याः प्रयोजकमि"ति फलप्रयुक्ता क्रियापीति फलापेक्षया क्रियायाङ्गत्वं बोद्धव्यम् ॥ ४३४ ॥

इदानीं सर्व्वो ऽयं साध्यसाधनव्यवहारः काल्पनिकस्तयोश्च साध्यसाधनयोः परस्परसम्बन्ध आपेक्षिक एव न वास्तव इति प्रतिपादयन्पुनरपि पदार्थासत्यत्वं व्यवस्थापयितुमाह ॥

प्रयोक्तैवाभिसन्धत्ते साध्यसाधनरूपताम् ।
अर्थस्य वाभिसम्बन्धकल्पनां प्रसमीहते ॥ ४३५ ॥

इदं साध्यमिदं साधनं तयोश्चाभिसम्बन्धः सर्वमेतत्काल्पनिकं ततस्तत्त्वञ्च शून्यमेव प्रयोक्तृसमीहामात्रजीवितमिति यावत् ॥ ४३५ ॥

यदि हि वास्तवमेतत्स्यात्तदा वस्तुस्वभावस्य ब्रह्मणाप्यन्यथाकर्त्तुमशक्यत्वाद् व्यवस्थितमेवैतद्भवेन्न च तथा परिदृश्यतइति प्रतिपादयितुमाह ॥

पचिक्रिया करोमीति कर्मत्वेनाभिधीयते ।
पक्तिः करणरूपं तु साध्यत्वेन प्रतीयते ॥ ४३६ ॥

देवदत्तः पचतीत्यत्र या पाकक्रिया प्राधान्येनोपलब्धा सैव पचिक्रियां देवदत्तः करोतीत्यत्र कर्मत्वेनैव पक्तिः पाकक्रिया व्यवस्थापिता पचिक्रिया करणं तु प्राधान्येनोन्मज्जद्रूपं प्रतिपादितमिति नैषा वस्तुगतिः, साधनसमुद्देशे च सर्व्वमेतद्वैवक्षिकमिति विस्तरे-

(१) अङ्गान्यप्रधानभूतानीति २ पु० पाठः ।

ण प्रदर्शयिष्यति। तथा सम्बन्धस्यापि काल्पनिकत्वमेव वक्ष्यतीति ने-
ह प्रतन्यते ॥ ४३६ ॥

अथ वा अनेकशक्तिरर्थः स्थितोपि यद्यदुपकारवशाद्यथा प्रयो-
क्तृभिर्विवक्ष्यते तथैवात्मानमुपदर्शयतीत्याह ॥

यो ऽसौ येनोपकारेण प्रयोक्तृणां विवक्षितः ।

अर्थस्य(१)सर्वशक्तित्वात्स तथैव व्यवस्थितः ॥ ४३७ ॥

तथा चेदमपि ॥ ४३७ ॥

वस्तून्यनेकशक्तिखचितत्वात्सहन्तइति प्रदर्शयितुमाह ॥

आराद्वृत्तिषु सम्बन्धः कदा चिदभिधीयते ।

आश्लिष्टो यो ऽनुपश्लिष्टः स कदा चित्प्रतीयते॥४३८॥

आराद्वृत्तिष्वतिदूरमपि विप्रकृष्टेषु पदार्थेषु कदा चित्परस्परस-
म्बन्धः संश्लेषो ऽभिधीयते, कदा चित्तु य आश्लिष्टः सम्बद्धोपि सोनु-
पश्लिष्टो ऽसम्बद्धो दूरत इति विवक्षावशात्प्रतीयते ॥ ४३८ ॥

रूपान्तरमप्याह ॥

संसृष्टानां विवेकत्वं(२)संसर्गश्च विवेकिनाम् ।

नानात्मकानामेकत्वं नानात्वं च विपर्यये ॥ ४४० ॥

एकत्वेपि च कल्पनावशान्नानात्वं वस्तूनां दृश्यते राहोः शिर
इति यथा, नानात्मकानां च धवखदिरपलाशादीनामेकत्वमेकस्यां
बुद्धौ सङ्कलनरूपं दृश्यते वनमिति यथा, विवेकिनां परस्परविलक्ष-
णानां पदार्थानामयःशलाकाकल्पानां संसर्गो वाक्यार्थरूपो दृश्यते
यथा देवदत्तः काष्ठैरित्यादौ, संसृष्टानां च विभक्तत्वं यथा माथुराः
पाटलिपुत्रकेभ्य आढ्यतरा इत्यादा,वेषां बुद्ध्या सङ्कलितानां सतां

(१) सर्वस्येति २ पु० पाठः ।
(२) विविक्तत्वमिति २ पु० पाठः ।

पश्चाद्विभागेनावस्थापनं क्रियते ॥ ४४० ॥

तदेतत्कथमुपपद्यतइत्याह ॥

सर्वात्मकत्वादर्थस्य नैरात्म्याद्वा व्यवस्थितम् ।
अत्यन्तयतशक्तित्वाच्छब्द एव निबन्धनम् ॥ ४४१ ॥

सर्वशक्तिरर्थस्तेन तेन रूपेण निरूपितस्तत्तद्व्यपदेशमात्रं भवतीति नियतशक्तिभिः शब्दैस्तथातथा व्यपदिश्यतइति स्थितम्। अथ वा निरात्मक एवासत्यभूतोसाविति यथा विवक्षया निरूप्यते तथा तथावस्थानमुपदर्शयतीति शब्दैस्तथैव व्यपदिश्यतइति बोद्धव्यम् ॥ ४४१ ॥

इदानीमर्थस्वरूपं शब्दा नैव स्पृशन्ति केवलं तत्र दूरविप्रकर्षेणार्थस्योपलक्षणभावेन स्थिता व्यवहारोपयोगितामुपयान्तीत्यभिधातुमाह ॥

वस्तूपलक्षणं शब्दो नोपकारस्य वाचकः ।
न स्वशक्तिः पदार्थानां संस्प्रष्टुं तेन शक्यते ॥ ४४२ ॥

शब्दार्थयोर्न वाच्यवाचकभाव उपपद्यते, तथा सति शब्दानामर्थस्वरूपं प्रकाश्यतामुपेयान्न च तथा दृश्यतइत्याह ॥

सम्बन्धिधर्मो संयोगः स्वशब्देनाभिधीयते ।
सम्बन्धः समवायश्च सम्बन्धित्वेन गम्यते ॥ ४४३ ॥

संयोगशब्दात्संयोगो द्रव्ययोरिति यथावत्परिनिष्टस्वरूपस्तत्र सम्बन्धिस्वभावः प्रतीयते न च तस्य तद्रूपम्, एवं समवायशब्दात्समवायः प्रतीयते इत्याह "सम्बन्धः समवाय" इत्यादि। सम्बन्धित्वेन सम्बन्धस्वरूपविरहेण समवाय इत्यस्मात् प्रतीयते । अथ वा यदा संयोगशब्देनासौ सम्बन्धः स्वतन्त्रो ऽभिधीयते तदा तत्र समवायः सम्बन्धत्वेन गम्यतइति यदा सम्बन्धत्वेन गम्यतइति पाठस्तदैवं योजनीयम् ॥ ४४३ ॥

पदार्थानां स्वतो रूपं न किंचिद् व्यवतिष्ठते यथा यथा निरूप्यन्ते तथा तथात्मानमासादयन्तीत्याह ॥

लक्षणाद्व्यवतिष्ठन्ते पदार्था न तु वस्तुतः ।
उपकारात्स एवार्थः कथं चिदनुगम्यते ॥ ४४४ ॥

स एवार्थः केन चित्कथं चिदुपयोगादन्यथा व्यपदिश्यते इत्येवमनेकप्रपञ्चैरसत्यभूत एव पदार्थ इति संगृह्य व्यवस्थापितम् ॥ ४४४ ॥

इदानीं वाक्यार्थस्तु सत्यभूत इति प्रतिपादयितुमाह ॥

वाक्यार्थे यो ऽभिसम्बन्धो न तस्यात्मा क चित् स्थितः ।
व्यवहारे पदार्थानां तमात्मानं प्रचक्षते ॥ ४४५ ॥

परस्पराभिसम्बन्धस्वरूपः पानकरसादिवदनिर्विभागो ऽनंश एव यो वाक्यार्थस्तस्य क चित् पृथग्रूपतयात्मा स्थितो ऽवधारयितुं न शक्यतइति यावत् । पदार्थानां पुनरयःशलाकाकल्पानां व्यवहारावसरे तमात्मानं जीवितमिव प्रचक्षते तद्वशात्तत्प्रतिपादितपदार्थोद्देशेन सर्वस्य कस्य चित्प्रवृत्तिनिवृत्तिसाफल्यात् स चैकस्मिन् पदार्थे समुदायएव वा परिसमाप्तो बोद्धव्यः ॥ ४४५ ॥

अथ वा नैवासौ क चित्परिसमाप्त इदं तदिति पृथग्रूपतयानुपलक्षणात्केवलं पदार्थसम्बन्धिना स्वरूपेणाखण्डस्य वाक्यार्थस्य स्वरूपं प्रतिपद्यतइति प्रतिपादयितुमाह ॥

पदार्थे समुदाये वा समाप्तो नैव वा क चित् ।
पदार्थरूपभेदेन तस्यात्मा प्रविभज्यते ॥ ४४६ ॥

एतदुक्तं भवति । न पृथगेव शृङ्गग्राहिकतया स्वरूपं विवेक्तुं शक्यते परोपाधिद्वारकमेव सर्वदा तस्य निरूपणमवसातव्यमित्युच्यते ॥४४६॥

एतदेव स्फुटीकरणमाह ॥

अन्वाख्यानाय यो भेदः प्रतिपत्तिनिबन्धनम् ।

साकाङ्क्षावयवं भेदे तेनान्यदुपवर्ण्यते ॥ ४४७ ॥

तस्यान्वाख्यानाय यो भेदः पदार्थभेदो ऽपोद्ध्रियते स तस्यैव प्रतिपत्तिनिबन्धनं बोद्धव्यः । अतः पदार्थानां भेदे क्रियमाणे सति तेनापोद्धृतेन पदार्थभेदेनान्यदेव पदार्थव्यतिरिक्तं वाक्यार्थस्वरूपमुपवर्ण्यते प्रकटीक्रियते । कीदृशं "साकाङ्क्षावयवमि"ति । भेदे सति साकाङ्क्षा अवयवाः पदार्थस्वरूपाः प्रतिपत्त्युपाया यस्य तत्तथाभूतं तथाभूतस्य च वाक्यार्थस्य नानाशक्तिखचितस्य निर्विभागस्योपाधिकृतः पदार्थद्वारकः प्रविभागो नानारूपत्वमनुगम्यते प्रतीयते ॥ ४४७ ॥

परमार्थस्त्वेक एवासावित्याह ॥

अनेकशक्तेरेकस्य प्रविभागो ऽनुगम्यते ।
एकार्थत्वं हि वाक्यस्य मात्रयापि प्रतीयते ॥ ४४८ ॥

वाक्यस्य स्फोटात्मनो वाचकरूपस्यैकार्थत्वमेक एव निर्विभागस्वरूपो वाच्यार्थो यस्य तत्तथा तस्य भावस्तत्त्वं प्रतीयते कथं "मात्रयापी"ति । यदा तस्य मात्रया नियतसंख्याकेनाल्पीयसा शब्देन योगो ऽभिसम्बन्धो दृश्यते । यथोक्तम् । इग्यण इति योगे स्थान्यादेशभावलक्षणो वाक्यार्थः स संप्रसारणमिति व्यपदिश्यते अतः संप्रसारणमित्येवमेकसंख्येन लघीयस्त्वान्मात्रया व्यपदिश्यते तस्य योगो यदा न परिदृष्टस्तदैतदवगम्यते यदुतानंश एक एवाखण्डस्वरूपोसौ वाक्यार्थो ऽन्यथा सम्प्रसारणमित्यनेनैकसंख्याकेन कथं युज्येत वक्तुम् ॥ ४४८ ॥

तदिदं वाक्यार्थः सत्यरूपः पदार्थस्त्वसत्य एवेति निर्णीतं, स च वाक्यार्थो बौद्ध एवाब्रह्मीरूप इति प्रतिपादयितुमाह ॥

संप्रत्ययार्थाद्बाह्यो ऽर्थः सन्नसन्वा विभज्यते ।
बाह्यीकृत्य विभागस्तु शक्त्यपोद्धारलक्षणः ॥ ४४९ ॥

सम्प्रत्ययो बुद्धिर्विज्ञानमित्यनर्थान्तरम् । सम्प्रत्ययो ऽर्थो ऽभिधेयरूपो यस्यासौ तथा तथाभूतात्तस्माद्बौद्धाद्वाक्यार्थाद्बाह्यार्थः सम्बहीरूपतया विद्यमान एवाथ वा ऽसन्बहिरसत्यभूत एव विभज्यते विभागेनानुगम्यते व्यवस्थाप्यते । कथं कृत्वेत्याह "बाह्यीकृत्ये"ति । अबाह्य एवासौ बाह्यरूपतया प्रथते विवेकानवधारणात् दृश्यविकल्पैकीकारेण वाक्यार्थं प्रतिपाद्य पश्चादसौ विभागेनानुगम्यत इति यावत् । विभागस्तत्र कीदृश इत्याह । "शक्त्यपोद्धारलक्षण" इति । शक्तीनां पदार्थसम्बन्धिनीनामपोद्धारः पृथक्करणं लक्षणं यस्यासौ तथा पदार्थशक्तयस्तस्मादपोद्ध्रियन्त इत्यर्थः । अत्र तु बौद्धे वाक्यार्थे समाश्रिते शक्तीनां तत्राविद्यमानत्वात्तस्मादपोद्धारस्तासां(१) कीदृशः स्यात् । ताः पदार्थव्यक्तयो न व्यवस्थिताः । यदि हि तत्र ताः स्युः तदा ह्यतीते ऽवगतेर्थे स्यादेवार्थक्रियावाप्तिः तस्माद्बौद्धादर्थादन्यत्र बाह्यएवार्थे ताः शक्तयो व्यवस्थितास्ततश्च बौद्धादर्थादन्यत्र बाह्ये ऽर्थे विद्यमानमपि तासां रूपं निराकारेण विज्ञानेनोपलभ्यते तस्माद्विज्ञानाकारस्यं बाह्यस्य चार्थस्य शक्तित एकाकारेण विना व्यवहारो नोपपद्यतएवेति बाह्यीकृत्येत्युक्तं, तथा चैकयोगक्षेमत्वाद्बौद्धार्थबाह्यार्थयोर्युक्तो बौद्धेप्यर्थे शक्त्यपोद्धारलक्षणो विभागः । तत्र यदि विज्ञानाकारस्य विकल्पवासनामाहात्म्याद्बाह्येनैकीकृतस्य सत्यतो बहिरर्थो ऽस्ति येनोपजन्यते तदा बाह्य एव शब्दार्थः, न चेदसन्नेव बहिर्बौद्ध एव शब्दार्थ इति निर्णयः ॥ ४४८ ॥

अथ वाक्यविचारप्रस्तावे वाक्यानामेकवाक्यत्वं(२)वा मतभेदेन प्रतिपादयितुमाह ॥

---

(१) प्रत्ययार्थात्मनियताः शक्तयो न व्यवस्थिताः । अन्यत्र च ततो रूपं न तासामुपलभ्यते । इति श्लोको ऽधिको मूलपुस्तके ।

(२) विभिन्नवाक्यत्वं वेत्यधिकः २ पु० पाठः ।

बहुष्वपि तिङन्तेषु साकाङ्क्षेष्वेकवाक्यता ।
तिङन्तेभ्यो निपातस्य पर्युदासस्तथार्थवान् ॥ ४५० ॥

इह वार्त्तिककारेणाख्यातं साव्ययकारकविशेषणं वाक्यमित्यत्रै-कवचनस्य विवक्षितत्वादेकतिङिति वाक्यलक्षणान्तरप्रतिपादना-दनेकाख्यातसद्भावे वाक्यभेद एवेष्यते, सूत्रकारेण त्वतिङ इति प्रति-षेधोपादानसामर्थ्यात्सत्स्वपि बहुषु तिङन्तेष्वर्थस्य साकाङ्क्षत्वात्तत्रै-कवाक्यतैवेष्यतइति प्रदर्शितं बहुष्वपीत्यनेन ॥ ४५० ॥

वार्त्तिककारमतेन वाक्याभेदस्तत्रेत्युपदर्शयितुमाह ॥

एकतिङ् यस्य वाक्यं तु शास्त्रे नियतलक्षणम् ।
तस्य तिङ्ग्रहणेनार्थो वाक्यभेदान्न विद्यते ॥ ४५१ ॥

नियतलक्षणमिति विवक्षितैकत्वमित्यर्थः ॥ ४५१ ॥

केषांचित्पुनरनेकाख्यातसद्भावेऽपि वाक्यार्थस्य भेदाभेदौ व्यव-स्थिताविवेत्याह ॥

तिङन्तान्तरयुक्तेषु युक्तयुक्तेषु वा पुनः ।
मृगः पश्यत यातीति भेदाभेदौ न तिष्ठतः ॥ ४५२ ॥

इह मृगः पश्यत यातीत्यत्र तिङन्तान्तरसद्भावाद्वाक्यभेद एव, त-था च मृगशब्दस्य यातीत्यस्य च सम्बन्धादेकं वाक्यम् । अनन्तरं वि-भक्तिविपरिणामेन कर्म्मपदेन प्रत्यवमर्शादेतं मृगं पश्यतेति द्वितीयं वाक्यम् । अन्यस्त्वाह । युक्तयुक्तत्वाद्बहुष्वपि तिङन्तेष्वभेद एव । तथा ह्यत्र मृगशब्देन यातिपदस्य योगः तद्युक्तेन यातिपदेनाख्यातान्तरस्य योगः । तेनात्र मृगकर्त्तृके सरणे पश्यतेति दृशिक्रियापेक्षया एकमेव वाक्यमिति केचित् । पश्यतेति बहुवचनं वृत्तानुरोधात् । वार्त्तिक-कारस्याप्येकतिङित्यत्रैकतिङ्त्वं प्रधानतिङन्तापेक्षया प्रतिपाद्यमा-नं सूत्रकारमतानुगुण्यं भजतएवेत्यनयोर्नास्ति मतभेदः । तदपरेषां

मतभेद एव बोद्धव्यः ॥ ४५२ ॥

अथ वाक्यपरिसमाप्तिज्ञानपूर्विका नानावाक्यतैकवाक्यता वा ज्ञातुं शक्या नान्यथेत्याशङ्क्य शब्दलक्षणा वाक्यपरिसमाप्तिर्बोद्धव्या नार्थलक्षणेत्यत्र साकाङ्क्षत्वानाकाङ्क्षत्वविचारमाह ॥

इतिकर्त्तव्यता ऽर्थस्य सामर्थ्याद्यस्य काङ्क्षते ।
अशब्दलक्षणाकाङ्क्षं समाप्तार्थं तदुच्यते ॥ ४५३ ॥

अविद्यमाना शब्दलक्षणा शब्दाश्रिता आकाङ्क्षा यस्मिंस्तद्वाक्यं समाप्तार्थमुच्यते । तदवगतस्यार्थस्य तु यत्र सामर्थ्यादर्थतथाभावलक्षणात्तदीयायामितिकर्त्तव्यतायामाकाङ्क्षा जायते, तावता न तत्र तद्वाक्यमपरिसमाप्तमित्युच्यतइति बोद्धव्यं, यथा व्रीहयो बहवो ऽवहन्यन्तामित्यत्र शब्दापेक्षा तावन्नास्त्येव व्रीहीणां त्ववहननमुलूखलमुसलकर्म्मकर्त्रादिसंनिधानमन्तरेण न सम्पद्यतइति तदपेक्षणाद्वाक्यं नात्र परिसमाप्तमिति न युक्तं वक्तुं शब्दलक्षणापेक्षा ऽयोगादिति ॥ ४५३ ॥

एतदेव स्फुटीकर्त्तुमाह ॥

तत्त्वान्वाख्यानमात्रे तु यावानर्थो ऽनुषज्यते ।
विनापि तत्प्रयोगेण श्रुतेर्वाक्यं समाप्यते ॥ ४५४ ॥

व्रीहीणामवहननमात्रमत्रान्वाख्यायते तस्मिंश्च सति उलूखलादिसन्निधानं यदत्रानुषज्यते तस्य प्रयोगेण शब्देन प्रतिपादनेन विनापि तत्र तद्वाक्यं श्रुत्या शब्दव्यापारेण समाप्तमेवेति बोद्धव्यम् ॥ ४५४ ॥

इदानीमर्थप्रत्यायनाभेदेपि शब्दवृत्तेन गुणप्रधानरूपतया ऽभिधानं शब्देषु सम्भवतीति प्रसङ्गाच्छब्दधर्मप्रतिपादनं कर्त्तुमाह ॥

चङ्क्रम्यमाणो ऽधीष्वात्र जपंश्चङ्क्रमणं कुरु ।

तादर्थ्यस्याविशेषेपि शब्दाद्भेदः प्रतीयते ॥ ४५५ ॥

चङ्क्रम्यमाणोऽत्र जपं कुरु अथ वा जपंश्चङ्क्रमणं कुर्वित्यत्र उभयथा जपविधिः प्रतीयते, केवलं चङ्क्रम्यमाणो जपेत्यत्र जपः प्राधान्येनाभिधीयते चङ्क्रमणं गुणवृत्त्या, जपंश्चङ्क्रमणं कुर्वित्यत्र तु जपस्य गुणभावः प्राधान्यं तु चङ्क्रमणस्य। अथ वोभयथापि जपयुक्तत्वाच्चङ्क्रमणस्यार्थभेदो न कश्चित्। शब्दप्रतिपादनवैलक्षण्यमात्रमेवावसीयतइति ॥ ४५५ ॥

एवमर्थाभेदेपि शब्दप्रतिपादनवैचित्र्यमुपदर्शितमिदानीं शब्दभेदात्सामर्थ्यादर्थप्रतिपत्तिवैचित्र्यं भवतीत्यत्र शाब्दमपि व्यापारं प्रदर्शयितुमाह ॥

फलवन्तः क्रियाभेदाः क्रियान्तरनिबन्धनाः ।
असंख्याता क्रमोद्देशैरेकाख्यातनिदर्शनाः ॥ ४५६ ॥

यावज्जीवमग्निहोत्रं जुहोति, तथा यजते देवदत्त इत्यादावेकाख्यातनिदर्शनाः एकमाख्यातपदं निदर्शनं वाचकं येषां ते तथाभूताः क्रियाभेदाः प्रतीयन्ते । भेदश्च स्वरूपेण फलेन च भवतीत्याह "फलवन्त" इति फलभेदवन्त इत्यर्थः । स्वर्गकामः कदा चिद्यजते कदा चिद्वस्तिकामः कदा चित्पुत्रकामो धनकामो वेति । फलभेदस्वरूपमाह "क्रियान्तरनिबन्धना" इति । इतिकर्त्तव्यतायां क्रियान्तराणि निबन्धनं येषां ते तथा भूताः । किं च बहुना क्रमेण प्रातिस्विकेनेतिकर्त्तव्यतयानुद्देशेन फलस्वरूपेण च ते संख्यातुमशक्या एव क्रियाभेदास्तेनाख्यातेनैकरूपेणाभिन्नेनैव निदर्श्यन्तइति बोद्धव्यम् ॥ ४५६ ॥

एतदेव स्फुटीकृत्य प्रतिपादयितुमाह ॥

निवृत्तभेदा सर्वैव क्रिया ऽऽख्याते ऽभिधीयते ।
श्रुतेरशक्या भेदानां प्रविभागप्रकल्पना ॥ ४५७ ॥

आख्यातपदे क्रिया सर्वैव निवृत्तभेदा सामान्येनाभिधीयते यस्माच्छ्रुतिमात्राच्छब्दमात्रात्सामान्येन श्रुताद्भेदानां प्रविभागरूपताव्यसातुमशक्या ॥ ४५७ ॥

उदाहरणमाह ॥

अश्वमेधेन यक्ष्यन्ते राजानः सत्रमासते ।
ब्राह्मणा इति नाख्यातरूपाद्भेदः प्रतीयते ॥ ४५८ ॥

अत्र फलसाधनभेदात् यजिक्रियायाः सत्यपि भेदे नैवाख्यातशब्दात्तत्प्रतीतिरस्त्य,र्थसामर्थ्यात्तु भेदस्तस्या अवगम्यते इति नाना शब्दधर्म्माः ॥ ४५८ ॥

वैदिकमप्युदाहरणमाह ॥

सकृच्छ्रुता सप्तदशस्वनावृत्तापि या क्रिया ।
प्राजापत्येषु सामर्थ्यात्सा भेदं प्रतिपद्यते ॥ ४५९ ॥

सप्तदश प्राजापत्यानेकवर्णानजांस्तूपरानालभेतेत्यत्रानावृत्ताप्यालम्भनक्रिया सकृच्छ्रुता शब्देनानावृत्तेनैकेनावगतोत्तरकालं त्वालम्भभेदाद्भेदेनावतिष्ठतइति बोद्धव्यम् ॥ ४५९ ॥

यस्माच्चाख्यातान्तर्गतो धातुर्निवृत्तभेदाया एव क्रियायाः प्रतिपादकस्तस्माद्भेदासम्भवाद्यथासंख्येन सम्बन्धानुपपत्तेर्भुजिक्रिया देवदत्तादिषु प्रत्येकमवतिष्ठतइत्याह ॥

देवदत्तादिषु भुजिः प्रत्येकमवतिष्ठते ।
प्रतिस्वतन्त्वं वाक्यं वा भेदो न प्रविभज्यते ॥ ४६० ॥

देवदत्तादिकर्त्तृका भुजिर्वाक्यार्थरूपा ऽत्र प्रत्येकमवतिष्ठतइत्यर्थसमाप्तिदर्शनं शब्दस्य समाप्तिमप्युपदर्शयितुमुक्तं "प्रतिस्वतन्त्वमि"-त्यादि । वाक्यमेवात्र प्रत्येकं देवदत्तादिषु भेदेनावतिष्ठतइति बोद्धव्यम् ॥ ४६० ॥

ननु देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामित्यभेदरूपमेव वाक्यं प्रयुक्तमतः कथमस्माद्भेदेनावसायः स्यादित्याह ॥

उच्चारणे तु वाक्यानामन्यद्रूपं निगृह्यते ।
प्रतिपत्तौ तु भिन्नानामन्यद्रूपं प्रतीयते ॥ ४६१ ॥

शब्दानामन्यथोच्चारणसमये स्वरूपवृत्तिः प्रतिपत्त्यवसरे त्वन्यथैव स्वरूपावसाय इति सत्यप्याख्यातस्याभेदे ऽर्थपर्यालोचनेनात्र प्रत्येकं समाप्तिर्वाक्यवाक्यार्थयोः पर्यवस्यतीत्युच्यते ॥ ४६१ ॥

शास्त्रविषयमप्येतदेव प्रदर्शयितुमाह ॥

एकं ग्रहणकं वाक्यं सामान्येनाभिधीयते ।
कर्त्तरीति यथा तच्च पश्वादिषु विभज्यते ॥ ४६२ ॥

शास्त्रेपि च कर्त्तरि कृदित्येकं प्रत्ययार्थप्रतिपादकं सामान्येन ग्रहणकवाक्यमुपादीयते, तच्च प्रत्येकं प्रत्ययार्थोपाधिषु पश्वादिषु विभिन्नेषु विषयेषु विभागेन सम्बन्धमुपनीयाभिमतलक्ष्यनिष्पत्तये व्यापार्यतइति प्रत्येकमेव तत्परिसमाप्यते ॥ ४६२ ॥

यदि पुनः संयुक्तविधिनोपादीयेत तदा ऽभिमतसिद्धये न स्यादित्याह ॥

यद्याकाङ्क्षा निवर्त्तेत तद्गतस्य सकृच्छ्रुतौ ।
नैवान्येनाभिसम्बन्धं तदुपेयात्कथञ्चन ॥ ४६३ ॥

यदि सकृदेव प्रत्ययविधायकेनैव सहैवोपादायार्थपरिसमाप्तिराकाङ्क्षा निवार्येत तदा तद्योगेन तत्रैव परिक्षीणशक्तित्वाद्ग्रहणकवाक्यताविरहादन्येन प्रत्ययविधायकेन सम्बन्धेनैवोपेयादित्यभिमतलक्ष्यानिष्पत्तिरेव ॥ ४६३ ॥

तस्माद्यदेतदुपनिबन्धनभूतं सामान्येनासंयुक्तं विधिनैवोपात्तं सकृद्ग्रहणकवाक्यं सद्विभागवाक्यानामवान्तरवाक्यानां योनिः कारणं

बोद्धव्यमित्याह ॥

एकरूपमनेकार्थं
तस्मादुपनिबन्धनम् ।
योनिर्विभागवाक्यानां
तेभ्यो ऽनन्यदिव स्थितम् ॥ ४६४ ॥

अनेके ऽर्थाः प्रत्याय्या यस्य तत्तथा अवान्तरवाक्यान्युपनिबध्यन्ते ऽस्मिन्नित्युपनिबन्धनम् । अथ तेभ्यो ऽनन्यदिवाभिन्नमिव स्थितम् । अथ च प्रत्येकं भेदेन सम्बन्धमुपगत्य यथावल्लक्ष्यसिद्धये विभवतीति ॥ ४६४ ॥

अथाख्याते धातुवाच्या ऽसत्त्वभूता पूर्व्वापरीभूतावयवा साध्यमानावस्था क्षणप्रचयात्मिका या क्रिया तस्याः कीदृशो जातिव्यक्तिव्यवहारः समाश्रीयतइत्याह ॥

क्व चित्क्रिया व्यक्तिभागैरुपकारे प्रवर्त्तते ।
सामान्यभाग एवास्याः क्व चिदर्थस्य साधकः ॥ ४६५ ॥

"क्व चिदि"ति बाधविकल्पसमुच्चयातिशयप्रशंसादौ विषये क्रिया व्यक्तिभागैः समीहितार्थसिद्धौ प्रवर्त्तते जातिसमाश्रयेण विकल्पसमुच्चयाद्यनुपपत्तेः । न हि देवदत्तः पचति यज्ञदत्तः पचतीत्यादौ जातेः समुच्चयादिरुपपद्यते । क्व चित्तु यजते पचतइत्यादौ देशकालसाधनादेरैकव्यक्तिव्यवहारो वास्तवः स्यादिति संवृत्त्या लोकव्यवहारसिद्धये तत्र क्व चित्क्रियापरामर्शात्सामान्यभाग एव वाक्यार्थमुपकरोति ॥ ४६५ ॥

इहापि जातिभागमेव क्रियासम्बन्धिनं शब्दाः प्रत्याययन्तीत्याह ॥

कालभिन्नाश्च भेदा ये

ये चाप्युष्ट्रासिकादिषु ।
प्रक्रमे जातिभागस्य
शब्दात्मा तैर्न भिद्यते ॥ ४६६ ॥

ये क्रियाभेदाः क्रियाविशेषाः कालभिन्नाः पचत्यपाचीत्पक्ष्यतीत्येवमादयो ये चाप्युष्ट्रासिकादिषु विषये साधनभिन्ना उष्ट्रासिका आस्यन्ते हतशायिकाः शय्यन्ते इत्यादौ तेषु क्रियासम्बन्धतो जातिभागस्य प्रक्रमे सामान्येनैवापर्यालोचितदेशकालसाधनतया प्रक्रमे च शब्दात् शब्दस्वरूपं न भिद्यते साधनसम्बन्धकृतस्तत्र भेदो न प्रथतइति यावत् ॥ ४६६ ॥

तदेवं "देवदत्तादिषु भुजिः प्रत्येकमवतिष्ठत" इत्यादिना शब्दलक्षणभेदमाश्रित्यैका क्रिया ऽनेकैः साधनैः प्रत्येकमर्थं समाप्या वाक्यसम्बन्धमुपयातीति प्रदर्शितम्। इदानीं यत्र विजातीया विभिन्नपदवाच्या क्रिया एकशब्दवाच्यानि च साधनानि तत्र कथं भिन्नाभिः क्रियाभिः तेषां साधनानां सम्बन्धः स्यादित्याशङ्क्य तत्रापि प्रतिपत्तिकालसमाश्रयणेन भिन्नान्येव साधनान्यवगतानीति तथैवैताः क्रियास्तैर्भिन्नैरेव साधनैः प्रत्येकमर्थसमाप्त्या वाक्यसम्बन्धमुपयान्तीति प्रतिपादयितुमाह ॥

एकसङ्ख्येषु भेदेषु भिन्ना जात्यादिभिः क्रियाः ।
भेदेन विनियुज्यन्ते तच्छब्दस्य सकृच्छ्रुतौ ॥ ४६७ ॥

समानसंख्येषु भेदेषु साधनविशेषेषु तेषु । "जात्यादिभिरि"ति । जात्या आदिग्रहणादितिकर्त्तव्यतादिभिश्च याः क्रिया भिन्ना असम्बद्धा उपात्तास्ताः साधनाभिधायिनः शब्दस्य सकृदभेदेन श्रुतावपि प्रतिपत्तिभेदसमाश्रयणेन भेदेनैव विनियुज्यन्ते सम्बन्धमुपगच्छन्तीति बोद्धव्यम् ॥ ४६७ ॥

उदाहरणमाह ॥

अक्षादिषु यथा भिन्ना भञ्जिभक्षिदिविक्रियाः ।
प्रयोगकालाभेदेपि प्रतिभेदं पृथक् स्थिताः ॥ ४६८ ॥

अक्षा भक्ष्यन्तां भुज्यन्तां दीव्यन्तामिति या भिन्नजातिका भिन्नशब्दवाच्याश्च क्रिया यास्ता वाक्यभेदोपादानरहिता अपि प्रत्येकं समाप्त्या भेदेनैव स्थिता इति । यस्मादन्यसाधनानि तत्र निबद्धानि भेदेनैवोपात्तानीति प्रतिपत्तिवेलायां भेदेनैव क्रिया यथास्वं सम्बन्धमुपयान्तीति ॥ ४६८ ॥

तन्त्रन्यायप्रतिपादनपूर्वकमभिधातुमाह ॥

अक्षाणां तन्त्रिणां तन्त्र-
मुपायास्तुल्यरूपता ।
एवं क्रमो विभक्तानां
तन्त्रिबद्धा सकृच्छ्रुतिः ॥ ४६९ ॥

तुल्यरूपतेत्यनेन तन्त्रं व्याचष्टे । युक्तं चैतत् । यस्माच्छब्दाः क्रमेण विभागेनैव कदा चित्प्रयुज्यन्ते कदा चित्तन्त्रन्यायसमाश्रयणेन युगपदेवेति शब्दानां प्रयोगवेलायां क्रमयौगपद्ये उपायस्तदत्र तन्त्रेण युगपदेव भिन्नाः प्रयुक्ता अक्षा इति क्रियाभेदेनैवैषां सम्बन्धं गच्छन्ति ॥ ४६९ ॥

अथ क्रमयौगपद्यस्वरूपमत्रोद्दिश्य व्याख्यातुमाह ॥

द्वावभ्युपायौ शब्दानां
प्रयोगे समवस्थितौ ।
क्रमो वा यौगपद्यं वा
यौ लोको नातिवर्त्तते ॥ ४७० ॥

तत्र ।

क्रमे विभिद्यते रूपं यौगपद्ये न भिद्यते॥ ४७०ऽऽ॥

रूपविभागेनैव क्रमः साधारण्येन यौगपद्यं तत्र भिन्ना क्रिया यौगपद्येपि शब्दानां प्रयोगे क्रमरूपमेवानुपततीत्यर्थतथाभावात्क्रमरूपानुपातिन्येव बोद्धव्येति प्रतिपादयितुमाह ॥

क्रिया तु यौगपद्येपि क्रमरूपानुपातिनी ॥ ४७१ ॥

तथा च शकटाक्षस्यैव भञ्जनं न बिभीतकदेवनाक्षयोः, तथा बिभीतकाक्षस्यैव भक्षणं नेतरयोः, देवनाक्षस्यैव देवनं न पूर्वयो,रित्यर्थतथाभावाद्यौगपद्येपि क्रमानुपातिन्येवासाविति । ततश्च ते क्रमयौगपद्ये भेदसंसर्गशक्तिरूपे शब्दव्यापाररूपे अपि शब्देभ्यो भिन्ने इव व्यतिरिक्ते इव स्थिते लक्ष्येते ॥ ४७१ ॥

परमार्थतस्तु शब्दशक्ती एव क्रमयौगपद्ये इत्यभिधातुमाह ॥

भेदसंसर्गशक्ती द्वे शब्दाद्भिन्ने इव स्थिते ॥ ४७१ऽऽ॥

किन्तर्हि शब्दस्यैवैते द्वे शक्ती, यद्भेदशक्त्या क्रमेणावभाति, संसर्गशक्त्या तु युगपदि,ति । नन्वेवं भेदप्रयोगे ऽनेकेन क्रियापदेन सम्बन्धाद्भिद्यतएव साधारण्याद्यौगपद्यक्रमस्वरूपयोर्भेदात्कथं युगपत्प्रयोगे क्रमरूपानुपातित्वमेव क्रियायाः श्रुतिरुक्तमित्याह ॥

यौगपद्ये ऽप्यनेकेन प्रयोगे भिद्यते श्रुतिः ॥ ४७२ ॥

यौगपद्येपि साधनस्य प्रयोगे भेदेन क्रियापदसम्बन्धाद्भिद्यतएव साधारणी श्रुतिरिति, तत्त्वे हि सा भिन्नैवोपात्तेत्यर्थः ॥ ४७२ ॥

अथ वा अक्षा इत्यत्रोद्भूतावयवभेदः समुदाय एव प्रतिनिर्दिश्यते तत्रावयवधर्मेण समुदायो व्यपदिश्यते इत्येवं भेदमुपपाद्य यथायोगं प्रत्येकमर्थसमाप्त्या वा क्रियाणां भिन्नानां विनियोगः क्रियतइत्याह ॥

अभिन्नो भेदरूपेण यएको ऽर्थो विवक्षितः ॥

तत्रावयवधर्मेण समुदायो ऽनुगृह्यते ॥ ४७३ ॥

अभिन्नः समुदायस्वरूपः भेदरूपेणोद्भूतावयवभेदतया योऽत्रार्थो विवक्षितस्तत्रावयवधर्मेण भेदेन क्रमेणेति यावत्समुदायो ऽनुगृह्यते उपोद्वलीक्रियतइति भेदप्रतिपत्तौ भेदेनैव क्रियाणां सम्बन्धः । अतस्तस्य समुदायस्य भेदप्रतिपादने प्रत्येकं वाक्यार्थः परिसमाप्यते ॥४७३॥

अथ वा वचनभिन्न एकशब्द एवाक्षो भुज्यतां अक्षो दीव्यतामित्येवमवान्तरवाक्योपप्लाविनी साधनश्रुतिर्भेदेनैवावतिष्ठतइत्याह ॥

भेदनिर्वचने त्वस्य प्रत्येकं वा समाप्यते ॥
श्रुतिर्वचनभिन्ना वा वाक्यभेदे ऽवतिष्ठते ॥ ४७४ ॥

शब्दपरिसमाप्तिर्भेदप्रकारमाह ॥

तत्रैकवचनान्तो वा सो ऽक्षशब्दः प्रयुज्यते ॥४७४ऽऽ॥

एकस्माद्वाक्याद्वाक्यभेदेन सम्बन्धिनि व्यवक्रियमाणे सत्यक्षो भक्ष्यतामित्याद्येकवचमस्यैवाक्षशब्दस्य प्रयोगः कदा चित्। अथ वा यथाश्रुतिप्रत्येकं बहुवचनान्तेनैव वाक्यभेद इत्याह ॥

प्रत्येकं वा बहुत्वेन प्रविभागो यथाश्रुति ॥ ४७५ ॥

अक्षा भज्यन्तामित्यादिकः प्रविभागः श्रुत्यनतिक्रमेणैव वाक्यानां करणीयः ॥ ४७५ ॥

इदानीमभेदवादिनामपि मते द्विष्ठानां वाक्यानां शक्तिभेदेनैव विभागमभिधातुमाह ॥

द्विष्ठानि यानि वाक्यानि तेष्वप्येकत्वदर्शिनाम् ॥
अनेकशक्तेरेकस्य स्वशक्तिः प्रविभज्यते ॥ ४७६ ॥

द्वयोरर्थयोस्तिष्ठन्तीति द्विष्ठानि शास्त्रीयाणि लौकिकानि च यानि वाक्यानि तेष्वपि शब्दैकत्वदर्शिनां मते एकस्यैव तस्य प्रतिपादक-

स्य शब्दस्यानेकशक्तिरसौ स्वशक्तिरेव प्रविभज्यते । यथा 'इग्यणः सम्प्रसारणं' द्विर्वचने ऽचि 'तद्वरति वहत्यावहति भाराद्वंशादिभ्यः' तदस्य ब्रह्मचर्यमि'त्यादीनि शास्त्रीयाणि । तथा श्वेतो धावति अलम्बुसानां यातेत्यादीनि लौकिकानि वाक्यानि । तेष्वप्यर्थद्वयप्रतिपादनाय शक्तिर्विभज्यतइति शक्तितन्त्रप्रतिपादनम् ॥ ४७६ ॥

भेददर्शिनां पुनर्मते भिन्नाविव शब्दौ तन्त्रेणोपात्ताविति शब्दतन्त्रं प्रतिपादयितुमाह ॥

अत्यन्तभिन्नयोर्वा स्यात्प्रयोगस्तन्त्रलक्षणः ।
उपायस्तत्र संसर्गः प्रतिपत्तृषु भिद्यते ॥ ४७७ ॥

तत्रैवं तन्त्रेण द्व्यर्थे तस्मिन्प्रयोगे प्रतिपत्तयोगे प्रतिपत्त्रनुसारेणोभयात्मासौ संसर्गो वाक्याभिधेयलक्षणो भिद्यते । यथा यणस्थानिकस्येग्लक्षणस्य वर्णस्य का संज्ञा स्यादित्येकेन पृष्टं, तदपरेण यणि कोर्थः स्थान्यादेशभावलक्षणः सम्बन्धः स किंसंज्ञ इति, लाघवादाचार्यस्तन्त्रन्यायसमाश्रयणात्सम्प्रसारणमित्येकेनैव शब्देनोत्तरमाह । तथैकेन पृष्टं किंजातीयो धावतीत्य,परेण किंवर्णो धावत्य,नयोर्लाघवात्प्रतिवक्ति श्वेतो धावतीति । तत्रासौ वाक्यार्थः प्रतिपत्तृषु भिद्यते येन पृष्टं किंजातीयस्तस्य श्वा इतो धावतीत्येवंरूपतया व्यवतिष्ठते । येन च किंवर्ण इत्युक्तं तस्य श्वेतगुणयुक्तो धावतीत्यर्थरूपो ऽसौ जायते इति तन्त्रनिबन्धना द्विधात्रार्थव्यक्तिरुपजायतइति । एवमन्यत्र व्याख्येयम् ॥ ४७७ ॥

एतदेव व्याख्यातुमाह ॥

भेदेनावगतौ पूर्व्वं शब्दौ तुल्यश्रुती पुनः ।
तन्त्रेण प्रतिपत्तारः प्रयोक्ता प्रतिपादिताः ॥ ४७८ ॥

पूर्वं यौ शब्दौ भेदेन रूपवैलक्षण्येनाधिगतौ श्वा इतः श्वेत इति

तावेव तुल्यश्रुती भिन्नावेव तन्त्रेण प्रतिपत्तारः यस्मात्तन्त्रन्यायसमाश्रयणेनात्र प्रयोक्त्रा प्रतिपादिताः प्रतिबोधिताः ॥ ४७८ ॥

इदानीमत्र वक्तुरेकस्यैव शब्दस्य प्रतिपादने विवक्षोपजायते तस्यां सत्यामपरो ऽनुनिष्पद्यतइति शब्दभेदमते प्रकारान्तरेण तन्त्रमुपपादयितुमाह ॥

एकस्यापि विवक्षायामनुनिष्पद्यते परः ॥ ४७८ऽऽ ॥

वक्तिच्छाविरहादपि साधारणत्वादपरस्य निष्पत्तिस्ततोर्थद्वयप्रतिपत्तिः अभेदवादिनामपि मते तन्त्रस्य प्रकारान्तरमाह ॥

विना ऽभिसंधिना शब्दः शक्तिरूपः प्रकाशते॥ ४७९ ॥

प्रयोक्त्रभिसन्धानमन्तरेण तत्रासौ शब्दः साधारणत्वाच्छक्तिद्वययुक्तः प्रकाशते । एतदुक्तं भवति । शुक्लजातीयप्रत्यायनशक्तिः प्राणिविशेषप्रत्यायनशक्तिर्वा श्वेतशब्दस्तत्रोदीरितः स तत्रैकमर्थं प्रत्याययंस्तन्त्रेण सामर्थ्यादर्थान्तरप्रकाशनं करोत्येव ॥ ४७९ ॥

अथ वा तुल्यकक्षतया शक्तिद्वययोगाद्युगपदेव अर्थद्वयप्रकाशनं करोतीति शक्तितन्त्रतामाश्रित्याह ॥

अनेकशक्तिरेकस्य युगपच्छ्रूयते क्व चित् ।
अग्निः प्रकाशदाहाभ्यामेकत्रापि नियुज्यते ॥ ४८० ॥

एकस्यैव शब्दस्य क्व चित् श्वेतो धावतीत्यादौ विषये युगपदेवार्थद्वयप्रत्यायनसमर्थं शक्तिद्वयमाश्रीयते यथा क्व चिदवसरे दाहप्रकाशाभ्यां युक्तोग्निरेकत्रापि प्रकाशे दाहे वा नियुज्यते उपयोगवशाद्धर्मद्वयायाप्युपादीयतइत्यर्थः । तथैवानेकशक्तियोगाद्युगपदर्थद्वयप्रकाशनाय शब्दः समाश्रीयतइति ॥ ४८० ॥

इदानीं शास्त्रविषयमप्येतदुपदर्शयितुमाह ॥

आवृत्तिशक्तिभिन्नार्थे वाक्ये सकृदपि श्रुते ।

लिङ्गाद्वा तन्त्रधर्म्माद्वा विभागेनावतिष्ठते ॥ ४८१ ॥

इग्यणः सम्प्रसारणमित्येतस्मिन्वाक्ये सकृदपि श्रुते कीदृशे शब्दभेदवादिनां मते आवृत्तिभिन्नार्थे एकत्ववादिनां मते शक्तिभ्यां भिन्नार्थे। तत्र हि शक्तिभेदादर्थभेदः अनन्तरं तद्वाक्यं प्रतिपत्तिशब्दभेदमते लिङ्गात् ज्ञापकाद्विभागेनावतिष्ठते वर्णवाक्यार्थप्रत्यायकतया ऽवतिष्ठतइत्यर्थः। यस्मात्सम्प्रसारणस्येति भूतविभक्तिनिर्द्देशं पश्यति ततो ऽवस्यति वर्णः संज्ञीति वसोः सम्प्रसारणमित्यादौ भाविविभक्तिनिर्द्देशाद्वाक्यार्थस्यापि संज्ञित्वमवस्यतीत्यावृत्तिमेव शब्दभेदवाद्यनुमिनोति। अभेदवादी तु शक्तिभेदं तन्त्रधर्माच्छक्तितन्त्रलक्षणादनुमिनोतीत्यत्र सम्प्रसारणशब्दः शक्तिद्वयवशाद्युगपद्वर्णवाक्यलक्षणस्यार्थद्वयस्यापि प्रतिपादनं करोत्येव ॥ ४८१ ॥

संप्रसारणसंज्ञायां लिङ्गाभ्यां वर्णवाक्ययोः ।
प्रविभागस्तत्र सूत्रे एकस्मिन्नेव कल्पते ॥ ४८२ ॥

लिङ्गाभ्यामुपदर्शिताभ्यां भाविभूतविभक्तिनिर्द्देशलक्षणाभ्यां तत्र एकस्मिन्नेव सूत्रे वर्णवाक्यार्थयोः संज्ञिनोः प्रयोगो लभ्यतइति। उक्तं च'विभक्तिविशेषनिर्द्देशस्तु ज्ञापक उभयसंज्ञात्वस्ये'ति । तन्त्रं चेदमेकशेषसमानफलं भाष्ये प्रदेशेषूपन्यस्तमिति ॥ ४८२ ॥

भाष्यकाराभ्युपगमेनार्थतन्त्रसिद्धिमुपपादयितुमाह ॥

तथा द्विर्वचने ऽचीति तन्त्रोपायादिलक्षणः ।
एकशेषेण निर्द्देशो भाष्ये एवोपवर्णितः ॥ ४८३ ॥

इह द्विर्वचने ऽचीत्यत्र द्विर्वचननिमित्तेचि यो ऽजादेशः स द्विर्वचनएव कर्तव्ये स्थानिवदिति सूत्रार्थो व्याख्यायते तत्रोक्तं यत्पुनर्द्वितीयं द्विवचनग्रहणं कर्त्तव्यं न कर्त्तव्यमित्याह 'एकशेषनिर्द्देशात्सिद्धमि'ति। यद्येकशेषस्तदा द्विर्वचनं प्राप्नोतीत्यत एकशेषसमानफल-

साधारणलक्षणं तन्त्रमेवात्रैकशेषशब्देनोक्तं तेन तन्त्रोपायाद्धेतोर्लक्षणएवैकशेषनिर्देशः प्रदर्शितः । तस्मादेकशेषमन्तरेणापि तन्त्रन्यायसमाश्रयणाद्विर्वचने ऽचीत्यत्रार्थसङ्गतेरेकशेषसमानफलं शास्त्रप्रवृत्त्युपायभूतं तन्त्रमभ्युपगतं भाष्यइति सिद्धम् ॥ ४८३ ॥

अथ महाभाष्यस्यावतारान्वाख्यानपूर्वकं टीकाकारो महत्तामुपवर्णयन् स्वरचितस्य ग्रन्थस्य गुरुपूर्वक्रममभिधातुमाह ॥

प्रायेण संक्षेपरुचीनल्पविद्यापरिग्रहान् ।
संप्राप्य वैयाकरणान् संग्रहे ऽस्तमुपागते ॥ ४८४ ॥

इह पुरा पाणिनीये ऽस्मिन् व्याकरणे व्याड्युपरचितं ग्रन्थलक्षपरिमाणं संग्रहाभिधानं निबन्धनमासीत् । तच्च कालवशात्सुकुमारबुद्धीन् वैयाकरणान् प्राप्यास्तमुपागतम् । तस्मात् क्लेशभीरुत्वात्संक्षेपरुचयस्ते जनाः । अत एवाल्पो विद्यासु परिग्रहः स्वीकारो येषां ते तथा । ततस्तैः संग्रहाध्ययनउपेक्षिते सत्यस्तं यातः संग्रहः ॥ ४८४ ॥

साधुत्वज्ञानौपयिकतया धर्मसाधनत्वेनोपजातोपयोगाय व्याकरणस्मृतेरविच्छेदाय करुणाप्रयुक्तेनाथ भगवता पतञ्जलिना वार्त्तिकव्याख्यानपुरःसरं महाभाष्यनिबन्धनमुपरचितमित्यभिधातुमाह ॥

कृते ऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना ।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने ॥ ४८५ ॥

गुरुणेति भाष्यकर्त्तुः पूजापदे । तीर्थान्यागमविशेषाः । तान्पश्यति विजानातीति तीर्थदर्शी । अनेन गुरुत्वनिबन्धनः प्रभावातिशयो भगवत उक्तः । तच्च भाष्यं न केवलं व्याकरणस्य निबन्धनं यावत्सर्वेषां न्यायबीजानां बोद्धव्यमित्यत एव सर्वन्यायबीजहेतुत्वादेव महच्छब्देन विशेष्य महाभाष्यमित्युच्यते लोके ॥ ४८५ ॥

अथ महत्त्वमेव विशेषणद्वारेणास्योपपादयितुमाह ॥

अलब्धगाधे गाम्भीर्यादुत्तानइव सौष्ठवात् ॥४८५॥

गाधो निष्ठापरिच्छेद इयत्तेति यावत् । असावलब्धो यस्य । कस्मादित्याह । "गाम्भीर्यादि"ति । गाम्भीर्यं गहनता प्रमेयबाहुल्येन दुरवगाहत्वम् । अतिगम्भीरं हि भाष्यमुपरचितं भगवता पतञ्जलिनेति न तस्याभिधेयं व्यवच्छेत्तुं केन चिच्छक्यतइति । किमेवमेकान्तं गहनमिदं भाष्यं नेत्याह । "उत्तानइवे"त्यादि । उत्तानं स्पष्टं सौष्ठवं परिपाटी यस्मादेतद्भाष्यं परिपाटिलक्षणादत्र सौष्ठवादुत्तानं स्पष्टप्रायं यत एव प्रतिभाति । अतो नेदमसेव्यं सज्जनमानसमिव निसर्गसुकुमारमतिगम्भीरं चैतदत एव महाभाष्यमित्युच्यतइत्यर्थः । एतेन संग्रहानुसारेण भगवता पतञ्जलिना संग्रहसंक्षेपभूतमेव प्रायशो भाष्यमुपनिबद्धमित्युक्तं वेदितव्यम् । तदेवं ब्रह्मकाण्डे "कायवाग्बुद्धिविषया ये मला" इत्यादिश्लोकेन भाष्यकारप्रशंसोक्ता इह चैवं भाष्यप्रशंसेति शास्त्रस्य शास्त्रकर्त्तुश्च टीकाकृता महत्त्वोपवर्णिता । अत एवेदं महाभाष्यमकृतबुद्धयो नैव बोद्धुमलमित्याह ॥

तस्मिन्नकृतबुद्धीनां नैवावास्थित निश्चयः ॥ ४८६ ॥

कृता व्युत्पत्त्या प्रकर्षं प्राप्ता महती बुद्धिर्येषां ते तथा तद्रूपवैकल्येनाकृतबुद्धयः स्वल्पप्रज्ञा उच्यन्ते । तेषां निश्चयो निर्णयपर्यन्तो बोधो नैवात्रावास्थित न प्रतिष्ठामलभत । न तेनास्मद्गुरोस्तत्रभवतो वसुराताद्न्यः कश्चिदिमं भाष्यार्णवमवगाहितुमलमित्युक्तं भवति ॥ ४८६ ॥

तथा च संग्रहप्रतिपक्षभूतैराचार्यैस्तर्कविद्यामात्रवेदिभिर्बुद्ध्यपाटवादिदमाप्लावितमाभासीकृतमित्याह ॥

बैजिसौभवहर्य्यक्षैः शुष्कतर्कानुसारिभिः ।

आर्षे विप्लाविते ग्रन्थे संग्रहप्रतिकञ्चुके ॥ ४८८ ॥

शुष्कतर्कः केवल एवान्यशास्त्रपरिमलरहितो भण्यते । तमेवानुसरन्ति प्रमेयनिर्णयायेति तदनुसारिणः । महाभाष्यं हि बहुविधविद्यावादबलमार्षं व्यवस्थितं ततश्चान्वीक्षिकीमात्रकुशलः कथं तन्निश्चिनुयादिति तर्कमात्रानुसारिभिस्तैस्तद्विप्लावितम् । तर्कश्च पुरुषाणां स्वबुद्धिमात्रनिर्मितविग्रहो ऽव्यवस्थित एव । यदुक्तम् यत्नेनानुमितोप्यर्थः कुशलैरनुमातृभिः । अभियुक्ततरैरन्यैरन्यथैवोपपाद्यत इति ॥ ४८७ ॥

इत्थं च परस्परवैमत्यादागमसंज्ञात्यागाच्च यथावस्थितो व्याकरणागमः पतञ्जलिशिष्येभ्यः कालपरिवासाद्भ्रष्टः सन् ग्रन्थमात्रे पाठमात्र एव व्यवस्थितो दाक्षिणात्येष्वित्याह ॥

यः पतञ्जलिशिष्येभ्यो भ्रष्टो व्याकरणागमः ।
काले स दाक्षिणात्येषु ग्रन्थमात्रे व्यवस्थितः ॥ ४८८ ॥

तदेवमुत्सन्नकल्पः संजातो व्याकरणागमः ॥ ४८८ ॥

अथ कालान्तरेण चन्द्राचार्यादिभिरागमं लब्ध्वा तेन चोपायभूतेन सकलानि भाष्यावस्थितानि न्यायबीजानि तान्यनुसृत्य व्याकरणागमः पुनरपि स्फीततां नीत इत्यभिधातुमाह ॥

पर्वतादागमं लब्ध्वा
भाष्यबीजानुसारिभिः ।
स नीतो बहुशाखत्वं
चन्द्राचार्यादिभिः पुनः ॥ ४८९ ॥

पर्वतात्त्रिकूटैकदेशवर्त्तित्रिलिङ्गैकदेशादिति । तत्र ह्युपलतले रावणविरचितो मूलभूतव्याकरणागमस्तिष्ठति केन चिच्च ब्रह्मरक्षसानीय चन्द्राचार्यवसुरातगुरुप्रभृतीनां दत्त इति । ते खलु यथावद्

व्याकरणस्य स्वरूपं तत उपलभ्य सततं च शिष्याणां व्याख्याय बहुशाखित्वं नीतो विस्तरं प्रापित इत्यनुश्रूयते ॥ ४८९ ॥

अथ कदा चिद्योगतो विचार्य तत्र भगवता वसुरातगुरुणा ममायमागमः संज्ञाय वात्सल्यात्प्रणीत इति स्वरचितस्यास्य ग्रन्थस्य गुरुपूर्व्वक्रममभिधातुमाह ।

न्यायप्रस्थानमार्गांस्तानभ्यस्य स्वं च दर्शनम् ।
प्रणीतो गुरुणा ऽस्माकमयमागमसंग्रहः ॥ ४९० ॥

न्यायस्य प्रतिष्ठा प्रस्थानं तस्य मार्गान् न्यायप्रस्थानमार्गान्न्यायप्रतिष्ठितैर्बहुभिर्मार्गैरिति यावत् । न्यायप्रस्थानमार्गांस्तांस्तान् स्वं च दर्शनं व्याकरणसिद्धान्तलक्षणमभ्यस्यायं प्रणीतः । अनेन गुरुणा संज्ञाय न तथा ममायमागमसंग्रहः प्रणीतः येन सन्देहो भवेदपि तु सावधानेनेत्युक्तं भवति । अस्माकमिति बहुवचनादन्येषामपि सहाध्यायिनां ग्रहणम् । अथ वा मया तु तदनुच्छेदायायमुपनिबन्धः कृत इत्यात्मनो बहुमानः प्रकटितः ॥ ४९० ॥

नन्वेतावानेव किमयं काण्डद्वयप्रोक्तो व्याकरणागम इत्याशङ्क्याह ॥

वर्त्मनामत्र केषां चिद्वस्तुमात्रमुदाहृतम् ।
काण्डे तृतीये न्यक्षेण भविष्यति विचारणा ॥ ४९१ ॥

अत्रास्मिन्वाक्यकाण्डे काण्डद्वये वा केषां चिदेव न्यायवर्त्मनां वस्तुमात्रं बीजमात्रं प्रदर्शितमिव । शिष्टे तु तृतीये ऽस्य ग्रन्थस्य पदकाण्डद्वयनिष्यन्दभूते न्यक्षेणादरविशेषेण स्वसिद्धान्तपरसिद्धान्तवर्त्तिनां विचारणा युक्तायुक्तविचारपूर्वकनिर्णीतिर्भविष्यति । ततो नायमेतावान् व्याकरणागमसंग्रह इति ॥ ४९१ ॥

ननु तत्तन्न्यायप्रस्थानमार्गाभ्यासेन किं कृत्यं स्वदर्शनमेव निश्चि-

तं किं न विचार्यतइत्याह ॥

प्रज्ञाविवेकं लभते भिन्नैरागमदर्शनैः ।
कियद्वा शक्यमुन्नेतुं स्वतर्कमनुधावता ॥ ४९२ ॥

नानाविधैरागमदर्शनैरागमसिद्धान्तैः खलु प्रज्ञा विवेकं लभते वैशारद्यमाप्नोति । ततश्च निःसंदिग्धं स्वसिद्धान्तमेव संपरिकर्त्तुं भिन्नागमदर्शनैः शक्तिर्जायते । अन्यथा ऽदृष्टपरकीयागमस्वरूपेण प्रतिपत्त्रा स्वोत्प्रेक्षामेव तेषु तेषु तेषु चावस्थानेष्वनुसरता कियच्छक्यमुन्नेतुं प्रतिविधातुम् । कदा चित्परमर्षयो योगजधर्मोत्पन्नसामर्थ्याद्यथावत्पदार्थान्पश्यन्तःसिद्धान्तमलमिति शोभते । ये त्वारुरुक्षवः प्राथमकल्पिका मलिनचित्तवृत्तयः शास्त्रादेवातीतानागतव्यवहितपदार्थस्वरूपं निश्चिन्वन्ति तेषां नानागमोपसेवयैवानुप्रसीदति भगवती प्रतिभेति युक्तम् ॥ ४९२ ॥

एतदेव निरूपयितुमाह ॥

तत्तदुत्प्रेक्षमाणानां पुराणैरागमैर्विना ।
अनुपासितवृद्धानां विद्या नातिप्रसीदति ॥ ४९३ ॥

प्रतिष्ठामुपगतैः पूर्वैरागमैर्बहुविधैर्विना स्वयमेव तत्तदित्ययथायथमेवोत्प्रेक्षमाणानां विकल्पयतां प्रतिपत्तॄणां शास्त्रोपपन्नमेधाविरहिणां पण्डितंमन्यानामभिमानाग्रहाघातानां तेषां भगवती विद्या विशुद्धप्रज्ञा प्रतिभालक्षणा न प्रसीदति अत्यर्थं, किं तर्हि वृद्धोपसेवाशालिनामागमजुषां विगलिताभिमानानामेवैषा भगवती प्रज्ञा प्रसादमुपयातीति सिद्धः ॥ ४९३ ॥

तदयमत्र मेयसमुच्चयः । वाक्यानामष्टधैवादौ विभागः परिकीर्त्तितः । शास्त्रीयमैमांसकयोः कीर्त्तनं वाक्ययोस्ततः ॥ १ ॥ बलाब-

लविचारो ऽपि शास्त्रीयो व्याप्तिनिर्णयात् । ततश्चात्र समासेन वाक्यलक्षणनिर्णयः ॥ २ ॥ सन्देहश्चागमेनापि वाक्यभेदस्य दर्शितः । स्फोट एव तु सिद्धान्ते वाक्यं वाक्येषु साधितम् ॥ ३ ॥ पदवादस्त्वनुमतो नेति व्याकरणे स्थितम् । ततो ऽन्विताभिधानस्याभिहितान्वयकस्य च ॥ ४ ॥ शब्दभागार्थभागाभ्यां दूषणव्रातकीर्त्तनम् । प्रसङ्गेनापरेप्यत्र वाक्यार्थाः षट् प्रदर्शिताः ॥ ५ ॥ अखण्डवाक्यपक्षे च चोद्यपञ्चककीर्त्तनम् । उपपत्तिः प्रतिनिधेर्नास्तीति प्रथमं यथा ॥ ६ ॥ पिकादिपदसन्देहो नोपपद्यतइत्यपि । श्रुतिवाक्यविरोधे तु श्रुतिरेव बलीयसी ॥ ७ ॥ प्रतिष्ठितस्य न्यायस्याप्येवं त्यागः प्रसज्यते । अवान्तराणां वाक्यानामुपपत्तिर्विरुध्यते ॥ ८ ॥ प्रासङ्गिकादिषु तथा लक्षणेष्वप्यसम्भवः । प्राप्नोत्येवमखण्डे ऽस्मिन्वाक्ये दोषा उदाहृताः ॥ ९ ॥ अपोद्धारं समाश्रित्य दोषास्त्वेते निराकृताः । संहितायां विभागे ऽथ पदयोर्विलयं गते ॥ १० ॥ उपादानावधिं कर्त्तुं तयोरर्थः प्रकल्प्यताम् । इति दूषणमत्राधात्पदे वाक्ये च वाक्यवित् ॥ ११ ॥ तत्र न्यायवशादत्र स्वपक्षे दोषसंहृतिः । वाक्यार्थस्यात्र भेदोपि विकल्प्य परिकल्पितः ॥ १२ ॥ प्रतिभेदं च सिद्धान्ते वाक्यार्थ उपपादितः । प्रविभागाश्रयादत्र पदार्थस्यापि सम्भवः ॥ १३ ॥ स च द्वादशधा भिन्न इत्यप्यत्रोपपादितम् । प्रतिभालक्षणं सम्यग्विधातुं संहितं कृतम् ॥ १४ ॥ पदभागार्थभागाश्च वितत्य प्रतिपादिताः । अन्वयव्यतिरेकाभ्यां विविक्ततोपपादिता ॥ १५ ॥ सनिमित्ता च सा ऽप्यत्र नामाख्यातसमाश्रया । उपसर्गनिपाताश्च कर्म्मप्रवचनीयकाः ॥ १६ ॥ पदभेदाः प्रसङ्गेन लक्षणेनोपलक्षिताः । सार्थकानर्थकत्वाभ्यां विचारे वर्णनिष्ठिते ॥ १७ ॥ कृते ऽप्यखण्डपक्षो ऽत्र प्रतिष्ठामुपनामितः । पदवादे ऽथ दोषाणां चतुर्णां परिकीर्त्तनम् ॥ १८ ॥ समासेषु विरुद्धार्थप्राप्तिरादावुदाहृता । अध्यादीनां तथा वाक्ये साधनस्याभिधायिता ॥ १९ ॥ अर्था

सङ्गतिरप्यत्र बहुव्रीहेरुदाहृता । प्रभुसंख्यादिषु तथा नास्त्यर्थो ऽवय-
वेष्वपि ॥ २० ॥ इति चोद्यचतुष्केण पदवादः पराकृतः । स्थापिते ऽख-
ण्डपक्षे ऽपि चोद्यसप्तकमाहितम् ॥ २१ ॥ द्वन्द्वे समासे नैव स्याद्द्व-
र्थस्याभिधायिका । विभक्तिरिति दोषो ऽत्र प्रथमं परिकीर्त्तितम् ॥
२२ ॥ वाक्यस्यार्थसमाप्तिस्तु प्रत्येकं नोपपद्यते । परामर्शश्च नैव स्या-
त्सर्वनामभिरेव च ॥ २३ ॥ अनुष्ठानं क्रमेणाथ वाक्यार्थस्य न जातु-
चित् । स्यादक्रमे त्वनुष्ठानं शक्यते न कथं चन ॥२४॥ एकदेशस्य कर-
णे समुदाये ऽर्थकारिता । अभिमन्यतइत्येतदखण्डे नोपपद्यते ॥२५॥
एतानि पञ्च चोद्यान्यपोद्धारस्य समाश्रयात् । समर्थितानि वै सम्य-
गखण्डं वाक्यमिच्छता ॥ २६ ॥ अथाखण्डं यदा वाक्यं समासेष्वर्थव-
र्णना । पृथक् पृथक्तदा तस्याः सा च शास्त्रे प्रकीर्त्तिता ॥२७॥ नञ्स-
मासे पदार्थस्य विकल्पैर्बहुभिः पुनः । प्राधान्यं परिकल्प्याथ भाष्ये
पक्षाः परीक्षिताः ॥ २८ ॥ यद्यखण्डमिदं वाक्यं नैषा स्यात्कल्पना क्व-
चित् । दोषावेतावपि शब्दप्रक्रियामात्रमेव च ॥२९॥ शास्त्रप्रवृत्ताविति
च निराकरणमेतयोः । ततश्चाखण्डपक्षस्य स बाध उपदर्शितः ॥ ३० ॥
जहत्स्वार्थविकल्पेन बहुव्रीह्यादिगामिना । प्रत्युत प्रभुदोषश्च पदवादे
प्रकीर्त्तितः ॥ ३१ ॥ प्रकृत्यर्थः प्रत्ययार्थ इति भिन्नौ परस्परम् । या-
वत् स्थितौ तयोरेकापायेनावगतिः कथम् ॥ ३२ ॥ इहा ऽहं नास्ती-
ति च सा दृष्टा स्याद्वास्तवे कथम् । पदार्थं प्रति दोषो ऽयं पदवादे
समुद्धृतः ॥ ३३ ॥ प्रत्ययद्वयगम्ये ऽर्थे एकस्मादेव तद्गतेः । अत्तीत्या-
दौ कथं च स्यात्सत्यता पदपद्धतेः ॥ ३४ ॥ सत्यत्वे ऽथ पदानां
स्यात्प्रकृतिप्रत्ययार्थयोः । कथं लक्षणशास्त्रेषु साङ्कर्येण व्यवस्थितिः ॥
३५ ॥ पदार्थमत्यथैवादौ प्रतिपद्यान्यथा पुनः । वाक्यार्थप्रतिपत्तिश्च
दृष्टा नैतत्समञ्जसम् ॥ ३६ ॥ सत्यभूतेष्वथ पदेष्विति वाक्यविदो ज-
गुः । नञर्थानुपपत्तेश्च नास्ति वादः पदाश्रयः ॥ ३७ ॥ उपात्तत्यागसं-

प्राप्ते सर्वत्रेति च दूषणम्। सह प्रागुक्तदोषैश्चाप्येकादश समीरिताः॥ ३८॥ पदवादे ऽत्र दोषास्तु पृथक् पचद्वयं पुनः। शब्दभागार्थभागाभ्यां विस्तरेण विचक्षणैः॥ ३९॥ निराकृतमतो युक्त्या वाक्यवादपरिग्रहः। दोषः संक्षिन्यतिक्रान्तः सूत्रकाराभिसंमतः॥४०॥ अपोद्धाराश्रयादत्र गौणमुख्यविचारणा। ततः कृता सुनियतं टीकाकारेण सादरम्॥ ४१॥ सत्यासत्यविभागोपि ज्ञानानामुपपादितः। मुख्यनान्तरीयकयोरर्थयोरनिवर्त्तनम्॥ ४२॥ ततस्त्वर्थचतुष्कस्य चिन्तनं विहितं क्रमात्। शब्दार्थनिर्णयोपायाः सादरं परिकीर्त्तिताः॥ ४३॥ तात्पर्यं परिपाठ्याश्चार्थतात्पर्यमपीति च। वाक्यनिष्ठं समासेन विचारितमतः पृथक्॥४४॥ उत्सर्गस्याऽपवादस्य विवेकः परिकीर्त्तितः। संज्ञाशब्देष्वथ कृता निर्णयः परिवत्सरान्॥ ४५॥ प्रत्येकं समुदाये च समाप्त्या वाक्यनिश्चितिः। न्यायः सञ्चिन्तितश्चात्र लक्षिती ऽप्यभिधीयते॥४६॥ अथ पूर्वोक्तसंक्षेपद्वारेणाप्युपपादितः। वाक्यवाक्यार्थनिष्ठस्य पदनिष्ठस्य निर्णयः॥ ४७॥ वाक्यैकवाक्यतायाश्च विचारोपि निरूपितः। वाक्यवाक्यार्थनिष्ठस्य पदनिष्ठस्य निर्णयः॥ ४८॥ वाक्यैकवाक्यतायाश्च विचारोपि निरूपितः। साकाङ्क्षत्वं निराकाङ्क्षा वाक्यानां परिकीर्त्तिता॥ ४९॥ यद्वा चिन्ता समासेप्यन्यस्माद्वस्तुनिरूपिता। अथात्र तन्त्रन्यायस्य सिद्धिर्भाष्यानुगा स्मृता॥ ५०॥ अवतारोपि भाष्यस्य संग्रहे ऽस्तमुपागते। निबन्धहेतौ शास्त्रस्य टीकाकारेण कीर्त्तितः॥ ५१॥ संग्रहार्थाद्यनुगुणरूपत्वं चोपपादितम्। विप्लावनमथैतस्य संग्रहप्रतिपद्यतः॥ ५२॥ कृतमाचार्यदैवज्ञैरावेशविवशैस्ततः। भ्रष्टस्याम्नायसारस्य वैयाकरणगामिनः॥ ५३॥ मूलभूतमवाप्याथ पर्वतादागमं स्वयम्। आचार्यवसुरातेन न्यायमार्गान्विचिन्त्य सः॥ ५४॥ प्रणीतो विधिवच्चायं मम व्याकरणागमः। मयापि गुरुनिर्दिष्टाद्गाथाम्नायाविलुप्तये॥ ५५॥ काण्डत्रयक्रमेणायं नि-

बन्धः परिकीर्त्तितः। ग्रन्थकारेण ग्रन्थे ऽस्मिन् स्वस्मिन्गुर्वागमः स्फुटम् ॥ ५६ ॥ इत्येव वाक्यकाण्डस्य प्रमेयविषयाः स्फुटम्। सङ्गतिः कीर्त्तिता लघ्वी समासेन निराकुला ॥ ५७॥ विद्वज्जनानां यः खलु सर्वत्र गीयते जगति। तत उपसृत्य विरचिता राजानकशूरवर्मनाम्ना वै ॥ ५८ ॥ अथाङ्घ्रिषाच्छुल्वैतद्वाक्यकाण्डं समासतः। पुण्यराजेन तस्योक्ता सङ्गतिः कारिकाश्रिता ॥ ५९ ॥ गुरवे भर्तृहरये शब्दब्रह्मविदे नमः। सर्वसिद्धान्तसन्दोहसारामृतमयाय च ॥ ६० ॥ इति श्रीपुण्यराजकृता वाक्यपदीयद्वितीयकाण्डटीका समाप्ता ॥ शुभमस्तु समाप्तम् ॥ संवत् ॥ १९४४ ॥

श्रीः ।

वाक्यपदीयस्य काण्डद्वयस्य शुद्धिपत्रम् ।

पृ०

८६ टीकाङ्कः ४५ — स्थाने ४६ प्रमादपतितः । तदुत्तरं तथैवाङ्का बोध्याः ।

६४ टीकाङ्कः ६५ — स्थाने ६६ प्रमादपतितः । तदुत्तरं तथैवाङ्का बोध्याः ।

१३९ श्लोकाङ्कः १३८ — स्थाने १३९ इत्यपेक्षितम् ।

१४६ टीकाङ्कः १७९ — स्थाने १७० इत्यपेक्षितम् ।

१५८ टीकाङ्कः २६२ — स्थाने १६१ अपेक्षितः । मूलाङ्कः १६१ — स्थाने १६२ अपेक्षितः ।

२१४ मूले 'अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः' । इत्यस्याग्रे 'सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः । शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः' इति श्लोको ऽपेक्षितः । तदनुसारेण ३१८ इति मूलाङ्कः अपेक्षितः ।

२१७ टीकाङ्कः ३१७ — स्थाने ३१८ अपेक्षितः ।

२२५ टिप्पण्यां २८७ — स्थाने ४५ अपेक्षितम् ।

२२५ मूलाङ्कः ३३४ऽ — स्थाने ३३३ऽऽऽ । इत्यपेक्षितम् । अनेनैव क्रमेणाग्रे ऽङ्काः बोध्याः ।

२४१ मूलाङ्कः २७४ — स्थाने २७२ इत्यपेक्षितम् । अनेनैव क्रमेणाग्रे ऽङ्का बोध्याः ।

२६५ टीकाङ्कः ४३९ — स्थाने ४३८ इत्यपेक्षितम् । अयमेवाग्रे क्रमः ।

२८५ मूलाङ्कः ४८८ — स्थाने ४८७ इत्यपेक्षितम् ।

अयं च सर्वो ऽपि अङ्कविपर्यय आदर्शपुस्तके व्यत्यस्ताङ्कलेखनाज्जातः । ग्रन्थे तु न कश्चिद् व्यत्ययः केवलमेकः श्लोकस्त्रुटितः ॥

BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PAṆḌITS OF THE BENARES SANSKṚIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH M. A.,

LATE DIRECTOR OF PUBLIC INSTRUCTION, N. W. P. & OUDH,

& G. THIBAUT PH. DR.,

PRINCIPAL, BENARES COLLEGE.

Nos. 11, 19 & 24.

श्रीविश्वनाथो विजयते ।

वाक्यपदीयं

साङ्गवैयाकरणसिद्धान्तनिरूपणं श्रीभर्तृहरिमहावैयाकरणविरचितं

श्रीपुण्यराजकृतप्रकाशाख्यटीकायुतम् ।

VÁKYAPADÍYA

A TREATISE ON THE PHILOSOPHY OF SANSKṚIT GRAMMAR BY BHARTṚIHARI, WITH A COMMENTARY BY PUṆYARÁJA.

EDITED BY PAṆḌIT GAṄGÁDHARA ŚÁSTRÍ MÁNAVALLÍ,

PROFESSOR OF LITERATURE, SANSKRIT COLLEGE, BENARES.

BENARES:

PUBLISHED BY MESSRS. BRAJ B. DAS & CO.

PRINTED AT THE BENARES PRINTING PRESS

BY CHHANNULAL.

1887.

॥ श्रीः ॥

वाक्यपदीयस्य सटीकस्योपसंहारः ।

इदं वाक्यपदीयं काण्डद्वयात्मकमादौ काशिकराजकीयपाठशालायां सांख्यशास्त्राध्यापकेन श्रीयुतरामकृष्णशास्त्रिणा मुद्रयितुमुपक्रान्तम् । अथ श्लोकावशिष्टे प्रथमकाण्डमुद्रणे केन चित्कारणेन संजातवैरस्येनामुना विरमिते तदुत्तरभागपरिशोधने काशिकराजकीयसंस्कृतपाठशालाप्रधानाध्यक्षैः श्रीयुतथीबोसाहिबमहाशयैरेतत्कार्यसमापनायादिष्टो ऽहं रसगङ्गाधरस्य सटीकस्य परिशोधने व्यापृतोपि तत्रावश्यकटिप्पण्यादिनिवेशनमुपेक्ष्यैतत्कार्यसंपादनाय प्रावर्तिषि । अत्र चान्विषन् पुस्तकसाहायकं समासादयं समस्तवसुधातलविख्यातमदीयगुरुवरश्रीबालशास्त्रिचरणसरस्वतीभवनस्थं द्वितीयकाण्डान्तमेकं पुस्तकमपरं च किं चित्खण्डितं सावदेव पण्डितवरश्रीढुण्ढिराजाचार्याणां तृतीयं च काण्डत्रयात्मकं मूलमेव तुरीयं तु खण्डितमशुद्धं च तृतीयकाण्डमात्रस्य । तानि चालम्ब्य निर्वाहयन् कार्यमिदं समापयं पुण्यराजकृतव्याख्यया समलंकृतं द्वितीयकाण्डम् । मूलकारिकापुस्तके ऽत्रैव समाप्ता वाक्यपदीयकारिकेति लेखं वाक्यपदे अधिकृत्य कृतो ग्रन्थ इत्यर्थे अधिकृत्य कृते ग्रन्थे इत्यधिकारीयेण शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छ इति सूत्रेण विहितच्छप्रत्ययान्तवाक्यपदीयशब्दस्य वाक्यपदविचारकग्रन्थपरतया काण्डद्वयस्यैव तथात्वमत्रैव ग्रन्थसमाप्तावुपन्यसनीयानां ग्रन्थनिर्माणहेतुप्रयोजनविषयपरिगणनादीनां च निरूपणं तृतीयकाण्डे प्रायः कारकप्रकरणसम्बन्धिविचारं च समीक्ष्य युक्ततमं मन्यमानः समापयामि साम्प्रतमियतैवैतद्ग्रन्थसंमुद्रणम् ॥

तृतीयकाण्डस्य तु पूर्वोदाहृतं हेलाराजकृतव्याख्यासहितं खण्डितमशुद्धं चैकमेव पुस्तकं न कार्यनिर्वाहायालमिति विरतो ऽपि लभेय चेत्समग्रं शुद्धं च पुस्तकं संपादयेयमचिरेणैव तस्यापि मुद्रणमित्यर्थये शास्त्ररसिकान् विलुप्तप्रायसंस्कृतपुस्तकपुनरुज्जीवनमहोत्साहिनो महाशयान् स्वसमीपस्थितैतत्पुस्तकं मां प्रबोधयितुं येनोचितप्रबन्धेन तत्संग्रहीतास्मि । प्रार्थये च गुणैकदर्शिनः परदूषणवाचंयमव्रतान् विपश्चितो मदीयमतिदोषेण सीसकाक्षरयोजकदोषेण च सुलभान्यत्र स्खलितान्युपेक्ष्यास्वादयन्तु प्राचीनतमगम्भीरवैयाकरणसिद्धान्तसुधारसं सप्रमोदमिति ।

मानवल्ल्युपाख्यो गङ्गाधरशास्त्री ।

सं० १९४४ आषाढ सुदि ११ शुक्रे ।